व्याकरणपरिचयः

COURSE CODE: B21SN03DC



BACHELOR OF ARTS
SANSKRIT LANGUAGE AND LITERATURE

SELF LEARNING MATERIAL

SGOU

SREENARAYANAGURU OPEN UNIVERSITY

SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

SREENARAYANAGURU OPEN UNIVERSITY

Vision

To increase access of potential learners of all categories to scientific and value-based quality higher education, research and training to ensure equity in its process and outcome fostering educational empowerment for social advancement.

Mission

* To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode through approved quality education, training and research for normal, continuing, and adult learners.

* To democratize lifelong continuous education, skilling and upskilling, and training for all regardless of their economic status.

* To foster inclusiveness in quality education by bringing economically and socially weaker sections under the quality higher education framework without gender, religious, and regional discriminations.

* To provide access to quality higher education for potential learners without formal prerequisites.

Pathway

Access and Quality define Equity.

SGOU

व्याकरणपरिचयः

Course Code: B21SN03DC

Semester -III

SGOU

Bachelor of Arts
Sanskrit Language and Literature
Self Learning Material

SREENARAYANAGURU
OPEN UNIVERSITY

SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

B21SN03DC

व्याकरणपरिचयः

Semester - III

DOCUMENTATION

Academic Committee

Dr. C.T. Francis (Chairman)
Dr . Jeena George
Dr. Geetha H.
Dr. J.P. Prajith
Dr. K. Retheesh
Dr. M. Harinaryanan Mankulathillath
Dr. P.K. Somarajan
Dr. Smitha Sabu
Dr. Susanth S.
Dr. Thara K.V.
Major K.S. Narayanan
Uma A.K.

Development of the content

Dr. G. Sahadevan, Unnikrishnan Nair S., K.N. Sunitha

Review

Content : Dr. V. Sisupala Panicker
Format : Dr. I.G. Shibi
Linguistics : Dr. G. Sahadevan

Edit

Dr. V. Sisupala Panicker

Scrutiny

Dr. Vincent B. Netto, Dr. Jothilekshmi M.

Co-ordination

Dr. I.G. Shibi and Team SLM

Design Control

Azeem Babu T.A.

Production

August 2023

Copyright

© Sreenarayanaguru Open University 2023

SREENARAYANAGURU OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-966440-3-1

9 788196 644031

YouTube

MESSAGE FROM VICE CHANCELLOR

Dear,

I greet all of you with deep delight and great excitement. I welcome you to the Sreenarayanaguru Open University.

Sreenarayanaguru Open University was established in September 2020 as a state initiative for fostering higher education in open and distance mode. We shaped our dreams through a pathway defined by a dictum 'access and quality define equity'. It provides all reasons to us for the celebration of quality in the process of education. I am overwhelmed to let you know that we have resolved not to become ourselves a reason or cause a reason for the dissemination of inferior education. It sets the pace as well as the destination. The name of the University centres around the aura of Sreenarayanaguru, the great renaissance thinker of modern India. His name is a reminder for us to ensure quality in the delivery of all academic endeavours.

Sreenarayanaguru Open University rests on the practical framework of the popularly known "blended format". Learner on distance mode obviously has limitations in getting exposed to the full potential of classroom learning experience. Our pedagogical basket has three entities viz Self Learning Material, Classroom Counselling and Virtual modes. This combination is expected to provide high voltage in learning as well as teaching experiences. Care has been taken to ensure quality endeavours across all the entities.

The university is committed to provide you stimulating learning experience. The UG programme in Sanskrit Language and Literature is considered to be special due to its emphasis on the components of grammar and comprehension, although the discussions on literature do find adequate share in the curriculum. Being a discipline with high potential of employability, the Sanskrit education requires a realistic convergence of both grammar and literature. The present programme runs on this presumption and the SLM is expected to reflect it. We assure you that the university student support services will closely stay with you for the redressal of your grievances during your studentship.

Feel free to write to us about anything that you feel relevant regarding the academic programme.



Wish you the best.

01.08.2023

Regards,
Dr. P.M. Mubarak Pasha

SGOU

C O N T E N T S

Table of Contents

Block-1लघुसिद्धान्तकौमुदी- संज्ञाप्रकरणं- विस्तरेण अध्ययनम् 1

Unit-1 संस्कृतव्याकरणस्य प्राक्कथनम् 2

Unit-2माहेश्वरसूत्रादारभ्य मुखनासिकावचनोऽनुनासिकः इति सूत्रपर्यन्तम् 7

Unit-3 तुल्यास्यप्रयत्नं सवर्णम् 13

Unit-4 अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रादारभ्य सुप्तिङन्तं पदम् इति सूत्रपर्यन्तम् 18

Block-2 लघुसिद्धान्तकौमुदी-अच्सन्धिप्रकरणं-विस्तरेण अध्ययनम् 23

Unit-1इको यणचि इति सूत्रादारभ्य वान्तो यि प्रत्यये इति सूत्रपर्यन्तम् 24

Unit-2अदेङ्गुणः इति सूत्रादारभ्य एङि पररूपम् इति सूत्रपर्यन्तम् 30

Unit-3अचोऽन्त्यादि टि इति सूत्रादारभ्य अदसो मात् इति सूत्रपर्यन्तम् 38

Unit-4 चादयोऽसत्वे इत्यारभ्य ऋत्यकः इति सूत्रपर्यन्तम् 45

Block-3लघुसिद्धान्तकौमुदी- हल्सन्धिप्रकरणम्- विस्तरेण अध्ययनम् 51

Unit-1 स्तोः श्चुना श्चुः इति सूत्रादारभ्य तोर्लिः इति सूत्रपर्यन्तम् 52

Unit-2उदःस्थास्तम्भोः पूर्वस्य इति सूत्रादारभ्य वा पदान्तस्य इति सूत्रपर्यन्तम् 58

Unit-3मो राजि समः क्वौ इति सूत्रादारभ्य शि तुक् इति सूत्रपर्यन्तम् 64

Unit-4 ङमो ह्रस्वादचि ङमुण्नित्यम् इति सूत्रादारभ्य पदान्ताद्वा इति सूत्रपर्यन्तम् 70

Block-4लघुसिद्धान्तकौमुदी- विसर्गसन्धिः कारकप्रकरणं च- विस्तरेण अध्ययनम् 78

Unit-1 विसर्गसन्धिः 79

Unit- 2 कारकप्रकरणम् - अकथितं च इति सूत्रपर्यन्तम् 87

Unit-3 कारकप्रकरणम् - स्वतन्त्रः कर्ता इति सूत्रादारभ्य नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च इति सूत्रपर्यन्तम् 94

Unit-4 ध्रुवमपायेऽपादनम् इति सूत्रादारभ्य सप्तम्यधिकरणे च इति सूत्रपर्यन्तम् 98

Block-5लघुसिद्धान्तकौमुदी- समासप्रकरणम्। केवलसमास-अव्ययीभावसमासयोः विस्तरेण अध्ययनम् 103

Unit- 1प्राक्कथनम् 104

Unit- 2 केवलसमासः 108

Unit-3अव्ययीभावसमासप्रकरणम् -तृतीयासप्तम्योर्बहुलम् इति सूत्रपर्यन्तम् 111

Unit-4अव्ययीभावसमासे शिष्टो भागः 117

SGOU

Block-6 लघुसिद्धान्तकौमुदी-तत्पुरुष-बहुव्रीहि-द्वन्द्वसमासानां विस्तरेण अध्ययनम् 124
Unit-1 तत्पुरुषसमासः 125
Unit-2 कर्मधारयसमासः द्विगुसमासश्च 134
Unit-3 बहुव्रीहिसमासः 148
Unit-4 द्वन्द्वसमासः 157
Model Question Paper Set - 1 164
Model Question Paper Set - 2 167

SGOU

BLOCK-1

लघुसिद्धान्तकौमुदी-
संज्ञाप्रकरणं-
विस्तरेण अध्ययनम्

SCOU

Unit-1

संस्कृतव्याकरणस्य प्राक्कथनम्

उद्देश्यानि (Learning Outcomes)

- व्याकरणविषये प्राथमिकतत्त्वानां ज्ञानम्।
- भाषाध्ययनाय बोधनाय च प्रावीण्यार्जनम्।
- व्याकरणसंज्ञानां परिचयः।
- प्रसिद्धानां व्याकरणाचार्य़ाणां व्याकरणग्रन्थानां च परिचयः।

प्राग्व्यपेक्षाः (Pre requisites)

भाषायाः व्याकरणस्य च मिथः बन्धः। 'भाषा' आशयविनिमयाय उपयुज्यते।'भाष व्यक्तायां वाचि' इत्यस्मात् धातोः निष्पन्नं भवति 'भाषा' इति पदम्। आङ्गलभाषायां लाङ्ग्वेज् (Language) इति पदमुपयुज्यते। अस्माभिरुच्चार्यमाणस्य शब्दस्य वाक्यस्य वा निश्चितरूपेण कश्चन आशयः वर्तते। शब्दः अर्थेन युक्तः। शब्दार्थौ सहकृतौ भवतः।

भाषा तत्तद्देशस्थानां संस्कारं सूचयति। भाषाप्रयोगेन जने अन्तर्भूतं संस्कारं ज्ञातुं शक्यते। अतः संस्कृतियुक्तायां भाषायां व्याकरणस्खालित्यं न भवेत्। व्याकरणं भाषां शुद्धीकरोति।

मुख्यपदानि (Key words)

व्याकरणम्, पाणिनिः, अष्टाध्यायी, पतञ्जलिः, वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षितः, वरदराजः, लघुसिद्धान्तकौमुदी

Discussion

किं नाम व्याकरणम्? व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्। मानवानां प्रयोगानुसारं भाषाः जायन्ते। भाषानुसारं व्याकरणरूपाणि निष्पाद्यन्ते। व्याकरणमित्यस्य भाषापरः अर्थः विशकलनम् अपग्रथनं वा।

व्याकरणपठनं सर्वशास्त्रोपकारकमेव। प्रधानं च षड्सु अङ्गेषु व्याकरणम्। वेदपुरुषस्य मुखं भवति व्याकरणम्। उक्तञ्च।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्यकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।

व्याकरणपठनेन विना वेदपठनं सुकरं न भवति। ऋग्वेदकालात् एव व्याकरणशास्त्रस्य निर्देशः समुपलभ्यते। व्याकरणस्य उत्पत्तिकथा तु तैत्तिरीयसंहितायां वर्णितमस्ति। महर्षेः यास्कस्य निरुक्तग्रन्थे व्याकरणस्य अनेकेषां पारिभाषिकशब्दानां प्रयोगः समुपलभ्यते।

SGOU

प्रसिद्धाः व्याकरणग्रन्थाः आचार्याश्च।

पाणिनेः अष्टाध्यायी।

व्याकरणस्य लब्धप्रतिष्ठाचार्यः पाणिनिः भवति। भारते भाषायाः पठनं प्रायेण पाणिनेः कालादारभ्यते।

पाणिनिः कः आसीत्?

पाणिनिः क्रिस्तोः पूर्वं चतुर्थे शतके शालातुरग्रामे जनिं प्रापेति गवेषकाणां कतिपयानां मतम्। अयं देशः इदानीं लाहोर्देशे भवति। पतञ्जलेः महाभाष्यानुसारं पाणिनेः मातुः नाम दाक्षी इत्यासीत्। विश्वप्रसिद्धः वैयाकरणः भवति पाणिनिः। तस्य व्याकरणग्रन्थे अष्टाध्याय्यां प्रायेण चतुस्सहस्रं सूत्राणि सन्ति। भाषाशास्त्रस्य चरित्रं पाणिनिना अष्टाध्याय्याः च आरभते।

अष्टाध्याय्याः अपरं नाम भवति 'पाणिनीयम्'। अस्मिन् अष्ट अध्यायाः सन्ति। एकस्मिन् अध्याये चत्वारः पादाः। प्रतिपादम् अनेकानि सूत्राणि। सूत्राणि यथाक्रममेव वर्तन्ते। प्रथमं सूत्रं 'वृद्धिरादैच्' (१-१-१), द्वितीयं सूत्रम् 'अदेङ् गुणः' (१-१-२) पुनः 'इको गुणवृद्धी' (१-१-३) इत्येवं क्रमेण। अन्तिमं सूत्रं भवति 'अ.अ.' (८-४-६८)।

किं नाम सूत्रम्?

'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोन्मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः'।।

पाणिनिः वैयाकरणाचार्येषु अद्वितीयः। सः शास्त्रियरीत्या भाषायाः अपग्रथनं कृतवान्। भारतसर्वकारः चतुरधिकद्विसहस्रतमे वर्षे (२००४) पाणिनेः मुद्राङ्कितम् एकं मुद्रणं (stamp) पञ्चरुप्यके प्रसिद्धीकृत्य तं बहुमानितवान्।

भट्टोजिदीक्षितस्य वैयाकरणसिद्धान्तकौमुदी।

पाणिनेः अष्टाध्यायाः अक्षरक्रमः साधारणरीत्या न भवति। किन्तु क्रमानुसारं शास्त्रानुसारं च भवति। पाणिनेः सूत्राणां व्याख्यानम् आचार्येण भट्टोजिना कृतम्। व्याकरणपठितॄणां छात्राणाम् इच्छानुसारम् आचार्यः भट्टोजिदीक्षितः पाणिनीये इतस्ततः सूचितान् नियमान् आवश्यानुसारं क्रमीकृतवान्। भट्टोजिमहाभागेन रचितः ग्रन्थः भवति 'वैयाकरणसिद्धान्तकौमुदी'। पाणिनीयाद् अत्यन्तमावश्यकानि सूत्राणि चित्वा संक्षिप्ततया रचितः अयं ग्रन्थः व्याकरणशास्त्रे प्रवेष्टुं साहाय्यं करोति। सः प्रथमं संज्ञाप्रकरणं सन्धिप्रकरणानि अजन्तहलन्तशब्दनिष्पत्तिरूपाणि इत्येवं रूपेण परिवर्तनं कृत्वा लिखितवान्।

वरदराजाचार्यस्य लघुसिद्धान्तकौमुदी।

अपरः कश्चन प्रसिद्धः व्याकरणग्रन्थः भवति वरदराजाचार्यस्य लघुसिद्धान्तकौमुदी। वरदराजः भट्टोजिदीक्षितस्य शिष्यः। सः सप्तदशे शतके महाराष्ट्रदेशे जीवितमदाधारयत्। तस्य पिता दुर्गादासः। उक्तं च -

नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान्।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम्।।इति।

SGOU

सः मध्यसिद्धान्तकौमुदीरचनानन्तरं व्याकरणशास्त्रस्य प्रथमसोपानरूपां लघुसिद्धान्तकौमुदीं रचितवान्। ग्रन्थान्ते तेन सूचितमस्ति यत्

शास्त्रान्तरे प्रविष्टानां बालानां चोपकारिका
कृता वरदराजेन लघुसिद्धान्तकौमुदी। इति।

पुनरावृत्तिः (Recap)

- विश्वप्रसिद्धः वैयाकरणः पाणिनिः।
- पाणिनेः मातुः नाम दाक्षी इत्यासीत्।
- अष्टाध्याय्याः अपरं नाम 'पाणिनीयम्'।
- अष्टाध्याय्यां प्रायेण चतुस्सहस्रं सूत्राणि सन्ति।
- अष्टाध्याय्याम् अष्ट अध्यायाः सन्ति।
- एकस्मिन् अध्याये चत्वारः पादाः।
- प्रथमं सूत्रं 'वृद्धिरादैच्'(१-१-१)।
- अन्तिमं सूत्रं 'अ.अ.'(८-४-६८)।
- सूत्रलक्षणम्।
- पाणिनेः सूत्राणां व्याख्यानम् आचार्येण भट्टोजिना कृतम्।
- पाणिनीयाद् अत्यन्तमावश्यकानि सूत्राणि चित्वा संक्षिप्ततया रचितः वैयाकरणसिद्धान्तकौमुदी नाम ग्रन्थः।
- संज्ञाप्रकरणं, सन्धिप्रकरणानि, अजन्तहलन्तशब्दनिष्पत्तिरूपाणि इत्येवं रूपेण परिवर्तनं कृत्वा लिखितवान्।
- अपरः कश्चन प्रसिद्धः व्याकरणग्रन्थः भवति वरदराजाचार्यस्य लघुसिद्धान्तकौमुदी।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. व्याकरणं नाम किम्?
२. वेदपुरुषस्य मुखं किम्?
३. निरुक्तग्रन्थस्य कर्ता कः?
४. अष्टाध्यायी इत्यस्य अपरं नामं किम्?
५. अष्टाध्यायां प्रायेण कति सूत्राणि सन्ति?
६. पाणिनीये प्रथमं सूत्रं किम्?
७. अष्टाध्याय्याः अन्तिमं सूत्रं किम्?
८. वैयाकरणसिद्धान्तकौमुद्याः कर्ता कः?
९. लघुसिद्धान्तकौमुद्याः कर्ता कः?
१०. पाणिनीये कति अध्यायाः सन्ति?
११. संस्कृतव्याकरणे उत्सुकेभ्यः छात्रेभ्यः प्रथमतया साहाय्यकः ग्रन्थः कः?

SGOU

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१.सूत्रलक्षणम् किम्?
२. किमर्थं वरदराजः लघुसिद्धान्तकौमुदी प्रणीतवान्?

निर्दिष्टाभ्यासः (Assignments)

१. पाणिनीम् अधिकृत्य लिखत।
२. वरदराजः -उपन्यस्यत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्।
२. व्याकरणम्।
३. महर्षिः यास्कः।
४. पाणिनीयम्।
५. चतुस्सहस्रम्।
६. वृद्धिरादैच्।
७. अ अ।
८. भट्टोजिदीक्षितः।
९. वरदराजः।
१०. अष्टौ।
११. लघुसिद्धान्तकौमुदी।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

SGOU

अधिकवाचनग्रन्थाः(Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५

२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७

३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, २०११

SGOU

Unit-2

माहेश्वरसूत्रादारभ्य मुखनासिकावचनोऽनुनासिकः इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- व्याकरणसंज्ञानां परिचयः।
- स्वरवर्णाना प्रकारभेदान् अवगच्छन्ति।
- माहेश्वरसूत्राणां परिचयः।

प्राग्व्यपेक्षाः (Pre requisites)

इतरभाषास्विव संस्कृतेऽपि अनेके वैयाकरणाचार्याः आसन्। तेषु पाणिनिरेव श्रेष्ठः सर्वैरङ्गीकृतश्च। तस्य काले प्रचुरप्रचारां सूत्रप्रणालीं सः स्वीकृतवान्।

विविधानि सूत्राणि सन्ति। तानि संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारभेदात् षड्विधानि। पाठभागे तानि षड्विधानि सूत्राणि आगमिष्यन्ति तानि पठामः।

मुख्यपदानि (Key words)

माहेश्वरसूत्राणि, इत्, प्रत्याहारः, ह्रस्वदीर्घप्लुतः, उदात्तः, अनुदात्तः, स्वरितः, अनुनासिकः

Discussion

लघुसिद्धान्तकौमुदी।

संज्ञाप्रकरणम्।

प्रथमं निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाचरति वरदराजभट्टाचार्यः।

'नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम्।।'

पदच्छेदः - करोम्यहम् - करोमि + अहम्।

अन्वयः		**अन्वयार्थः**
अहं	-	ग्रन्थकर्ता वरदराजाचार्यः
शुद्धां	-	विशुद्धां, शुद्धस्वरूपां, दोषरहिताम्
गुण्यां	-	शब्दव्युत्पत्तिज्ञानादिगुणैः युक्ताम्
सरस्वतीं	-	भारतीं
देवीं	-	दीप्यमानां प्रशोभमानां दानादिगुणैर्युक्तां
नत्वा	-	नमस्कृत्य
पाणिनीयप्रवेशाय	-	व्याकरणशास्त्रे बालानां बुद्धेः प्रवेशनाय

SGOU

लघुसिद्धान्तकौमुदीं	-	लघुसिद्धान्तकौमुदीं नामिकां
करोमि	-	ग्रन्थरचनां करोमि, निर्वहामि।

सारः - वरदराजाचार्यः इष्टदेवतां वाग्देवतां सरस्वतीं नमस्करोति। इयं सरस्वती शुद्धा, शब्दव्युत्पत्तिज्ञानादिप्रशस्तैः गुणैः युक्ता भवति। तां देवीं नमस्कृत्य पाणिनीये प्रवेष्टुम् इच्छूनां छात्राणां सुकरया प्रवेशनाय लघुसिद्धान्तकौमुदीं नाम ग्रन्थं रचितुमारेभे।

माहेश्वराणि सूत्राणि।

अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्।

इति चतुर्दश माहेश्वरसूत्राणि। महेश्वरात् आगतानि माहेश्वराणि सूत्राणि। माहेश्वरसूत्राणाम् अन्त्ये ण्, क्, ङ्, च् इत्यादयः सन्ति। ते अणादिप्रत्याहारार्थमेव। ते ण्, क्, ङ्, च् प्रभृतयः लुप्यन्ते। ते इतः भवन्ति। 'अइउण्, ऋलृक्, एओङ्, ऐऔच्'इति माहेश्वरसूत्रचतुष्टयेन स्वराक्षराणि सूच्यन्ते। 'हयवरट्, लण्'इत्यादिषु सूत्रेषु अकारः उच्चारणार्थमेव प्रयुज्यते। 'लण्'इति माहेश्वरसूत्रे वर्तमानः अकारः अपि इत् भवति। 'अण्, अक्'इत्यादिषु प्रत्याहारेषु इतां न ग्रहणम्। अर्थात् 'अक्'इत्युच्यते चेत् 'अ इ उ ऋ लृ'इत्येते वर्णाः गृह्यन्ते।

इत्संज्ञाविधायकं सूत्रं किम्?

१. हलन्त्यम्। (१-३-३)

हल् अन्त्यम् इति द्विपदं सूत्रम्। अनेन सूत्रेण इत्संज्ञा विधीयते। उपदेशेऽन्त्यं हल् 'इत्' स्यात्। उपदेशः आद्यानां श्रेष्ठानाम् उच्चारणम्। प्रथममुच्चरितानि माहेश्वरसूत्राणि उपदेशे अन्तर्भवन्ति।

यथा - 'अइउण्'इति माहेश्वरसूत्रे अन्त्यः णकारः। सः हल् (व्यञ्जनवर्णः) भवति। अतः णकारः इत्। एवं माहेश्वरसूत्रेषु अन्ते वर्तमानाः ण्, क्, ङ्, च्, ट् इत्यादयः इतः भवन्ति।

२. अदर्शनम् लोपः।(१-१-६०)

द्विपदं सूत्रम्। अनेन सूत्रेण लोपसंज्ञा विधीयते। प्रसक्तस्य (पूर्वोक्तस्य इतः, विद्यमानस्य इतः वा) अदर्शनं लोपसंज्ञं स्यात्। यथा - हरे इह इत्यत्र अयादेशे हरय् इह। य् इत्यस्य 'लोपः शाकल्यस्य'इति सूत्रेण यकारलोपः। अत्र विद्यमानस्य यकारस्य अदर्शनात् लोपसंज्ञा। 'आदिरन्त्येन सहेता'इत्यादावस्य प्रयोजनम्।

३. तस्य लोपः। (१-३-९)

द्विपदं सूत्रम्। अनेन सूत्रेण लोपः विधीयते। तस्येतो लोपः स्यात्।

यथा - 'अइउण्'इत्यत्र 'ण्'इत्यस्य लोपसंज्ञायां 'तस्य लोपः'इति सूत्रेण लोपः। 'ण्'इत्यारभ्य 'ल्' पर्यन्ताः सूत्रान्त्यवर्णाः अण्-अक्-अच् इति प्रत्याहारार्थाः।

४. आदिरन्त्येन सहेता। (१-७-७१)

आदिः अन्त्येन सह इता इति चतुष्पदं सूत्रम्। अनेन सूत्रेण प्रत्याहारसंज्ञा विधीयते। अन्त्येन इता सहिता आदिः मध्यगानां स्वस्य च संज्ञा स्यात्।

यथा - 'अइउण्'इति माहेश्वरसूत्रे आदिः अकारः। अन्त्यानेता सहितः आदिः अण्। तद् मध्यगयोः 'इ उ'इत्येतयोः स्वस्य आदेः च संज्ञा स्यात्। अर्थात् 'अण्'इत्यनेन 'अ इ उ'इत्येते ग्राह्याः। एवम् अक्, अच्, हल् इत्यादयः।

५. ऊकालोऽज्झ्रस्वदीर्घप्लुतः। (१-१-२७)

ऊकालः अच् ह्रस्वदीर्घप्लुतः इति त्रिपदं सूत्रम्। अनेन सूत्रेण ह्रस्व-दीर्घ-प्लुतसंज्ञः विधीयते। उः च ऊः च ऊ३ः च वः। उ इत्यस्य प्रथमाबहुवचनं वः (यथा - शम्भुः - शम्भू - शम्भवः)। वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्।

अ इ उ - एकमात्रः - ह्रस्वः।
आ ई ऊ - द्विमात्रः - दीर्घः।
अ३ इ३ उ३ - त्रिमात्रः - प्लुतः।

त्रिमात्रसूचिका संख्या ३ उपयुज्यते। प्रयोजनसूत्राणि कानि?

संज्ञाः	-	**प्रयोजनसूत्राणि**
ह्रस्वः	-	ह्रस्वस्य गुणः
दीर्घः	-	अकः सवर्णे दीर्घः
प्लुतः	-	प्लुतप्रगृह्याचि नित्यम्।

ह्रस्वदीर्घप्लुतसंज्ञायां प्रत्येकम् उदात्तः, अनुदात्तः, स्वरितः इति भेदत्रयं वर्तते।

वेदे उदात्त-अनुदात्त-स्वरितानां प्राधान्यमधिकतया वर्तते।

६. उच्चैरुदात्तः। (१-२-२९)

उच्चैः उदात्तः इति द्विपदं सूत्रम्। अनेन सूत्रेण उदात्तसंज्ञा विधीयते। उच्चारणस्थानेषु एकं भवति तालु। ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नोऽच् उदात्तसंज्ञः स्यात्।

यथा - 'आ'इत्यत्र आकारः। 'ये'इत्यत्र एकारश्च। 'तस्यादित उदात्तमर्धह्रस्वम्'इत्यादावस्य प्रयोजनम्।

७. नीचैरनुदात्तः। (१-२-३०)

द्विपदं सूत्रम्। अनेन सूत्रेण अनुदात्तसंज्ञा विधीयते। ताल्वादिषु सभागेषु स्थानेषु अधोभागे निष्पन्नः अच् अनुदात्तसंज्ञः स्यात्।

यथा - 'अर्वाङ्'इत्यत्र अकारः। 'अनुदात्तङित आत्मनेपदम्'इत्यादावस्य प्रयोजनम्।

८. समाहारः स्वरितः। (१-२-३१)

द्विपदं सूत्रम्। अनेन सूत्रेण स्वरितसंज्ञा विधीयते। उदात्तानुदात्तत्वे वर्णधर्मौ समहियेते यस्मिन् सोऽच्

स्वरितसंज्ञः स्यात्।

यथा - 'अग्निमीले'इत्यस्मिन् मन्त्रे मकारोत्तरवर्ती ईकारः स्वरितः। 'स्वरितञितः कर्त्रभिप्राये क्रियाफले'इत्यादौ अस्य प्रयोजनम्।

एवम् अकारादिस्वराणां नव भेदाः।

यथा -

१. उदात्तह्रस्वः।	४. उदात्तदीर्घः।	७. उदात्तप्लुतः।
२. अनुदात्तह्रस्वः।	५. अनुदात्तदीर्घः।	८. अनुदात्तप्लुतः।
३. स्वरितह्रस्वः।	६. स्वरितदीर्घः।	९. स्वरितप्लुतः।

पुनरपि स्वराणाम् अनुनासिकअननुनासिकभेदेन द्वैविध्यम्। किं नाम अनुनासिकः?

९. मुखनासिकावचनोऽनुनासिकः। (१-१-८)

मुखनासिकावचनः अनुनासिकः इति द्विपदं सूत्रम्। अनेन सूत्रेण अनुनासिकसंज्ञा विधीयते। मुखसहिता नासिका मुखनासिका। मुखसहितनासिकयोः उच्चार्यमाणो वर्णो अनुनासिकसंज्ञः स्यात्। अनुनासिकस्य अननुनासिकस्य भेदः उच्चारणेनैव ज्ञातुं शक्यते। अनुनासिकात्परोऽनुस्वारः इत्यादावस्य प्रयोजनम्।

अकारस्य इकारस्य उकारस्य च प्रत्येकम् अष्टादश भेदाः।

यथा -

१. ह्रस्वोदात्तानुनासिकः।	७. दीर्घोदात्तानुनासिकः।	१३. प्लुतोदात्तानुनासिकः।
२. ह्रस्वोदात्ताननुनासिकः।	८.दीर्घोदात्ताननुनासिकः।	१४. प्लुतोदात्ताननुनासिकः।
३. ह्रस्वानुदात्तानुनासिकः।	९. दीर्घानुदात्तानुनासिकः।	१५. प्लुतानुदात्तानुनासिकः।
४. ह्रस्वानुदात्ताननुनासिकः।	१०. दीर्घानुदात्ताननुनासिकः।	१६. प्लुतानुदात्ताननुनासिकः।
५. ह्रस्वस्वरितानुनासिकः।	११. दीर्घस्वरितानुनासिकः।	१७. प्लुतस्वरितानुनासिकः।
६. ह्रस्वस्वरिताननुनासिकः।	१२. दीर्घस्वरिताननुनासिकः।	१८. प्लुतस्वरिताननुनासिकः।

पुनरावृत्तिः (Recap)

- षड्विधानि सूत्राणि।
- चतुर्दश माहेश्वरसूत्राणि।
- हलन्त्यम् इति सूत्रेण इत् संज्ञा।
- अदर्शनम् लोपःइति लोपः संज्ञा।
- आदिरन्त्येन सहेता इति सूत्रेण प्रत्याहारः संज्ञा।
- ऊकालोऽज्ह्रस्वदीर्घप्लुतः इति सूत्रेण ह्रस्वदीर्घप्लुतः।
- उच्चैरुदात्तः इति सूत्रेण उदात्तसंज्ञा।
- नीचैरनुदात्तः इति सूत्रेण अनुदात्तसंज्ञा।
- समाहारः स्वरितः इति सूत्रेण स्वरितसंज्ञा।

SGOU

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१.इत् संज्ञाविधायकं सूत्रं किम्?
२. सूत्राणि कति विधानि?
३. प्रत्याहारविधायकं सूत्रं किम्?
४. मुखनासिकावचनोऽनुनासिकः इति सूत्रेण किं विधीयते?
५. 'अग्निमीले'इत्यस्मिन् मन्त्रे मकारोत्तरवर्ती ईकारः .....।
६. माहेश्वराणि - विग्रहः कः?
७. ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नः अच् कः?
८. ह्रस्वदीर्घप्लुतसंज्ञाविधायकं सूत्रं किम्?
९. हलः इत् केन सूत्रेण विधीयते?
१०. केषां ह्रस्वदीर्घप्लुतसंज्ञाः वर्तन्ते?

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

सूत्रं व्याख्यात-

१. हलन्त्यम्।
२.उच्चैरुदात्तः।

निर्दिष्टाभ्यासः (Assignments)

१. स्वराणां भेदाः के? विशदयत?
२. ऊकालोऽज्ह्रस्वदीर्घप्लुतः, उच्चैरुदात्तः, नीचैरनुदात्तः-सूत्राणि व्याख्याता।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. हलन्त्यम्।
२. षड् विधानि।
३. आदिरन्त्येन सहेता।
४.अनुनासिकसंज्ञा विधीयते।
५. स्वरितः।
६. महेश्वरात् आगतानि माहेश्वराणि।
७. उदात्तः।
८. ऊकालोऽज्ह्रस्वदीर्घप्लुतः।
९. हलन्त्यम् इति सूत्रेण।
१०. स्वराणाम्।

SGOU

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः, लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, २०११

SGOU

Unit-3

तुल्यास्यप्रयत्नं सवर्णम्

उद्देश्यानि (Learning Outcomes)

- सवर्णसंज्ञायाः परिचयः।
- प्रयत्नानां परिचयः।
- वर्णानाम् उच्चारणस्थानाम् अध्ययनानन्तरं शुद्धोच्चारणं कर्तुं शक्नोति।

प्राग्व्यपेक्षाः (Pre requisites)

द्वितिये एकके वर्णानां प्रत्याहाराः , वर्णभेदेन सह कासाञ्चित् संज्ञानाम् अध्ययनं कृतम्। अस्मिन् एकके अकारादि वर्णानाम् उच्चारणस्थानानि, तेषां प्रयत्नान् च पठामः।

मुख्यपदानि (Key words)

सवर्णसंज्ञा, उच्चारणस्थानानि, आभ्यन्तरप्रयत्नाः, बाह्यप्रयत्नाः

Discussion

१. तुल्यास्यप्रयत्नं सवर्णम्। (१-१-९)

द्विपदं सूत्रम्। अनेन सूत्रेण सवर्णसंज्ञा विधीयते। ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च इत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। अकारस्य सवर्णः भवति आकारः। स्थानस्य आभ्यन्तरप्रयत्नस्य च साम्यात्। कण्ठस्थानोच्चारणसाम्यात् विवृताभ्यन्तरप्रयत्नसाम्याच्च। कण्ठं तालु इत्यादीनि स्थानानि। स्पृष्टम् ईषत्स्पृष्टम् इत्यादयः आभ्यन्तरप्रयत्नाः।

ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम्। (वार्तिकम्)

चतुष्पदं वार्तिकमिदम्। ऋकारलृकारौ सवर्णौ इति वक्तव्यम्। ऋकारस्य स्थानं मूर्धा। लृकारस्य स्थानं दन्ताः। किन्तु तयोः सावर्ण्यं वक्तव्यमिति वार्तिककारः कात्यायनः। कात्यायनः कः?

कात्यायनः पाणिनेः समकालिकः इति केचन विद्वांसः। पाणिन्यनन्तरं कात्यायनः जीवितमदाधरयत् इति अन्ये केचन पण्डिताः।

मुनित्रयम्

पाणिनिः - सूत्रकारः

कात्यायनः - वार्तिककारः

पतञ्जलिः - भाष्यकारः

SGOU

सवर्णसंज्ञाकार्ये स्थानानामाभ्यन्तरप्रयत्नानां च कार्यं सूचितम्। स्थानानि कानि? पश्यामः।

स्थानानि		**उच्चार्यमाणाः वर्णाः**
१. कण्ठः	-	अकुहविसर्जनीयानां कण्ठः। अ क ख ग घ ङ ह ः।
२. तालु	-	इचुयशानां तालु। इ च छ ज झ ञ य श।
३. मूर्धा	-	ऋटुरषाणां मूर्धा। ऋ ट ठ ड ढ ण र ष।
४. दन्ताः	-	लृतुलसानां दन्ताः। लृ त थ द ध न ल स।
५. ओष्ठौ	-	उपूपाध्मानीयानामोष्ठौ। उ प फ ब भ म ×प ×फ (उपाध्मानीयौ)
६. नासिका	-	ञमङणनानां नासिका च। ञ म ङ ण न। (वर्गपञ्चमानां तत्तत्स्थानेन सह नासिका अपि तस्य स्थानं भवति। यथा - ङकारस्य स्थाने भवतः कण्ठः नासिका च।)
७. कण्ठतालु	-	एदैतोः कण्ठतालु। ए ऐ।
८. कण्ठोष्ठम्	-	ओदौतोः कण्ठोष्ठम्। ओ औ।
९. दन्तोष्ठम्	-	वकारस्य दन्तोष्ठम्। व।

१०.जिह्वामूलीयस्य जिह्वामूलम्। जिह्वामूलम् - ×क ×ख।

उपाध्मानीयं नाम पफाभ्यां प्रागर्थविसर्गसदृशः वर्णः। यथा ×प × फ।

जिह्वामूलीयं नाम कखाभ्यां प्रागर्थविसर्गसदृशः वर्णः। यथा - ×क ×ख।

नासिका - नासिका अनुस्वारः। अनुस्वारस्य चिह्नम् - ं ।

यत्नः

यत्नः द्विधा - आभ्यन्तरः बाह्यश्च।

आभ्यन्तरप्रयत्नः पञ्चधा। के?

१. स्पृष्टम्	- स्पृष्टं प्रयत्नं स्पर्शानाम् स्पष्टाक्षराणि (वर्गाक्षराणि) २५	-	क ख ग घ ङ (कवर्गः) च छ ज झ ञ (चवर्गः) ट ठ ड ढ ण (टवर्गः) त थ द ध न (तवर्गः) प फ ब भ म (पवर्गः)
२. ईषत्स्पृष्टम्	- ईषत्स्पृष्टमन्तःस्थानाम्	-	य,व,र,ल।
४. ईषद्विवृतम्	- ईषद्विवृतमूष्माणाम्	-	श, ष, स, ह
५. विवृतम्	- विवृतं स्वराणाम्	-	अ इ उ ऋ लृ ए ओ ऐ औ।
६. संवृतम्	- ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् (अ-प्रयोगे)		

प्रक्रियायां संवृताकारः विवृतत्वेन परिणमति।

इदानीं बाह्यप्रयत्नाः कति, कानि इति पठामः। बाह्यप्रयत्नः एकादश। ते विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितः च। विवाराः श्वासाः अघोषाः खरः भवन्ति। हशः संवाराः नादाः घोषश्च। वर्गाणां प्रथमतृतीयपञ्चमाः यणश्च अल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च

SGOU

महाप्राणाः। अचः स्वराः।
(चार्ट्पत्रद्वारा विशदीकरिष्यामः)

बाह्यप्रयत्नविभागाः	प्रत्याहाराः	अन्तर्भूताः वर्णाः
१. विवाराः २. श्वासाः ३. अघोषाः	खर्	ख फ छ ठ थ च ट त क प श ष स।
४. संवाराः ५. नादाः ६. घोषाः	हश्	ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द।
७. अल्पप्राणाः	वर्गाणां प्रथमतृतीयपञ्चमाः यणः च	क ग ङ च ज ञ ट ड ण त द न प ब म य व र ल।
८. महाप्राणाः	वर्गाणां द्वितीयचतुर्थौ शलः च	ख घ छ झ ठ ढ थ ध फ भ श ष स।
९. उदात्तः १०.अनुदात्तः ११. स्वरितः	अच्	अ इ उ ऋ ऌ ए ओ ऐ औ

पुनरावृत्तिः (Recap)

- सवर्णसंज्ञा।
- उच्चारणस्थानानि।
- यत्नः द्विविधः।
- बाह्यः आभ्यन्तरश्च।
- अभ्यन्तरप्रयत्नः पञ्चधा।
- बाह्यप्रयत्नः एकादश।
- विवाराः श्वासाः अघोषाः खरः।
- हशः संवाराः नादाः घोषश्च।
- वर्गाणां प्रथमतृतीयपञ्चमाः यणश्च अल्पप्राणाः।
- वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः।
- अचः स्वराः।

SGOU

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. महाप्राणरूपाःवर्णाः के?
२. श ष स ह - एते .....।
३. 'ञमङणन' - इत्येतेषां स्थानं किम्?
४. कण्ठस्थाने वर्तमानाः वर्णाः के?
५. यण् कस्मिन् बाह्यप्रयत्ने अन्तर्भवति?
६. खरः प्रत्याहारस्य बाह्यप्रयत्नः कः?
७. वकारस्य उच्चारणस्थानं किम्?
८. कयोः वर्णयोः उच्चारणस्थानं कण्ठोष्ठम्?
९. सवर्णसंज्ञा विधीयमानं सूत्रम्?
१०. अनुस्वारस्य उच्चारणस्थानं किम्?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. स्पर्शवर्णाः के?
२. अचः प्रत्याहारे अन्तर्भूताः वर्णाः के?
३. उपध्मानीयौ कौ?

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

१. अभ्यन्तरप्रयत्नसर्वान् भेदान् प्रतिपादयत।
२. तुल्यास्यप्रयत्नं सवर्णं सूत्रं व्याख्यात।

निर्दिष्टाभ्यासः (Assignments)

१. उच्चारणस्थानानि कानि इति विशदयत।
२. कति यत्नः? ते के ? विशदयत।

SGOU

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः।
२. ऊष्माणः।
३. नासिका च। तत्तत्स्थानेन साकं नासिका च।
४. अ क ख ग घ ङ ह : (विसर्गः) च कण्ठेन उच्चार्यते।
५. अन्तस्थाः।
६. विवाराः श्वासाः अघोषाः खरः भवन्ति।
७. वकारस्य उच्चारणस्थानं दन्तोष्ठम्।
८. ओदौतोः कण्ठोष्ठम्। (ओ,औ)।
९. तुल्यास्यप्रयत्नं सवर्णम्।
१०. नासिका।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डां कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-4

अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रादारभ्य सुप्तिङन्तं पदम् इति सूत्रपर्यन्तम्

उद्देश्यानि(Learning Outcomes)

- भाषाध्ययनाय बोधनाय च प्रावीण्यार्जनम्।
- व्याकरणविषये प्राथमिकतत्त्वानां ज्ञानम्।
- व्याकरणसंज्ञानां परिचयः।

प्राग्व्यपेक्षाः(Pre requisites)

पूर्वस्मिन् एकके उच्चारणस्थानानि,यत्नान् च अधिकृत्य अधीतम्।इदानीं अस्मिन् एकके स्वराणां भेदाः, संयोगसंज्ञा, संहितसंज्ञा ,पदं किं इत्यादिविषयान् अधिकृत्य पठामः।

मुख्यपदानि(Key words)

अण्, उदित्, प्रत्ययः, सवर्णसंज्ञा, संहितासंज्ञा, संयोगसंज्ञा, पदसंज्ञा, सुप्प्रत्ययाः, तिङन्तप्रत्ययाः

Discussion

१. अणुदित्सवर्णस्य चाप्रत्ययः। (१-१-६९)

अण् उदित् सवर्णस्य च अप्रत्ययः इति पञ्चपदं सूत्रम्। अनेन सूत्रेणापि सवर्णसंज्ञा विधीयते। अविधीयमानो अण् उदित् च सवर्णस्य संज्ञा स्यात्। 'कर्मण्यण्'इत्यादिभिः सूत्रैः विधीयमानः अण् एव। प्रत्याहारस्थेन अणा व्यवहारः अविधीयमानः अण्। अत्रैव 'अण्' परेण णकारेण। अर्थात् अत्र 'अण्'इत्यनेन लण्पर्यन्ताः वर्णाः गृह्यन्ते। 'अ इ उ ऋ ऌ ए ऐ ओ औ ह य व र ल'इत्येते वर्णाः। उत् इत् यस्य तत् उदित्। 'कु चु टु तु पु' एते उदितः। 'कु'इत्यनेन कवर्गः, क ख ग घ ङ इत्येते वर्णाः गृह्यन्ते। प्रतीयते, विधीयते इति प्रत्ययः।

स्वराणां भेदाः

स्वराः	कति भेदाः	कारणं किम्?
अ, इ, उ	प्रत्येकम् अष्टादशभेदाः	ह्रस्वदीर्घप्लुताः, उदात्तानुदात्तस्वरितभेदात्, अनुनासिकाननुनासिकभेदाच्च।
ऋ	अष्टादशभेदाः	
ऌ	द्वादशभेदाः	दीर्घाभावात्।

SGOU

(ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम्'इति वार्तिकबलात् परस्परं सावर्ण्ये ऋकारस्य लृकारस्य च प्रत्येकं त्रिंशत् भेदाः)		
ए, ओ, ऐ, औ	प्रत्येकं द्वादशभेदाः	ह्रस्वाभावात्

अनुनासिकाननुनासिकभेदेन यवलाः द्विधा।
यथा - य् यँ, व् वँ, ल् लँ इत्येवं रूपेण।

२. परः सन्निकर्षः संहिता। (१-४-१०९)

त्रिपदं सूत्रम्। अनेन सूत्रेण संहितासंज्ञा विधीयते। सन्निकर्षः सामीप्यम्। वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्। संहितायां सन्धिः।

यथा - इति अत्र। अत्र इकारस्य अकारस्य च मिथः नितरां सामीप्यमस्ति। अतः सन्धिः। 'इको यणचि'इत्यादावस्य प्रयोजनम्।

३. हलोऽनन्तराः संयोगः। (१-१-७)

हलः अनन्तराः संयोगः इति त्रिपदं सूत्रम्। अनेन सूत्रेण संयोगसंज्ञा विधीयते। न विद्यते अन्तरं येषां ते अनन्तराः। अज्झिः (स्वराक्षरैः) अव्यवहिताः हलः संयोगसंज्ञाः स्युः।

यथा - 'कण्ठः'इत्यत्र णकारठकारयोः मध्ये अचां व्यवधानं नास्ति। अतः अत्र संयोगः। 'संयोगान्तस्य लोपः'इत्यादावस्य प्रयोजनम्।

४. सुप्तिङन्तं पदम्। (१-४-१४)

द्विपदं सूत्रम्। अनेन सूत्रेण पदसंज्ञा विधीयते। सुबन्तं तिङन्तं च पदसंज्ञं स्यात्। सुप् अन्ते यस्य तत् सुबन्तम्। तिङ् अन्ते यस्य तत् तिङन्तम्। सुप् इत्यनेन एकविंशतिः सुप्प्रत्ययाः ग्राह्याः। तिङ् इत्यनेन अष्टादश तिङ्प्रत्ययाः।

यथा - रामः इति पदम्। रामशब्दात् सुप्प्रत्यये रामः।

भूधातुना साकं तिप्प्रत्यये 'भवति'इति क्रियापदम्। वा पदान्तस्य इत्यादावस्य प्रयोजनम्।

५. सुप्प्रत्ययाः

सु	औ	जस्
अम्	औट्	शस्
टा	भ्याम्	भिस्
ङे	भ्याम्	भ्यस्

६. तिङन्तप्रत्ययाः

परस्मैपदिनः नव प्रत्ययाः।

तिप्	तस्	झि
सिप्	थस्	थ
मिप्	वस्	मस्।

ङसि	भ्याम्	भ्यस्
ङस्	ओस्	आम्
ङि	ओस्	सुप्।

आत्मनेपदिनः नव प्रत्ययाः।

त	आताम्	झ
थास्	आथाम्	ध्वम्
इड्	वहि	महिङ्।

सु इत्यारभ्य प् पर्यन्तं सुप्।
ति इत्यारभ्य ङ् पर्यन्तं तिङ्।

संज्ञाप्रकरणं समाप्तम्।

अस्य खण्डस्य संक्षिप्तीकरणम् अधो दीयते।

संज्ञाः	सूत्राणि	उदाहरणम्	उदाहरणसूत्रम्
१. इत्	हलन्त्यम्	ण्,क्,ङ्,च् इत्यादयः	तस्य लोपः
२. लोपः	अदर्शनं लोपः	'हरय् इत्यत्र' यकारस्य लोपः	लोपः शाकल्यस्य
३. प्रत्याहारः	आदिरन्त्येन सहेता	अक्,अच्,हल् इत्यादयः	इको यणचि
४. ह्रस्वः	ऊकालोऽज्झस्वदीर्घप्लुतः	अ ह्रस्वः, इ ह्रस्वः	ह्रस्वस्य गुणः
५. दीर्घः	ऊकालोऽज्झस्वदीर्घप्लुतः	आ, ई, ऊ	अकःसवर्णे दीर्घः
६. प्लुतः	ऊकालोऽज्झस्वदीर्घप्लुतः	अ३, इ३, उ३	प्लुतप्रगृह्याचि नित्यम्
७. उदात्तः	उच्चैरुदात्तः	आ, ये	तस्यादित उदात्तमर्धह्रस्वम्
८. अनुदात्तः	नीचैरनुदात्तः	अवाङ् इत्यत्र अकारः	अनुदात्तङित आत्मनेपदम्
९. स्वरितः	समाहारः स्वरितः	'अग्निमीले' इत्यत्र मकारात्परः ईकारः	स्वरितञितः कर्त्रभिप्राये क्रियाफले
१०. अनुनासिकः	मुखनासिकावचनोऽनुनासिकः	उच्चारणेनैव अनुनासिक-अननुनासिक भेदः ज्ञातुं शक्यते	अनुनासिकात्परोऽनुस्वारः
११. सवर्णम्	तुल्यास्यप्रयत्नं सवर्णम्	अकारस्य सवर्णः भवति आकारः	अकः सवर्णे दीर्घः
१२. संहिता	परः सन्निकर्षः संहिता	'इति उवाच' अत्र इत्यत्र इकारस्य उकारस्य च संहितात्वम्	इको यणचि
१३. संयोगः	हलोऽनन्तराः संयोगः	'कण्ठः'इत्यत्र णठयोः मध्ये संयोगः वर्तते	संयोगान्तस्य लोपः
१४. पदम्	सुप्तिङन्तं पदम्	रामः, भवति	वा पदान्तस्य

SGOU

पुनरावृत्तिः (Recap)

- अ, इ, उ प्रत्येकम् अष्टादशभेदाः।
- ऋ इत्यस्य अष्टादशभेदाः।
- ऌ इत्यस्य द्वादशभेदाः।
- ए, ओ, ऐ, औप्रत्येकं द्वादशभेदाः।
- परः सन्निकर्षः संहिता इति सूत्रेण संहितासंज्ञा।
- हलोऽनन्तराः संयोगःइति सूत्रेण संयोगसंज्ञा।
- सुप्तिङन्तं पदम् इति सूत्रेण पदं संज्ञा।
- सुप् इत्यनेन एकविंशतिः सुप्प्रत्ययाः।
- तिङ् इत्यनेन अष्टादश तिङ्प्रत्ययाः।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. सुबन्तं तिङन्तं च ..... स्यात्।
२. कति व्यञ्जनाक्षराणि?
३. अव्यवहिताः हलः का संज्ञा?
४. केन सूत्रेण पदंसंज्ञा विधीयते?
५. कति सुप्प्रत्ययाः?
६. तिङ् प्रत्ययाः ..... सन्ति।
७. परः सन्निकर्षः संहिता इति सूत्रेण किं विधीयते?
८. उदित् इत्यस्य कोऽर्थः?
९. ऋवर्णस्य कति भेदाः सन्ति?
१०. संयोगसंज्ञा केन सूत्रेण विधीयते?

एकैकया खण्डिकया उत्तराणि लिखत
(Answer the following questions in a paragraph)

सूत्राणि व्याख्यात

१. परः सन्निकर्षः संहिता।
२. हलोऽनन्तराः संयोगः।

निर्दिष्टाभ्यासः (Assignments)

१. अणुदित्सवर्णस्य चाप्रत्ययः - सूत्रं व्याख्यात।
२. सुप्तिङन्तं पदं - सूत्रं व्याख्यात।

SGOU

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. पदम्।
२. त्रयस्त्रिंशत्। (३३)
३. संयोगसंज्ञा।
४. सुप्तिङन्तं पदम्।
५. एकविंशतिः।
६. अष्टादश।
७. संहितासंज्ञा।
८. उत् इत् यस्य तत् उदित्।
९. अष्टादशभेदाः।
१०. हलोऽनन्तराः संयोगः।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः, लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डां कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

BLOCK -2

लघुसिद्धान्तकौमुदी-
अच्सन्धिप्रकरणं-
विस्तरेण अध्ययनम्

SCOU

Unit-1

इको यणचि इति सूत्रादारभ्य वान्तो यि प्रत्यये इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- सन्धिकार्याणां प्रक्रियावगमनम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- भाषायाः स्वरूपं संरक्षति।
- यण्सन्धिम् अवयवसन्धिं सुष्ठु जानाति भाषायां प्रयुङ्क्ते च।

प्राग्व्यपेक्षाः (Prerequisites)

सन्धयः सामान्यतया पञ्चधा विभक्ताः वर्तन्ते।
अच्सन्धिः (स्वरसन्धिः), प्रकृतिभावसन्धिः, हल्सन्धिः (व्यञ्जनसन्धिः), विसर्गसन्धिः, स्वादिसन्धिः चेति।
अत्र बोधनसौकर्यार्थं त्रिविधा सन्धयः। अयं हि विभागः पाणिनीयनियमानुगुणमिति अवगन्तव्यम्।

स्वरेण सह स्वरस्य मेलनमेव स्वरसन्धिः इत्युच्यते। अर्थात् केनचित् स्वरेण सह कस्यचित् स्वरस्य मेलनेन यः विकारः जायते, तद्विकारप्रक्रियाविशेषः स्वरसन्धिनाम्ना अभिज्ञायते। अथवा स्वरस्य स्थाने आदेशः स्वरसन्धिः इति च उच्यते।

संस्कृतभाषायां सन्धिज्ञानं विना गद्यपद्यादीनाम् अध्ययनं दुष्करम्। पदविच्छेदं विना गद्यपद्यादीनां पठनं, ग्रन्थानां च अध्ययनं क्लेशावहम्। ऋते सन्धिज्ञानात् पदच्छेदः न सुशक्यः। सन्धिं विना संस्कृतभाषायां वाक्यनिर्माणं सुन्दरं प्रौढं च न भवति। श्लोकादिषु अपि सन्धिः अनिवार्यः एव। अतः इदानीं यण्, द्वित्वं, जश्त्वं, लोपप्रतिषेधादीन् पठामः।

मुख्यपदानि (Key words)

यण्, द्वित्वं, जश्त्वं, लोपप्रतिषेधः, अयवायावः, अवावौ

Discussion

१. इको यणचि। (६-१-७७)

इकः यण् अचि इति त्रिपदं सूत्रम्। अनेन सूत्रेण यणादेशः विधीयते। इकः स्थाने यण् स्यात् अचि संहितायां विषये। अर्थात् इ, ई, उ, ऊ, ऋ, ॠ, ऌ इत्येतेषां वर्णानामनन्तरं यदि असवर्णस्वराःवर्तन्ते तर्हि क्रमशः'इ, ई'इत्यनयोः स्थाने यकारः, 'उ, ऊ'इत्यनयोः स्थाने वकारः, 'ऋ, ॠ'इत्यनयोः स्थाने रेफः, ऌकारस्य स्थाने लकारश्च आदेशाः भवन्ति।

SGOU

उदा - **सुध्युपास्यः**। सुधी + उपास्यः इत्यत्र ईकारस्य यणादेशः यकार एव। सुध् य् उपास्यः सुध्युपास्यः।

२. तस्मिन्निति निर्दिष्टे पूर्वस्य। (१-१-६६)

तस्मिन् इति निर्दिष्टे पूर्वस्य इति चतुष्पदं सूत्रम्। सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य स्थाने स्यात् इति सूचयति। सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्।

यथा - 'इको यणचि'इति सूत्रे अचि इति सप्तमी। अतः यण् कार्यं सुधी उपास्यः इत्यत्र पूर्वस्य ईकारस्य स्थाने स्यात्।

३. स्थानेऽन्तरतमः। (१-१-५०)

स्थाने अन्तरतमः इति पदच्छेदः। प्रसङ्गे सति सदृश्यतम आदेशः स्यात्।

यथा - इति अत्र इत्यत्र 'इको यणचि'इति यण्। इकारस्य स्थाने 'स्थानेऽन्तरतमः'इति सूत्रेण सदृशतमे यकारे इत् य् अत्र, इत्यत्र इति रूपम्।

यत्र अनेकविधं आन्तर्यं तत्र स्थानतः आन्तर्यं बलीयः। आन्तर्यम् इत्यस्य सादृश्यम् इत्यर्थः।

४. अनचि च। (८-४-४७)

अनचि च इति पदच्छेदः। अनेन सूत्रेण विकल्पेन यरः द्वित्वं विधीयते। अचः परस्य यरो द्वे वा स्तः, न त्वचि।

यथा - सुधी उपास्यः इत्यत्र 'इको यणचि'इति यणि सुध् य् उपास्यः। अत्र 'अनचि च'इति सूत्रेण धकारस्य द्वित्वे सुध् ध् य् उपास्यः।

५. झलां जश् झशि। (८-४-५३)

त्रिपदं सूत्रम्। अनेन सूत्रेण जश्त्वं विधीयते। झलां स्थाने जश् स्यात् झशि परे।

यथा - सुध् ध् य् उपास्यः इत्यत्र 'झलां जश् झशि'इति सूत्रेण जश्त्वे सुद् ध् य् उपास्यः, सुद्ध्युपास्यः।

६. संयोगान्तस्य लोपः। (८-२-२३)

संयोगान्तस्य लोपः इति द्विपदं सूत्रम्। अनेन सूत्रेण संयोगान्तस्य यणः लोपः विधीयते। संयोगे अन्ते यस्य तत् संयोगान्तं, तस्य संयोगान्तस्य। पदस्य इति पदम् अत्र अनुवर्तते।

सुद् ध् य् इत्यवस्थायां अनेन सूत्रेण यकारस्य लोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः'इति वार्तिकेन तस्य प्रतिषेधे सुद् ध् य् उपास्यः सुद्ध्युपास्यः इति रूपम्।

७. अलोऽन्त्यस्य। (१-१-५२)

अलः अन्त्यस्य इति द्विपदं सूत्रम्। षष्ठीनिर्दिष्टः चेत् अल् अन्त्यस्य एव स्यात्। षष्ठीनिर्दिष्टो अन्त्य अलादेशः स्यात्।

यथा - 'संयोगान्तस्य लोपः'इति सूत्रे संयोगान्तस्य इति षष्ठी। अतः अयं लोपः अन्त्यस्य अलः स्थाने स्यात्।

SGOU

यणः प्रतिषेधो वाच्यम्।(वार्तिकम्)

त्रिपदं वार्तिकम्। अनेन वार्तिकेन यणः लोपप्रतिषेधः विधीयते। यथा - सुद् ध् य् उपास्यः इत्यत्र यणः 'संयोगान्तस्य लोपः'इति सूत्रेण विधीयमानः लोपः,'यणः प्रतिषेधो वाच्यः'इति वार्तिकेन निषिध्यते। सुद् ध् य् उपास्यः इति रूपम्।

सन्धत्त -सुधी उपास्यः - सुद्ध्युपास्यः,सुध्युपास्यः वा।

सुधी उपास्यः इति स्थिते 'इको यणचि'इति सूत्रेण ईकारस्य यणादेशे स्थानसाम्यात् यकारे सुध् य् उपास्यः। 'अनचि च'इति सूत्रेण धकारस्य विकल्पेन द्वित्वे सुध् ध् य् उपास्यः इति। अत्र 'झलां जश् झशि'इति सूत्रेण पूर्वधकारस्य जश्त्वे दकारे सुद् ध् य् उपास्यः इति। 'संयोगान्तस्य लोपः'इति सूत्रेण यकारस्य लोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः'इति वार्तिकेन तस्य निषेधे सुद्ध्युपास्यः इति रूपम्। द्वित्वाभावपक्षे सुध्युपास्यः इति रूपम्।

एवं मद्ध्वरिः,धात्त्रंशः

लाकृतिः।

लृ + आकृतिः इति स्थिते 'इको यणचि'इति सूत्रेण लृकारस्य स्थाने लकारे ल् आकृतिः। संयोगे लाकृतिः इति रूपम्।

८. एचोऽयवायावः। (६-७-७८)

एचः अयवायावः इति द्विपदं सूत्रम्। अनेन सूत्रेण अयवायावः विधीयन्ते। एचः क्रमात् अय्, अव्, आय्, आव् एते स्युरचि। 'ए,ऐ,ओ,औ'इत्येतेभ्यः वर्णेभ्यः स्वरे परे एकारस्य स्थाने अय्, ऐकारस्य स्थाने आय्, ओकारस्य स्थाने अव्, औकारस्य स्थाने आव् च आदेशाः भवन्ति।

यथा - **हरये**। हरे+ ए इत्यत्र 'एचोऽयवायावः'इति सूत्रेण अयादेशे हर् अय् ए - हरये इति रूपम्।

९. यथासंख्यमनुदेशः समानाम्। (१-३-१०)

यथासंख्यम् अनुदेशः समानाम् इति त्रिपदं सूत्रम्। संख्याम् अनतिक्रम्य यथासंख्यम्। अनुदेशः विधिः। समशब्दः तुल्यार्थकः। समानामिति सम्बम्धसामान्ये षष्ठी। समसम्बन्धी विधिः यथासंख्यं स्यात्। यत्र स्थान्यादेशयोः संख्या तुल्या तत्र प्रथमस्य प्रथमः, द्वितीयस्य द्वितीयः इत्यादिक्रमेण प्रवर्तते इत्यर्थः।

यथा - 'एचोऽयवायावः'इति सूत्रेण एचः (ए ओ ऐ औ) अयवायावः आदेशाः विधीयन्ते। तत्र एचः अयादीनां च संख्या तुल्या इति एकारस्य अय्, ओकारस्य अव् इति क्रमेण आदेशाः भवन्ति।

यथा - **विष्णवे**।विष्णो +ए इति स्थिते 'एचोऽयवायावः', 'यथासंख्यमनुदेशःसमानाम्'इति सूत्रद्वयसाहाय्येन ओकारस्य अवादेशे विष्णवे इति रूपम्।

SGOU

एवं - नै +अकः - नायकः। पौ +अकः - **पावकः**।

नायकः - नै + अकः इत्यत्र 'एचोऽयवायावः'इति सूत्रेण आयादेशे न् आय् अकः - नायकः इति रूपम्।

१०.वान्तो यि प्रत्यये। (६-१-७९)

वान्तः यि प्रत्यये इति त्रिपदं सूत्रम्। अनेन सूत्रेण अवावौ विधीयेते। यकारादौ प्रत्यये परे ओदौतोः अव् आव् एतौ स्तः।

यथा - **गव्यम्**। गो + यम् इति स्थिते 'वान्तो यि प्रत्यये'इति सूत्रेण ओकारस्य अव् आदेशे ग् अव् यम् गव्यम् इति रूपम्।

नाव्यम् - नौ + यम् इति स्थिते 'वान्तो यि प्रत्यये'इति सूत्रेण औकारस्य आव् आदेशे न् आव् यम् नाव्यम् इति रूपम्।

अध्वपरिमाणे च। (वार्तिकम्)

द्विपदं वार्तिकम्। अनेन वार्तिकेन अवादेशः विधीयते। अध्ववाचि परिमाणवाचि च यूतिशब्दे परे वान्तादेशः स्यात्।

यथा -**गव्यूतिः**। गो +यूतिः इत्यत्र 'अध्वपरिमाणे च'इति सूत्रेण अवादेशे ग् अव् यूतिः, गव्यूतिः इति रूपम्।

पुनरावृत्तिः (Recap)

- इको यणचि इति सूत्रेण यण् विधीयते।
- सप्तमीनिर्देशेन विधीयमानं कार्यं पूर्वस्य स्थाने स्यात्।
- अनचि च इति सूत्रेण पाक्षिकेण द्वित्वम्।
- अलोऽन्त्यस्य इति सूत्रेण षष्ठीनिर्दिष्टो अन्त्य अलादेशः स्यात्।
- झलां जश् झशि इति सूत्रेण जश्त्वम्।
- संयोगान्तस्य लोपः इति सूत्रेण यणः लोपः।
- यणः प्रतिषेधो वाच्यः इति वार्तिकेन यण् लोपस्य प्रतिषेधः।
- एचोऽयवायावः इति सूत्रेण अयवायावः विधीयन्ते।
- वान्तो यि प्रत्यये इति सूत्रेण अवावौ विधीयेते।
- अध्वपरिमाणे च इति वार्तिकेन यूतिशब्दे परे अवादेशः।

SGOU

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. गो + यम् इत्यस्य सन्धत्तं पदं किम्?
२. इकः इत्यत्र वर्तमानाः वर्णाः के?
३. पाक्षिकेण द्वित्वविधायकसूत्रं किम्?
४. हरये इति रूपे अयादेशः केन सूत्रेण विधीयते?
५. केन वार्तिकेन यणः लोपप्रतिषेधः विधीयते?
६. इकोयणचि इति सूत्रे अचि इति पदस्य कोऽर्थः?
७. स्थानेऽन्तरतमः इति सूत्रे अन्तरतमः इति पदस्य कोऽर्थः?
८. सु ध् ध् य् उपास्यः इत्यत्र केन सूत्रेण धकारस्य द्वित्वं भवति?
९. एच् इति प्रत्याहारे कियन्तो वर्णाः सन्ति?
१०. सप्तमीनिर्देशेन विधीयमानं कार्यं .....स्थाने स्यात्।
११. केन वार्तिकेन यूतिशब्दे परे अवादेशः?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. इको यणचि इति सूत्रे अचि इति सप्तमी विभक्तिः किमर्थम्?
२. लाकृतिः पदच्छेदं कृत्वा सप्रमाणं सन्धत्त।

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

सप्रमाणं सम्धत्त

१. हरये
२. सुद्ध्युपास्यः - सुध्युपास्यः
३. नाव्यम्, गव्यम्
४. पावकः, नायकः

निर्दिष्टाभ्यासः (Assignments)

१. अयवायावसन्धिं विशदयत।
२. इकोयणचि इति सूत्रं उदाहरणसहितं व्याख्यात।

SGOU

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. गव्यम्।
२. इ उ ऋ लृ।
३. अनचि च।
४. एचोऽयवायावः।
५. यणः प्रतिषेधो वाच्यम्।
६. स्वरे परे।
७. सदृशतमः।
८. अनचि च।
९. ए, ओ, ऐ, औ।
१०. पूर्वस्य।
११. अध्वपरिमाणे च।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः, लघुसिद्धान्तकौमुदी,बालहितैषिणी व्याख्या प्रोफसर् आर्.वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

४. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डां कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
५. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
६. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-2

अदेङ्गुणः इति सूत्रादारभ्य एङि पररूपम् इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- सन्धिकार्याणां प्रक्रियावगमनम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- धातूनाम् उपसर्गाणां च भेदः जानाति।
- गुणसन्धिं वृद्धिसन्धिं सुष्ठु जानाति भाषायां प्रयुङ्क्ते च।

प्राग्व्यपेक्षाः (Prerequisites)

पूर्वस्मिन् एकके अच्सन्ध्याम् यण्सन्धिः, द्वित्वं, जश्त्वं, लोपप्रतिषेधादीन् अधीतम्। गुणसन्धिं, वृद्धिसन्धिं विना संस्कृतभाषायां वाक्यनिर्माणं कर्तुं न शक्यते। श्लोकादिषु अपि सन्धिः अनिवार्यः एव। अतः अस्मिन् एकके गुणादेशः, रपरत्वं, वृद्धिरेकादेशादीन् पठामः। गुणसंज्ञा-वृद्धिसंज्ञा-उपसर्गसंज्ञा-धातुसंज्ञाः अपि परिचायति।

मुख्यपदानि (Key words)

गुणः, गुणादेशः, रपरत्वं, विकल्पेन लोपः, वृद्धिसंज्ञा, वृद्धिरेकादेशः , उपसर्गः, धातुः,

Discussion

१. अदेङ्गुणः। (१-१-२)

अत् एङ् गुणः इति त्रिपदं सूत्रम्। अनेन सूत्रेण गुणसंज्ञा विधीयते। अत् एङ् च गुणसंज्ञः स्यात्। अ, ए, ओ इत्येते गुणाः। आद्गुणः इत्यादौ अस्य प्रयोजनम्।

२. आद्गुणः। (६-१-६७)

द्विपदं सूत्रम्। अनेन सूत्रेण गुणः एकादेशत्वेन विधीयते। अवर्णादचि परे पूर्वपरयोः एको गुणादेशः स्यात्।

यथा - **उपेन्द्रः**। उप + इन्द्रः इति स्थिते 'आद्गुणः'इति सूत्रेण गुणे एकादेशे उप् ए न्द्रः - उपेन्द्रः इति रूपम्। एवं गङ्गा + उदकम् - **गङ्गोदकम्**।

३. उपदेशेऽजनुनासिक इत्। (१-३-२)

उपदेशे अच् अनुनासिकः इत् इति चतुष्पदं सूत्रम्। अनेन सूत्रेण इत्संज्ञा विधीयते। उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात्।

यथा - राम सु इत्यत्र सकारात्परस्य उकारस्य इत्संज्ञा।

प्रतिज्ञानुनासिक्याः पाणिनीयाः।

प्रति ज्ञायते इति प्रतिज्ञा। प्रतिज्ञा नाम अभ्युपगमनम्। अनुनासिकस्य भावः आनुनासिक्यम्। प्रतिज्ञा आनुनासिक्यं च येषां ते प्रतिज्ञानुनासिक्यः। पाणिनीयमित्यस्य पाणिनीयशिष्याः इत्यर्थः। पाणिनीयशिष्याः शास्त्रकृतं उच्चारणं, अनुनासिक-अननुनासिकभेदं च विविच्य जानन्ति। लण्सूत्रस्थस्य अवर्णेन सह उच्चार्यमाणः रेफः रलयोः संज्ञा।अर्थात् 'र'इति प्रत्याहारे 'र ल'इत्येतौ वर्णौ स्तः।

४. उरण् रपरः। (१-१-५१)

उः अण् रपरः इति त्रिपदं सूत्रम्। अनेन सूत्रेण रपरत्वं विधीयते। ऋकारस्य स्थाने विधीयमानः अण् रपरः सन्नेव प्रवर्तते।

यथा -**कृष्णर्द्धिः**।कृष्ण ऋद्धिः इत्यत्र 'आद्गुणः'इति सूत्रेण गुणः, अकारस्य ऋकरस्य च स्थाने एकादेशत्वेन स्यात्। ऋकारस्य स्थाने इत्यतः 'उरण् रपरः'इति सूत्रेण रपरत्वे कृष्ण् अर् द्धिः - कृष्णर्द्धिः इति रूपम्।

एवं तव लृकारः इत्यत्र 'आद्गुणः'इति सूत्रेण गुणे 'उरण् रपरः'इति रपरत्वे (र इति प्रत्याहारे रलौ वर्तेते) तव् अल् कारः - **तवल्कारः** इति रूपम्।

५. लोपः शाकल्यस्य। (८-३-१९)

द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन लोपः विधीयते। अवर्णपूर्वयोः पदान्तयोः यवयोः लोपो वा अशि परे।

यथा - **हर इह, हरयिह**। हरे + इह इत्यत्र 'एचोऽयवायावः'इति सूत्रेण अयादेशे हरय् इह। अत्र 'लोपः शाकल्यस्य'इति सूत्रेण विकल्पेन यलोपे हर इह इति रूपम्। लोपाभावपक्षे हरयिह।

६. पूर्वत्रासिद्धम्। (८-२-१)

पूर्वत्र असिद्धम् इति द्विपदं सूत्रम्। अनेन सूत्रेण पूर्वत्रासिद्धत्वं विधीयते। सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्। अष्टाध्यायी द्विधा। सपादसप्ताध्यायी इत्येकः भागः। त्रिपादी इत्यन्यः भागः। सपादसप्ताध्यायीस्थानि सूत्राणि परस्परं जानन्ति। किन्तु तानि सूत्राणि त्रिपादीस्थानि सूत्राणि न जानन्ति। त्रिपाद्यां वर्तमानानि पूर्वसूत्राणि परसूत्राणि न जानन्ति। परं सूत्रं पूर्वं सूत्रकार्यं जानाति। अन्तिमं सूत्रं (अ.अ.) सर्वाणि सूत्राणि जानन्ति। किन्तु तत्सूत्रं किमपि न जानाति।

यथा - **हर इह, हरयिह**। हरे + इह इति स्थिते 'एचोऽयवायावः'इति सूत्रेण अयादेशे हरय् इह। 'लोपः शाकल्यस्य'इति त्रिपादिस्थेन सूत्रेण यकारलोपे हर इह। अत्र 'आद्गुणः'इति गुणः न प्राप्नोति। 'आद्गुणः'इति सूत्रं सपादसप्ताध्याय्यां वर्तते। लोपः शाकल्यस्य तु त्रिपाद्याम्। त्रिपादिस्थस्य सूत्रस्य प्रवर्तनं सपादसप्ताध्यायस्थम् 'आद्गुणः'न जानाति। अतः हर इह इति रूपम्।यलोपाभावपक्षे हरयिह।

विष्ण इह, विष्णविह - विष्णो + इह इति स्थिते 'एचोऽयवायावः'इति सूत्रेण अवादेशे विष्ण् अव् इह। 'लोपः शाकल्यस्य'इति विकल्पेन वकारलोपे विष्ण इह। अत्रापि पूर्वत्रासिद्धत्वात् न गुणसन्धिः। वकारलोपाभावे विष्णविह।

७. वृद्धिरादैच्। (१-१-१)

वृद्धिः आत् ऐच् इति त्रिपदं सूत्रम्। अनेन सूत्रेण वृद्धिसंज्ञा विधीयते। आत् ऐच् च वृद्धिसंज्ञः स्यात्। आ, ऐ, औ इत्येते वृद्धयः। वृद्धिरेचि इत्यादावस्य प्रयोजनम्।

८. वृद्धिरेचि। (६-१-८८)

वृद्धिः एचि इति द्विपदं सूत्रम्। अनेन सूत्रेण वृद्धिरेकादेशत्वेन विधीयते। आदेचि परे वृद्धिरेकादेशः स्यात्।

यथा - **कृष्णैकत्वम्**। कृष्ण + एकत्वम् इति स्थिते 'आद्गुणः'इति गुणं बाधित्वा 'वृद्धिरेचि'इति सूत्रेण पूर्वपरयोः अकार-एकारयोः स्थाने ऐकारे एकादेशे कृष्णैकत्वम् इति रूपम्।

गङ्गौघः - गङ्गा + ओघः इति स्थिते गुणं बाधित्वा 'वृद्धिरेचि'इति सूत्रेण पूर्वपरयोः आकार-ओकारयोः स्थाने वृद्धौ औकारे एकादेशे गङ्गौघः इति रूपम्।

देवैश्वर्यम् - देव + ऐश्वर्यम् इति स्थिते गुणं बाधित्वा 'वृद्धिरेचि'इति सूत्रेण पूर्वपरयोः अकार-ऐकारयोः स्थाने वृद्धौ ऐकारे एकादेशे देवैश्वर्यम् इति रूपम्।

कृष्णौत्कण्ठ्यम्- कृष्ण + औत्कण्ठ्यम् इति स्थिते गुणं बाधित्वा 'वृद्धिरेचि'इति सूत्रेण पूर्वपरयोः अकार-औकारयोः स्थाने वृद्धौ औकारे एकादेशे कृष्णौत्कण्ठ्यम् इति रूपम्।

गुणापवादः - आद्गुणस्य अपवादः भवति वृद्धिरेचि इति सूत्रम्।

९. एत्येधत्यूठ्सु। (६-१-८९)

एकपदं सूत्रम्। अनेन सूत्रेण वृद्धिरेकादेशः विधीयते। अवर्णात् एजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात्।

यथा -**उपैति**। उप + एति इति स्थिते 'एत्येधत्यूठ्सु'इति सूत्रेण पूर्वपरयोः अकार-एकारयोः वृद्धौ ऐकारे एकादेशे उपैति इति रूपम्।

उपैधते - उप+ एधते इति स्थिते 'एत्येधत्यूठ्सु'इति सूत्रेण पूर्वपरयोः अकार-एकारयोः वृद्धौ ऐकारे एकादेशे उपैधते इति रूपम्।

प्रष्ठौहः - प्रष्ठ +ऊहः इत्यत्र 'एत्येधत्यूठ्सु'इति सूत्रेण पूर्वपरयोः अकार-ऊकारयोः वृद्धौ औकारे एकादेशे प्रष्ठौहः इति रूपम्।

एजाद्योः इति किम्?

SGOU

उपेतः-उप + इतः इति स्थिते 'एत्येधत्यूठ्सु'इति सूत्रेण वृद्धिः न। एजादिः न इति कारणात्। इत इति इण् धातुः एजादिः न। अतः वृद्धिं बाधित्वा 'आद्गुणः'इति गुणे उपेतः इति रूपम्। मा भवान् प्रेदिधत् - इत्यत्रापि वृद्धिं बाधित्वा गुणे मा भवान् प्रेदिधत् इति।

अक्षादूहिन्यामुपसंख्यानम्।(वार्तिकम्)

अक्षात् ऊहिन्यामुपसंख्यानम् इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन वृद्धिरेकादेशः विधीयते। अक्षशब्दात् ऊहिनीशब्दे परे वृद्धिरेकादेशः स्यात्।

यथा - **अक्षौहिणी**। अक्ष +ऊहिनी इति स्थिते 'अक्षादूहिन्यामुपसंख्यानम्'इति वार्तिकेन वृद्धौ पूर्वपरयोः औकारे एकादेशे नकारस्य णकारे च अक्षौहिणी इति रूपम्। सेना इत्यर्थः।

प्रादूहोढोढ्येषैष्येषु। (वार्तिकम्)

एकपदं वार्तिकम्। अनेन वार्तिकेन वृद्धिरेकादेशः विधीयते। प्राद् ऊहः, ऊढः, ऊढिः, एषः, एष्यः परेषु वृद्धिरेकादेशः स्यात्।

यथा - **प्रौहः**। प्र +ऊहः इति स्थिते 'प्रादूहोढोढ्येषैष्येषु'इति वार्तिकेन पूर्वपरयोः अकार-ऊकारयोः वृद्धौ औकारे एकादेशे प्रौहः इति रूपम्।

प्रौढः - प्र + ऊढः इति स्थिते 'प्रादूहोढोढ्येषैष्येषु'इति वार्तिकेन पूर्वपरयोः अकार-ऊकारयोः वृद्धौ औकारे एकादेशे प्रौढः इति रूपम्।

प्रौढिः - प्र +ऊढिः इति स्थिते 'प्रादूहोढोढ्येषैष्येषु'इति वार्तिकेन पूर्वपरयोः अकार-ऊकारयोः वृद्धौ औकारे एकादेशे प्रौढिः इति रूपम्।

प्रैषः - प्र+ एषः इति स्थिते 'प्रादूहोढोढ्येषैष्येषु'इति वार्तिकेन पूर्वपरयोः अकार-एकारयोः वृद्धौ ऐकारे एकादेशे प्रैषः इति रूपम्।

प्रैष्यः - प्र + एष्यः इति स्थिते 'प्रादूहोढोढ्येषैष्येषु'इति वार्तिकेन पूर्वपरयोः अकार-एकारयोः वृद्धौ ऐकारे एकादेशे प्रैष्यः इति रूपम्।

ऋते च तृतीयासमासे। (वार्तिकम्)

त्रिपदं वार्तिकम्। अनेन वार्तिकेन वृद्धिरेकादेशः विधीयते। तृतीयासमासे ऋतशब्दे परे वृद्धिरेकादेशः स्यात्।

यथा - सुखेन ऋतः **सुखार्तः** - सुख + ऋतः इति स्थिते 'आद्गुणः'इति गुणं बाधयित्वा 'ऋते च तृतीयासमासे'इति वार्तिकेन अकारस्य ऋकारस्य च स्थाने वृद्धौ आकार एकादेशः। स च 'उरण् रपरः'इति सूत्रेण रपरत्वे च सुख् आर् तः, सुखार्तः इति।

तृतीयेति किम्?

परमर्तः - परम + ऋतः इति स्थिते तृतीयासमसाभावात् 'ऋते च तृतीयासमासे'इति वार्तिकेन वृद्धेरभावात् 'आद्गुणः'इति सूत्रेण गुणे 'उरण् रपरः'इति रपरत्वे च परम् अर् तः, परमर्तः।

SGOU

प्रवत्सतरकम्बलवसनार्णदशानामृणे। (वार्तिकम्)

प्रवत्सतरकम्बलवसनार्णदशानाम् ऋणे इति द्विपदं वार्तिकम्। अनेन वार्तिकेन वृद्धिरेकादेशः विधीयते। प्र-वत्सतर-कम्बल-वसन-ऋण-दशशब्देभ्यः ऋणशब्दे परे वृद्धिरेकादेशः स्यात्।

यथा - **प्रार्णम्**। प्र +ऋणम् इति स्थिते 'प्रवत्सतरकम्बलवसनार्णदशानामृणे'इति वार्तिकेन पूर्वपरयोः अकार-ऋकारयोः वृद्धौ आकार एकादेशः। स च 'उरण् रपरः'इति सूत्रेण रपरत्वे प्र् आर् णम् - प्रार्णम्।

वत्सतरार्णम् - वत्सतर +ऋणम् इति स्थिते 'प्रवत्सतरकम्बलवसनार्णदशानामृणे'इति वार्तिकेन पूर्वपरयोः अकार-ऋकारयोः वृद्धौ आकार एकादेशः। स च 'उरण् रपरः'इति सूत्रेण रपरत्वे वत्सतर् आर् ऋणम् - वत्सतरार्णम्।

एवं कम्बल + ऋणम् - **कम्बलार्णम्**।
वसन + ऋणम् - **वसनार्णम्**।
ऋण + ऋणम् - **ऋणार्णम्**।
दश+ ऋणम् —**दशार्णम्।**

१०. उपसर्गाः क्रियायोगे। (१-४-५९)

उपसर्गाः क्रियायोगे इति द्विपदं सूत्रम्। अनेन सूत्रेण उपसर्गसंज्ञः विधीयते। प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप एते प्रादयः।

यथा - गच्छति इति क्रिया। निर् इति प्रादिः। निर्गच्छति इत्यत्र वर्तमानस्य निरः उपसर्गसंज्ञः लभते।

११. भूवादयो धातवः। (१-३-१)

भूवादयः धातवः इति द्विपदं सूत्रम्। अनेन सूत्रेण धातुसंज्ञा विधीयते। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। भुवौ आदिः येषां ते भूवादयः इति विग्रहः। आदिशब्दः प्रभृत्यर्थकः। स च भू इत्यत्र अन्वेति, भ्वादिरिति, भूप्रभृतयः इत्यर्थः। भूप्रभृतयो वा सदृशश्च धातुसंज्ञाः स्युः इत्यर्थः। सादृश्यश्च क्रियावचकत्वेन। तथा च क्रियावाचिनो धातुसंज्ञाः स्युः इति सूत्रार्थः। 'भू सत्तायाम्'इत्यस्य अनेन धातुसंज्ञा।

१२. उपसर्गादृति धातौ। (६-१-९१)

उपसर्गात् ऋति धातौ इति त्रिपदं सूत्रम्। अनेन सूत्रेण वृद्धिरेकादेशः विधीयते। अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यादिति सूत्रार्थः।

यथा -**प्रार्च्छति**। प्र +ऋच्छति इति स्थिते 'उपसर्गादृति धातौ'इत्यनेन पूर्वपरयोः स्थाने अकार-ऋकारयोः वृद्धौ 'उरण्परः'इति रपरत्वे कृते प्र् आर् च्छति प्रार्च्छति इति रूपम्।

१३. एङि पररूपम्। (६-१-९४)

एङि पररूपम् इति पदच्छेदः। 'उपसर्गादृति धातौ'इति सूत्रात् उपसर्गात्, इति, धातौ च अनुवर्तते। एङ् प्रत्याहारः। एकार ओकारश्च गृह्यते। अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पररूपम् एकादेशः स्यात् इति सूत्रार्थः।

यथा - **प्रेजते**। प्र + एजते इति स्थिते 'प्र'इति अवर्णान्तात् उपसर्गात् एज्धातौ परे 'एङि पररूपम्'इति सूत्रेण अकार-एकारयोः पररूपे एकादेशे प्रेजते इति रूपम्।

उपोषति -उप +ओषति इति स्थिते 'उप'इति अवर्णान्तात् उपसर्गात् 'एङि पररूपम्'इति सूत्रेण अकार-ओकारयोः पररूपे एकादेशे उपोषति इति रूपम्।

पुनरावृत्तिः (Recap)

- अदेङ्गुणः इति सूत्रेण गुणसंज्ञा।
- आद्गुणः इति सूत्रेण गुणादेशः।
- उरण् रपरः इति सूत्रेण रपरत्वं विधीयते।
- लोपः शाकल्यस्य इति सूत्रेण विकल्पेन लोपः विधीयते।
- पूर्वत्रासिद्धम् इति सूत्रेण पूर्वत्र असिद्धत्वं विधीयते।
- वृद्धिरादैच् इति सूत्रेण वृद्धिसंज्ञा विधीयते।
- वृद्धिरेचि इति सूत्रेण वृद्धिरेकादेशः विधीयते।
- एत्येधत्यूठ्सु एजाद्योः इति सूत्रेण एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः।
- अक्षादूहिन्यामुपसंख्यानम् इति वार्तिकेन अक्षशब्दात् ऊहिनीशब्दे परे वृद्धिरेकादेशः।
- प्रादूहोढोढ्येषैष्येषु इति वार्तिकेन प्राद् ऊहः, ऊढः, ऊढिः, एषः, एष्यः परेषु वृद्धिरेकादेशः।
- ऋते च तृतीयासमासे इति वार्तिकेन ऋतशब्दे परे वृद्धिरेकादेशः।
- प्र-वत्सतर-कम्बल-वसन-ऋण-दशशब्देभ्यः ऋणशब्दे परे वृद्धिरेकादेशः।
- उपसर्गाः क्रियायोगे इति सूत्रेण उपसर्गसंज्ञः विधीयते।
- भूवादयो धातवः इति सूत्रेण धातुसंज्ञा विधीयते।
- उपसर्गादृति धातौ इति सूत्रेण अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः।
- एङि पररूपम् इति सूत्रेण अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पररूपम् एकादेशः।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. वृद्धिसंज्ञाविधायकं सूत्रम् किम्?
२. प्रादीनां क्रियायोगे का संज्ञा लभते?
३. गङ्गा +उदकम् इत्यत्र कः सन्धिः?
४. अ, ए, ओ इति वर्णानां का संज्ञा?
५. धातुसंज्ञा केन सूत्रेण विधीयते?
६. गङ्गा + ओघः इति जाते वृद्धिरेकादेशः केन सूत्रेण विधीयते?

SGOU

७. अक्षौहिणी इत्युदाहरणं कस्य वार्तिकस्य?
८. पूर्वत्रासिद्धत्वं केन सूत्रेण विधीयते?
९. ऋतशब्दे परे ऋते च तृतीयासमासे इति वार्तिकेन कः आदेशः विधीयते?
१०. उपसर्गाः कति?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. उपेतः इत्यत्र न वृद्धिः। कारणं किम्?
२. एङः पदान्तादति इति सूत्रस्य लघुव्याख्यानं कुरुत।

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

१. एत्येधत्यूठ्सु उदाहरणसहितं व्याख्यात।
२. पूर्वत्रासिद्धम् इति सूत्रं व्याख्यात।

निर्दिष्टाभ्यासः (Assignments)

१. वृद्धिसन्धिं विशदयत।
२. गुणसन्धिं विशदयत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. वृद्धिरादैच्।
२. उपसर्गः।
३. गुणः सन्धिः।
४. गुणसंज्ञा।
५. भूवादयो धातवः।
६. वृद्धिरेचि।
७. अक्षादूहिन्यामुपसंख्यानम् इति वार्तिकेन।
८.पूर्वत्रासिद्धम्।
९.वृद्धिरेकादेशः।
१०. द्वाविंशतिः।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५

SGOU

२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डां कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान्, वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-3

अचोऽन्त्यादि टि इति सूत्रादारभ्य अदसो मात् इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- सन्धिकार्याणां प्रक्रियावगमनम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- सवर्णदीर्घसन्धिं पूर्वरुपसन्धिं प्रकृतिभावसन्धिं च जानाति।

प्राग्व्यपेक्षाः (Prerequisites)

द्वितीये एकके अच्सन्ध्यांगुणादेशः, रपरत्वं, वृद्धिरेकादेशसन्धीन् पठितवन्तः। अधुना सवर्णदीर्घ-पूर्वरूप-प्रकृतिभावसन्धीन् पठामः। टिसंज्ञा, प्रकृतिभावसंज्ञा, प्लुतसंज्ञा, प्रगृह्यसंज्ञादिसंबद्धानाम् उदाहरणानि सप्रमाणं पठामः।

मुख्यपदानि (Key words)

टिसंज्ञा, टेः पररूपं. पररूपमेकादेशः, सवर्णदीर्घः, प्रकृतिभावः, प्लुतः, प्रगृह्यम्,

Discussion

१. अचोऽन्त्यादि टि। (१-१-६४)

अचः अन्त्यादि टि इति त्रिपदं सूत्रम्। अनेन सूत्रेण टिसंज्ञा विधीयते। अचः इति षष्ठी। अचां मध्ये इत्यर्थः। अन्त्यः आदिः यस्य तत् अन्त्यादि इति विग्रहः। अचां मध्ये यो अन्त्यः स आदिः यस्य तत् टि संज्ञं स्यात्। 'हरिस्'इत्यत्र इस् टि भवति।

शकन्ध्वादिषु पररूपं वाच्यम्। (वार्तिकम्)

शकन्धुः इत्यादि रूपसिद्ध्यर्थं टेः पररूपं स्यात्।

यथा -**शकन्धुः**। शक + अन्धुः इति स्थिते 'अकः सवर्णे दीर्घः'इति सूत्रेण दीर्घे प्राप्ते तं प्रबाध्य 'शकन्ध्वादिषु पररूपं वाच्यम्'इति वार्तिकेन शक इत्यस्य टेः अकारस्य स्थाने पररूपे शक् अन्धुः - शकन्धुः इति रूपम्।

कर्कन्धुः - कर्क + अन्धुः इति स्थिते 'अकः सवर्णे दीर्घः'इति सूत्रेण दीर्घे प्राप्ते तं प्रबाध्य 'शकन्ध्वादिषु पररूपं वाच्यम्'इति वार्तिकेन कर्क इत्यस्य टेः स्थाने पररूपे कर्क् अन्धुः - कर्कन्धुः इति रूपम्।

मनीषा- मनस् +ईषा इत्यत्र 'शकन्ध्वादिषु पररूपं वाच्यम्'इति वार्तिकेन टेः असः पररूपे मन् ईषा मनीषा इति रूपम्।

SGOU

शकन्ध्वादि गणः आकृतिगणः,मार्त्तण्डः इति पदमपि आकृतिगणे योजितव्यम्।

मार्त्तण्डः - मार्त्त + अण्डः इति स्थिते 'अकः सवर्णे दीर्घः'इति सूत्रेण सवर्णदीर्घे प्राप्ते तं बाधित्वा पररूपे अकारे मार्त्तण्डः इति रूपम्।

२. ओमाङोश्च। (६-१-९५)

ओमाङोः च इति द्विपदं सूत्रम्। ओम् च आङ् च ओमाङौ, तयोः ओमाङोः। ओमाङोः परयोः (ओमि आङि च परे) इत्यर्थः। 'आद्गुणः'इति सूत्रात् आदिति, 'एङि पररूप'मिति सूत्रात् पररूपमिति च अनुवर्तते। अवर्णात् ओमि आङि च परे पररूपमेकादेशः स्यात्।

उदा - **शिवायों (नमः)**। शिवाय +ओम् (नमः) इति स्थिते 'ओमाङोश्च'इति सूत्रेण अकारस्य ओकारस्य च स्थाने पररूपे शिवायों (नमः) इति रूपम्।

शिवेहि- शिव आ इहि इति स्थिते आ इहि इति भागे 'आद्गुणः'इति सूत्रेण गुणे एकारे एकादेशे शिव एहि। अत्र ओमाङोश्च इति सूत्रेण पररूपे शिवेहि इति रूपम्।

३. अन्तादिवच्च। (६-१-८५)

अन्तादिवत् च इति द्विपदं सूत्रम्। अन्तश्च आदिश्च अन्तादी, अन्तादिभ्यां तुल्यम् अन्तादिवत्। योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यात्।

उदा -**शिवेहि**। शिव + एहि इति स्थिते 'अन्तादिवच्च'इति सूत्रेण ए इत्यस्य पूर्वस्य अन्तवद्भावमादाय 'ओमाङोश्च'इति सूत्रेण पररूपे शिव् एहि, शिवेहि इति रूपम्।

४. अकः सवर्णे दीर्घः। (६-१-१०१)

त्रिपदं सूत्रम्। इको यणचि इति सूत्रात् अचि इति पदम् अनुवर्तते। अक् इति प्रत्याहारे अ, इ, उ, ऋ, ऌ इति वर्णाः अन्तर्भवन्ति। अकः इति पञ्चम्यन्तः। अकः सवर्णेऽचि परे पूर्वपरयोः दीर्घ एकादेशः स्यात्। अ आ इत्येतयोः अनन्तरं यदि अ आ इत्येतौ वर्णौ स्तः तर्हि आकारः। इ ई इत्येतयोः अनन्तरं यदि इ ई इत्येतौ वर्णौ स्तः तर्हि ईकारः। उ ऊ इत्येतयोः अनन्तरं यदि उ ऊ इत्येतौ वर्णौ स्तः तर्हि ऊकारः।

उदा -**दैत्यारिः**। दैत्य + अरिः इति स्थिते 'अकः सवर्णे दीर्घः'इति सूत्रेण पूर्वपरयोः अकार-अकारयोः दीर्घे आकारे दैत्यारिः इति रूपम्।

श्रीशः- श्री + ईशः इति स्थिते 'अकःसवर्णे दीर्घः'इति सूत्रेण पूर्वपरयोः ईकार-ईकारयोः दीर्घे ईकारे श्रीशः इति रूपम्।

विष्णूदयः-विष्णु + उदयः इति स्थिते 'अकः सवर्णे दीर्घः'इति सूत्रेण पूर्वपरयोः उकार-उकारयोः दीर्घे ऊकारे विष्णूदयः इति रूपम्।

होतृकारः- होतृ + ऋकारः इति स्थिते 'अकः सवर्णे दीर्घः'इति सूत्रेण पूर्वपरयोः ऋकार-ऋकारयोः दीर्घे ॠकारादेशे होतॄकारः इति रूपम्।

SGOU

५. एङः पदान्तादति। (६-१-१०९)

एङः पदान्तात् अति इति पदच्छेदः। अति तपरकरणं सप्तम्यन्तम्। अति परे ह्रस्वे अकारे परे इत्यर्थः। अमि पूर्वः इति सूत्रात् पूर्वं इत्यनुवर्तते। पदान्तात् एङः अति परे पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशः स्यात्।

यथा - **हरेऽव**। हरे + अव इति स्थिते पदान्तात् एकाराद् अति परे 'एङः पदान्तादति'इति सूत्रेण एकारे हरेऽव इति रूपम्।

विष्णोऽव- विष्णो + अव इति स्थिते पदान्तात् ओकारात् अकारे परे 'एङः पदान्तादति'इति सूत्रेण ओकारे विष्णोऽव इति रूपम्।

६. सर्वत्र विभाषा गोः। (६-१-१२२)

सर्वत्र विभाषा गोः इति त्रिपदं सूत्रम्। सर्वत्र इत्यस्य लोके वेदे च इत्यर्थः। विभाषाशब्दः विकल्पार्थः। एङः पदान्तादति इति अनुवर्तते। लोके वेदे च एङन्तस्य गोरति प्रकृतिभावः वा स्यात् पदान्ते।

यथा -**गो अग्रम् -गोऽग्रम्** । गो + अग्रम् इति स्थिते 'सर्वत्र विभाषा गोः'इति सूत्रेण गोशब्दस्य एङन्तस्य ओकारान्तस्य प्रकृतिभावे गो अग्रम् इति रूपम्।

प्रकृतिभावस्य अभावपक्षे तु 'एङः पदान्तादति'इति पूर्वरूपे गोऽग्रम् इति च रूपम्।

सर्वत्र विभाषा गोः इति सूत्रे एङः इति गोः विशेषणम्। चित्रग्वग्रम् इत्यत्र प्रकृतिभावो न। एङन्ताभावात्। किन्तु यण् आदेशे चित्रग्वग्रम् इति रूपम्।

अत्र पदान्ते इति विशेषणात् गो शब्दस्य षष्ठी एकवचने गो ङस् (अस्) इति स्थिते पदान्तत्वाभावात् प्रकृतिभावो न। किन्तु 'ङसिङसोश्च'इति सूत्रेण पूर्वरूपे रुत्वे विसर्गे च गोः इति।

७. अनेकाल् शित्सर्वस्य। (१-१-५५)

अनेकाल् शित् सर्वस्य इति त्रिपदं सूत्रम्। अनेकः अल् यस्य सः अनेकाल्। श् इत् यस्य सः शित्। शकारः इत् इत्यर्थः। अनेकाल् यः आदेशः शित् आदेशश्च स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने स्यात्।

यथा - गो + अग्रम् इत्यत्र 'अवङ् स्फोटायनस्य'इति सूत्रेण अवङ्। अवङ् अनेकाल् भवति। अतः 'अनेकाल् शित्सर्वस्य'इति सूत्रेण सर्वादेशप्रसक्तिः।

८. ङिच्च। (१-१-५३)

ङित् च इति पदच्छेदः। ङ् इत् यस्य सः ङित्। 'अलोऽन्त्यस्य'इति सूत्रम् अत्र अनुवर्तते। ङित् अनेकाल् अपि अन्त्यस्य एव स्यात्, न सर्वादेशः।

यथा -**गवाग्रम्**। गो + अग्रम् इत्यत्र 'अवङ् स्फोटायनस्य'इति सूत्रेण अवङ्। अवङि ङकारः इत् भवति। ङित्वात् ङिच्च इति सूत्रेण अन्त्यादेशे गो इत्यस्य ओकारस्य स्थाने अवङ्। ग् अव अग्रम्। पुनः सवर्णदीर्घे गवाग्रम् इति रूपम्।

SGOU

९. अवङ् स्फोटायनस्य। (६-१-१२३)

द्विपदं सूत्रम्। स्फोटायनः इति पाणिनेः पूर्वस्य कस्यचन वैयाकरणाचार्यस्य नाम। गोः, एङः, पदान्ते, अति, इति पदानि अनुवर्तन्ते। पदान्ते एङन्तस्य गोः अवङ् स्यात् अचि।

यथा -**गवाग्रम्**। गो + अग्रम् इत्यत्र 'अवङ् स्फोटायनस्य'इति सूत्रेण अवङ्। अवङि ङकारः इत् भवति। ङित्वात् ङिच्च इति सूत्रेण अन्त्यादेशे गो इत्यस्य ओकारस्य स्थाने अवङ्। ग् अव अग्रम्। पुनः सवर्णदीर्घे गवाग्रम् इति रूपम्।

अवङ् इति आदेशाभावपक्षे 'सर्वत्र विभाषा गोः'इति प्रकृतिभावे **गो अग्रम्** इति रूपम्।

पदान्ते इति किम्?

गो शब्दात् सप्तम्यैकवचनप्रत्यये गो ङि। अनुबन्धलोपे गो इ। गो इत्यस्य पदान्तत्वाभावात् अवङ् इति आदेशः न प्राप्तः। अतः 'एचोऽयवायावः'इति सूत्रेण अव् आदेशे गवि इति रूपम्।

१०. इन्द्रे च। (६-१-१२४)

द्विपदं सूत्रम्। सर्वत्र विभाषा गोः इति सूत्रात् गोः इति पदम् अनुवर्तते। अवङ् स्फोटायनस्य इति सूत्रात् अवङ् च। एवं च गोरवङ् स्यात् इन्द्रशब्दे परे।

यथा- **गवेन्द्रः** - गवाम् इन्द्रः इत्यर्थे समासे गो + इन्द्रः इति स्थिते 'इन्द्रे च'इति सूत्रेण गो शब्दस्य अवङ् आदेशे गव इन्द्र इति जाते 'आद्गुणः'इति सूत्रेण गुणे गवेन्द्रः इति रूपम्।

११. दूराद्धूते च। (८-२-८४)

दूरात् हूते च इति त्रिपदं सूत्रम्। वाक्यस्य टेः प्लुतः वा इत्यनुवर्तन्ते। अनेन सूत्रेण प्लुतः विधीयते। दूरात् सम्बोधने वाक्यस्य टेः प्लुतो वा स्यात्।

यथा - 'आगच्छ कृष्ण३ अत्र गौश्चरति'इत्यस्मिन् वाक्ये कृष्णं सम्बोधयति कृष्ण३ इति। तस्य वाक्यस्य टि भवति अत्रत्यः अ३। प्लुतद्योतकः ३ चिह्नः।

१२. प्लुतप्रगृह्या अचि नित्यम्। (६-१-१२५)

प्लुतप्रगृह्याः अचि नित्यम् इति त्रिपदं सूत्रम्। प्लुताः प्रगृह्याः च अचि प्रकृत्या स्युः। तेन पुनः सन्धिः न भवति। पूर्ववत् तिष्ठति।

यथा - आगच्छ कृष्ण३ अत्र गौश्चरति इत्यत्र 'दूराद्धूते च'इति सूत्रेण अकारस्य प्लुतः। तस्मात् अचि परे 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावः। अत्र द्वयोः अकारयोः सवर्णदीर्घः न भवति।

१३. ईदूदेदिद्वचनं प्रगृह्यम्। (१-१-११)

ईदूदेद् द्विवचनं प्रगृह्यम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण प्रगृह्यसंज्ञा विधीयते।ईदूदेद् इति द्विवचनस्य विशेषणम्। ईकारान्त-ऊकारान्त-एकारान्तद्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी इकारान्तद्विवचनम्। एवं गुरू, शम्भू इत्यादौ ऊकारान्तः द्विवचने। गङ्गे, पचेथे इत्यादि एकारान्तद्विवचनम्।

उदा - **हरी एतौ**। हरी + एतौ इति स्थिते ईकारान्तस्य द्विवचनस्य 'ईदूदेद्द्विवचनं प्रगृह्यम्'इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावे हरी एतौ इति रूपम्।
अत्र प्रकृतिभावविधानात् यणादेशो न।

विष्णू इमौ - विष्णू इमौ इति स्थिते ऊकारान्तस्य द्विवचनस्य 'ईदूदेद्द्विवचनं प्रगृह्यम्'इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावे विष्णू इमौ।

गङ्गे अमू-गङ्गे अमू इति स्थिते एकारान्तस्य द्विवचनस्य 'ईदूदेद्द्विवचनं प्रगृह्यम्'इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावे गङ्गे अमू इति।

१४.अदसो मात्। (१-१-१२)

अदसः मात् इति पदच्छेदः। 'ईदूदेद्द्विवचनं प्रगृह्यम्'इति सूत्रम् अत्र अनुवर्तते। एवं च अदस् शब्दावयवमकारात् परावीदूतौ प्रगृह्यौ स्तः।

यथा - **अमी ईशाः**। अमी + ईशाः -अमी इति अदस् शब्दस्य पुल्लिङ्गस्य प्रथमा बहुवचनरूपम्। अत्र मकारात् परस्य ईकारस्य 'अदसो मात्'इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावे अमी ईशाः इति रूपम्।

रामकृष्णावमू +आसाते - अमू इति अदस् शब्दस्य पुल्लिङ्गस्य प्रथमाद्विवचनम्। अत्र ऊकारस्य 'अदसो मात्'इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावे रामकृष्णावमू आसाते।
मात् इति किम्?
अमुकेऽत्र इत्यत्र मात्परत्वेन नास्ति। 'एङः पदान्तादति'इति पूर्वरूपे अमुकेऽत्र इति।

पुनरावृत्तिः (Recap)

- अचोऽन्त्यादि टि इति सूत्रेण टिसंज्ञा विधीयते।
- शकन्ध्वादिषु पररूपं वाच्यम् इति वार्तिकेन टेः पररूपम्।
- ओमाङोश्च इति सूत्रेण पररूपमेकादेशः।
- अन्तादिवच्च इति सूत्रेण पूर्वस्य अन्तवद्भावं, परस्य आदिवद्भावं च विधीयते।
- अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घमेकादेशः।
- एङः पदान्तादति इति सूत्रेण पूर्वरूपम् एकादेशः ।
- सर्वत्र विभाषा गोः इति सूत्रेण प्रकृतिभावः वा स्यात्।
- अवङ् स्फोटायनस्य इति सूत्रेण गो इत्यस्य ओकारस्य स्थाने अवङ्।
- इन्द्रे च इति सूत्रेण गोरवङ् स्यात् इन्द्रशब्दे परे।
- दूराद्धूते च इति सूत्रेण प्लुतः विधीयते।
- प्लुतप्रगृह्या अचि नित्यम् इति सूत्रेण प्रकृतिभावः।
- ईदूदेद्द्विवचनं प्रगृह्यम् इति सूत्रेण प्रगृह्यसंज्ञा विधीयते।

SGOU

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. अमी ईशाः इत्यत्र अमी इत्यस्य प्रगृह्यसंज्ञा केन सूत्रेण?
२. टिसंज्ञविधायकं सूत्रं किम्?
३. ईद्वदेद्द्विवचनं .....। (पूरयत)
४. सवर्णदीर्घविधायकं सूत्रम् किम्?
५. गो इत्यस्य ओकारस्य स्थाने अवङ् केन सूत्रेण विधीयते?
६. दूराद्धूते च इति सूत्रेण ..... विधीयते ।
७. शिवाय + ओम् (नमः) इति स्थिते पररूपमेकादेशः केन सूत्रेण?
८. विभाषाशब्दस्य कोऽर्थः?
९. केन सूत्रेण प्रगृह्यसंज्ञा विधीयते?
१०.प्लुताः प्रगृह्याः च अचि ..... स्युः।

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. हरी + एतौ इत्यत्र यणादेशः न भवति। कुतः?
२. अवङ् स्फोटायनस्य इति सूत्रे पदान्ते इति पदं किमर्थम्?
३. अचोऽन्त्यादि टि इति सूत्रस्य लघु व्याख्यानं कुरुत।

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

१. सवर्णदीर्घः सप्रमाणं व्याख्यात।
२. ईदूदेद्द्विवचनं प्रगृह्यं सप्रमाणं व्याख्यात।

निर्दिष्टाभ्यासः (Assignments)

१. प्रकृतिभावं विशदयत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. अदसो मात्।
२. अचोऽन्त्यादि टि।
३. प्रगृह्यम्।
४. अकः सवर्णे दीर्घः
५. अवङ् स्फोटायनस्य

SGOU

६. प्लुतः।
७. ओमाङोश्च।
८. विकल्पार्थः।
९. ईदूदेद्द्विवचनं प्रगृह्यम्।
१०. प्रकृत्या।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डां कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-4

चादयोऽसत्वे इत्यारभ्य ऋत्यकः इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- सन्धिकार्याणां ज्ञानम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- प्रकृतिभावसन्धिंसुष्ठु जानाति भाषायां प्रयुङ्क्ते।
- निपात-प्रगृह्यसंज्ञायोः अवगमनम्।

प्राग्व्यपेक्षाः (Prerequisites)

तृतीये एकके अच्सन्ध्यां प्रकृतिभावसंज्ञा, प्लुतसंज्ञा, प्रगृह्यसंज्ञादिसंबद्धानाम् उदाहरणानि सप्रमाणं पठितवन्तः। अस्मिन् एकके निपातसंज्ञा, प्रकृतिभावं शिष्टभागस्थसूत्राणि सप्रमाणं पठामः।

मुख्यपदानि(Key words)

निपातसंज्ञा, विकल्पेन प्रगृह्यः,विकल्पन वकारः, विकल्पेन ह्रस्वः

Discussion

१. चादयोऽसत्वे। (१-४-५७)

चादयः असत्वे इति द्विपदं सूत्रम्। अनेन सूत्रेण निपातसंज्ञा विधीयते। न सत्वम् असत्वम् अद्रव्यमित्यर्थः। च आदिः येषां ते चादयः। च ह इत्यादिशब्दाः निपाताः। अद्रव्यार्थाः चादयः निपातसंज्ञाः स्युः।

२. प्रादयः। (१-४-५८)

प्र आदयः इति पदच्छेदः। आदयः इत्युक्ते प्र, परा इत्यादि। एतेऽपि निपातसंज्ञाः स्युः। प्रादयः निपाताः स्युः इत्यर्थः।

३. निपात एकाजनाङ्। (१-१-१४)

निपातः एकाच् अनाङ् इति त्रिपदं सूत्रम्। एकः अच् एकाच्। न आङ् अनाङ्। आङ्भिन्नः इत्यर्थः। 'ईदूदेद्विवचनं प्रगृह्यम्'इति सूत्रात् प्रगृह्यम् इति पदम् अनुवर्तते। एकाच् निपातः आङ्वर्जः प्रगृह्यः स्यात्।

SGOU

यथा - **इ + इन्द्रः** इत्यत्र इइत्यस्य चादिगणे पठितत्वात् 'चादयोऽसत्वे'इति निपातसंज्ञा। तस्य 'निपात एकाजनाङ्'इति सूत्रेण प्रगृह्यसंज्ञा। तस्मात् इकारेऽचि परे 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावः। अतः सवर्णदीर्घो न।

उ +उमेशः - अत्र 'चादयोऽसत्वे'इति सूत्रेण निपातसंज्ञा। 'निपात एकाजनाङ्'इति सूत्रेण प्रगृह्यसंज्ञा। तस्मात् उकारेऽचि परे 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावः, अतः सवर्णदीर्घो न।

आ इति निपातः ङित् अङित् चेति द्विविधः। तत्र 'वाक्यस्मरणयोरङित्'इत्यनेन वाक्ये स्मरणार्थेच वर्तमानः आ अङित् भवति। आ एवं किल तत्, आ एवं नु मन्यसे इति। उभयत्रापि प्रगृह्यसंज्ञायां प्रकृतिभावः। अन्यत्र ङित्।

ईषद् उष्णम् - **ओष्णम्**। ईषद् इत्यादिषु अर्थेषु आङ् ङित्। अतः तत्र प्रगृह्यसंज्ञा नास्ति। आ (ईषत्) उष्णम् इति स्थिते प्रगृह्यसंज्ञाभावात् प्रकृतिभावाभावे 'आद्गुणः'इति सूत्रेण गुणे ओष्णम् इति रूपम्।

४. ओत्। (१-१-१५)

एकपदं सूत्रम्। निपातः प्रगृह्यम् इति पदद्वयम् अत्र अनुवर्तते। ओदन्तो निपातः प्रगृह्यः स्यात्।

यथा - **अहो ईशाः**। अहो ईशाः इत्यत्र 'ओत्'इति सूत्रेण प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावे अहो ईशाः इति।

५. सम्बुद्धौ शाकल्यस्येतावनार्षे। (१-१-१६)

सम्बुद्धौ शाकल्यस्य इतौ अनार्षे इति चतुष्पदं सूत्रम्। अनेन सूत्रेण विकल्पेन प्रगृह्यः विधीयते। सम्बुद्धिनिमित्तकः ओकारो वा प्रगृह्यः अवैदिके इतौ परे।

यथा -**विष्णो इति**। विष्णो + इति। अत्र विष्णो इत्यस्य ओकारः सम्बुद्धिनिमित्तकः। अतः 'सम्बुद्धौ शाकल्यस्येतावनार्षे'इति विकल्पेन प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावे विष्णो इति।

प्रगृह्यसंज्ञाभावपक्षे 'एचोऽयवायावः'इति सूत्रेण ओकारस्य अवादेशे विष्णविति इति जाते 'लोपः शाकल्यस्य'इति सूत्रेण वकारलोपपक्षे **विष्ण इति**।

लोपाभावपक्षे **विष्णविति** इति च रूपम्।

६. मय उञो वो वा। (८-३-३३)

मयः उञः वः वा इति चतुष्पदं सूत्रम्। अनेन सूत्रेण वकारः विकल्पेन विधीयते। मयः परस्य उञः वो वा स्यादचि।

यथा - **किम्वुक्तम्**। किमु +उक्तम् इति स्थिते 'मयः उञो वो वा'इति सूत्रेण मकारात् परस्य उञ उकारस्य विकल्पेन वकारादेशे किम् व् उक्तम्। किम्वुक्तम् इति रूपम्।

वकाराभावपक्षे 'निपात एकाजनाङ्'इत्यनेन प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्'इति सूत्रेण प्रकृतिभावे **किमु उक्तम्** इत्यपि रूपम्।

SGOU

७. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। (६-१-१२७)

इकः असवर्णे शाकल्यस्य ह्रस्वः च इति पञ्चपदं सूत्रम्। अनेन सूत्रेण विकल्पेन ह्रस्वः विधीयते। पदान्ताः अचि इत्यनुवर्तते। पदान्ता इको ह्रस्वो वा स्युः असवर्णेऽचि।

यथा - **चक्री + अत्र** इति स्थिते 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'इति सूत्रेण पदान्तस्य ईकारास्य वैकल्पिकेन ह्रस्वे चक्रि अत्र इति रूपम्।

ह्रस्वाभावपक्षे 'इको यणचि'इति सूत्रेण यणादेशे चक्र्यत्र इत्यपि रूपम्। चक्री अत्र इति ह्रस्वविध्यनन्तरं 'इको यणचि'इति सूत्रं न। स्वरविधिसामर्थ्यात्।

पदान्ताः इति किम्?

गौरी औ इत्यत्र 'इको यणचि'इति यणि गौर् य् औ। अत्र गौरी इत्यवस्थायां पदान्तत्वं न। अतः न ह्रस्वः।

८. अचो रहाभ्यां द्वे। (८-४-४६)

अचः रहाभ्यां द्वे इति त्रिपदं सूत्रम्। यरः, वा इत्यनुवर्तते। अचः इति पञ्चमी। अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः।

यथा - **गौर्य्यौ**। गौरी + औ इति स्थिते 'इको यणचि'इति यणि गौर् य् औ। 'अचो रहाभ्यां द्वे'इति सूत्रेण यकारस्य द्वित्वे गौर्य्यौ इति रूपम्।

न समासे। (वार्तिकम्)

द्विपदं वार्तिकम्। अनेन वार्तिकेन इकः ह्रस्वः निषिध्यते। समासे पदान्तस्य इकः ह्रस्वः न स्यात्।

यथा **-वाप्यश्वः**। वापी + अश्वः इति स्थिते 'न समासे'इति वार्तिकेन समासे पदान्त इक असवर्णे अचि ह्रस्वाभावात् 'इको यणचि'इति सूत्रेण यणि वाप्यश्वः इति रूपम्।

९. ऋत्यकः। (६-१-१२८)

ऋति अकः इति द्विपदं सूत्रम्। पदान्तः, ह्रस्वः, वा इत्यनुवर्तन्ते। ऋत् इत्यस्य ह्रस्वः ऋकारः। अकः इति प्रथमा बहुवचनम्। पदान्ताः अकः ऋति परे ह्रस्वः वा स्युः।

यथा - **ब्रह्म ऋषिः**। ब्रह्मा +ऋषिः इति स्थिते पदान्तस्याकारस्य ऋति परे 'ऋत्यकः'इति सूत्रेण विकल्पेन ह्रस्वे ब्रह्म ऋषिः इति रूपम्।

ह्रस्वाभावपक्षे तु गुणे रपरत्वे च **ब्रह्मर्षिः** इति रूपम्। ह्रस्वविधिसत्वे न गुणः।

पदान्ताः इति किम्?

आर्च्छत् - आ + ऋच्छत् इत्यवस्थायां पदान्तस्य इत्युक्तत्वात् ह्रस्वः न। आ इति लङि्स्थतः आडागमः। तत् न पदम्। अतः 'आटश्च'इति सूत्रेण वृद्धौ 'उरण् रपरः'इति रपरत्वे च आर्च्छत् इति रूपम्।

SGOU

अस्य खण्डस्य संक्षिप्तीकरणम्।

सन्धेः नाम	विधीयमानं सूत्रम्/वार्तिकम्	सन्धेः पूर्वम्	सन्धत्तं रूपम्	सविशेषता
यण् सन्धिः	इको यणचि	सुधी + उपास्यः	सुध्युपास्यः सुद्ध्युपास्यः	
अयवायावः	एचोऽयवायावः	हरे + ए विष्णो + ए नै + अकः पौ + अकः	हरये विष्णवे नायकः पावकः	
गुणसन्धिः	आद्गुणः	उप + इन्द्रः कृष्ण + ऋद्धिः	उपेन्द्रः कृष्णर्द्धिः	उरण्रपरः इति रपरत्वे च
वृद्धिसन्धिः	वृद्धिरेचि	कृष्ण + एकत्वम्	कृष्णैकत्वम्	
	प्र-वत्सतर-कम्बल-वसनार्णदशानामृणे	प्र +ऋणम्	प्रार्णम्	वार्तिकम् रपरत्वं च
	उपसर्गादृति धातौ	प्र + ऋच्छति	प्रार्च्छति	उरण् रपरः
अचः पररूपम्	एङि पररूपम्	प्र + एजते	प्रेजते	
	शकन्ध्वादिषु पररूपं वाच्यम्	शक + अन्धुः	शकन्धुः	वार्तिकम्
वैकल्पिकेन ह्रस्वः	इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च	चक्री + अत्र	चक्रि अत्र	ह्रस्वविधिसामर्थ्यात् यण् न
	ऋत्यकः	ब्रह्मा + ऋषिः	ब्रह्म ऋषिः	ह्रस्वाभावे ब्रह्मर्षिः
यरः विकल्पेन द्वित्वम्	अचो रहाभ्यां द्वे	गौर्य्+ आ	गौर्य्यौ	विकल्पेन

पुनरावृत्तिः (Recap)

- चादयोऽसत्वे इति सूत्रेण निपातसंज्ञा विधीयते।
- प्रादयः इति सूत्रेण निपातसंज्ञा विधीयते।
- निपात एकाजनाङ् इति सूत्रेण प्रगृह्यसंज्ञा।
- ओत् इति सूत्रेण प्रगृह्यसंज्ञा।
- सम्बुद्धौ शाकल्यस्येतावनार्षे इति सूत्रेण विकल्पेन प्रगृह्यः विधीयते।
- इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च इति सूत्रेण ह्रस्वः विधीयते।
- न समासे वार्तिकेन इकः ह्रस्वः निषिध्यते।
- ऋत्यकः इति सूत्रेण पदान्ते ह्रस्वः विकल्पेन विधीयते।

SGOU

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. निपातसंज्ञा विधायकसूत्रं किम्?
२. प्रादयः इति सूत्रेण का विधीयते?
३. विष्णो +इति इति जाते प्रग्रह्याभावपक्षे रूपं किम्?
४. विष्णो +इति इति जाते केन सूत्रेण विकल्पेन प्रगृह्यः विधीयते?
५. इकोऽसवर्णे ..... ह्रस्वश्च।(पूरयत)
६. इकः ह्रस्वः केन वार्त्तिकेन निषिध्यते?
७. ब्रह्मा + ऋषिः इति स्थिते ह्रस्वाभावपक्षे रूपं किम्?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. वाप्यश्वः इति रूपे ह्रस्वः न कारणम् किम्?
२. किम्वुक्तम्, किमु उक्तम् सप्रमाणं सन्धत्त।

निर्दिष्टाभ्यासः (Assignments)

निपात एकाजनाङ् - विशदयत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. चादयोऽसत्वे।
२. निपातसंज्ञा।
३. विष्ण इति।
४. सम्बुद्धौ शाकल्यस्येतावनार्षे
५. शाकल्यस्य।
६. न समासे इति वार्तिकेन।
७. ब्रह्मर्षिः।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

SGOU

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डां कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५

२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७

३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

BLOCK -3

लघुसिद्धान्तकौमुदी-
हल्सन्धिप्रकरणम्-
विस्तरेण अध्ययनम्

SGOU

Unit-1

स्तोः श्चुना श्चुः इति सूत्रादारभ्य तोर्लिः इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- व्याकरणविषये प्राथमिकतत्त्वानां ज्ञानम्।
- हल्सन्धिकार्याणां ज्ञानम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- वार्तिकस्याशयं सोदाहरणं गृह्णाति।

प्राग्व्यपेक्षाः (Prerequisites)

पदसाधुत्वलक्षणं व्याकरणम्। भाषापठने व्याकरणं नितरां प्राधान्यमर्हति। वाचनाय सन्धिज्ञानमावश्यम्। स्वरसन्धिः,व्यञ्जनसन्धिः, विसर्गसन्धिरिति भेदेन सन्धिं विभक्तुं शक्यते। स्वरसन्धिः अस्माभिः पठिता। इदानों व्यञ्जनसन्ध्यां श्चुत्व- ष्टुत्व-जशादेश-अनुनासिकसन्धीन् अधिकृत्य पठामः।

मुख्यपदानि (Key words)

श्चुत्वसन्धिः, ष्टुत्वनिषेधः, जशादेशसन्धिः, विकल्पेनअनुनासिकविधि, नित्यत्वेनानुनासिकविधिः, हलः परसवर्णविधिः

Discussion

श्चुत्वसन्धिः।

१. स्तोः श्नुना श्चुः। (८-४-४०)

त्रिपदं सूत्रम्। अनेन सूत्रेण श्चुत्वं विधीयते। सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः।

यथा - रामस् + शेते। अत्र 'स्तोः श्नुना श्चुः'इति सूत्रेण सकारस्य स्थाने शकारे रामश्शेते इति रूपम्।

एवं रामस् + चिनोति - रामश्चिनोति।
सत् + चित् - सच्चित्।
शार्ङ्गिन्+ जय - शार्ङ्गिञ्जय।

स्तोः श्चुना श्चुः इति सूत्रे अयं पूर्वः अयं परः इति व्यवस्था न। केवलं योग एव कार्यः।

स् + श - श्श।	श् + स - श्श।	स् + च - श्च।
त्+ च - च्च।	च् + त - च्च।	त् + चि - च्चि।
थ्+ छ - छ्छ।	छ् + थ - छ्छ।	च् +स - श्च।
द्+ ज - ज्ज।	ज् + द - ज्ज।	न् +ज- ञ्ज।

ध्+ झ - झ्झ।　　झ् + ध - झ्झ।　　ज् + ञ - ञ्ज।
न्+ ञ - ञ्ञ।　　ञ् + न - ञ्ञ।

श्चुत्वनिषेधः।

२. शात्। (८-४-४४)

एकपदं सूत्रम्। अनेन सूत्रेण श्चुत्वनिषेधः विधीयते। शात्परस्य तवर्गस्य श्चुत्वं न स्यात्।

यथा -**विश्नः**। विश् + नः। अत्र 'शात्'इति सूत्रेण श्चुत्वनिषेधे विश्नः इति रूपम्।

एवं **प्रश्नः**। शात् इति सूत्रे पूर्वपरव्यवस्था वर्तते। विश्नः - प्रश्नः।

ष्टुत्वम्।

३. ष्टुना ष्टुः। (८-४-४१)

द्विपदं सूत्रम्। अनेन ष्टुत्वं विधीयते। सकारतवर्गयोः षकारटवर्गाभ्यां योगे ष्टुः स्यात्।

यथा - रामस् + षष्ठः इत्यत्र 'ष्टुना ष्टुः'इति ष्टुत्वे षकारे **रामष्षष्ठः**इति रूपम्।

एवं रामस् + टीकते - **रामष्टीकते** (स् + टी - ष्टी)।

पेस् +टा - **पेष्टा** (स् +टा - ष्टा)

तत् +टीका - **तट्टीका** (त् +टी - ट्टी)

चक्रिन् + ढौकसे - **चक्रिण्ढौकसे** (न् + ढौ - ण्ढौ)

ष्टुना ष्टुः इति सूत्रे पूर्वपरव्यवस्था न केवलं योग एव।

स् + ष - ष्ष।　　ष् + स - ष्ष।　　स् + ट - ष्ट।
त् + ट- ट्ट।　　ट् + त - ट्ट।　　ष् + टी - ष्टी।
थ् + ठ - ठ्ठ।　　ठ् + थ - ठ्ठ।　　द् + टी - ट्टी।
द् + ड - ड्ड।　　ड् + द - ड्ड।　　न् + ढ - ण्ढ।
ध् + ढ - ढ्ढ।　　ढ् + ध - ढ्ढ।　　न् + ढौ - ण्ढौ।
न् + ण - ण्ण।　　ण् + न - ण्ण

ष्टुत्वनिषेधः।

४. न पदान्ताट्टोरनाम्। (८-४-४२)

न पदान्तात् टोः अनाम् इति चतुष्पदं सूत्रम्। अनेन सूत्रेण ष्टुत्वनिषेधः विधीयते। पदान्तात् टवर्गात्परस्य स्तोः ष्टुः न स्यात्।

यथा - **षट् सन्तः**। अत्र 'ष्टुना ष्टुः'इति सूत्रेण ष्टुत्वे प्राप्ते 'न पदान्ताट्टोरनाम्'इति सूत्रेण ष्टुत्वनिषेधे षट्सन्तः इति रूपम्।

एवं षट्+ ते - **षट्ते**।

पदान्तात् इति किम्? ईद् + टे इत्यत्र पदान्तत्वाभावात् 'ष्टुना ष्टुः'इति ष्टुत्वे ईट्टे इति रूपम्।

टोः इति किम्? सर्पिष् + तमम् इत्यत्र टवर्गाभावात् ष्टुत्वनिषेधः न। ष्टुत्वे सर्पिष्टमम्।

SGOU

अनाम्नवतिनगरीणामिति वाच्यम्। (वार्तिकम्)

पदान्तात् टवर्गात् परस्य नाम्नवतिनगरीणां भिन्नस्य स्तोः (सकारतवर्गयोः) ष्टुत्वं न स्यात्। वार्तिकमिदं 'न पदान्ताट्टोरनाम्'इत्यस्यापवादः।

यथा -**षण्णाम्**। षड् + नाम् इत्यत्र 'अनाम्नवतिनगरीणामितिवाच्यम्'इति वार्तिकबलात् 'ष्टुना ष्टुः'इति ष्टुत्वे षड्नाम्। 'प्रत्यये भाषायां नित्यम्'इति अनुनासिके षण् णाम् षण्णाम् इति रूपम्।

षड् + नवतिः - **षण्णवतिः**।

षड् + नगर्यः - **षण्णगर्यः**। नगरी इत्यस्य बहुवचनं भवति नगर्यः।

५. तोः षि। (८-४-४३)

द्विपदं सूत्रम्। अनेन ष्टुत्वनिषेधः विधीयते। तवर्गस्य षकारे परे न ष्टुत्वम्।

यथा - **सन् षष्ठः**। सन् षष्ठः इत्यत्र 'तोः षि'इति सूत्रेण ष्टुत्वनिषेधे सन् षष्ठः इति रूपम्।

ष्टुत्वविधिकार्यम्।

ष्टुना ष्टुः - ष्टुत्वम्।

न पदान्ताट्टोरनाम् - ष्टुत्वनिषेधः।

अनाम्नवतिनगरीणामितिवाच्यम् - ष्टुत्वनिषेधस्य निषेधः।

तोः षि - ष्टुत्वनिषेधः।

सम्धत्त

षड् + नाम्	षड् + नवतिः	षड् + नगर्यः	अनाम्नवतिनगरीणामितिवाच्यम् इति वार्तिकबलात् ष्टुना ष्टुः इति सूत्रेण
षड् णाम्	षड् णवतिः	षड् णगर्यः	प्रत्यये भाषायां नित्यम्
षण्णाम्	षण्णवतिः	षण्णगर्यः	यरोऽनुनासिकेऽनुनासिको वा

जशादेशसन्धिः।

६. झलां जशोऽन्ते। (८-२-३९)

झलां जशः अन्ते इति त्रिपदं सूत्रम्। अनेन सूत्रेण जश्त्वं विधीयते। पदान्ते झलां जशः स्युः।

यथा -**वागीशः**। वाक् +ईशः इत्यत्र 'झलां जशोऽन्ते'इति सूत्रेण जश्त्वे वाग् ईशः वागीशः इति रूपम्।

जश् - वर्गतृतीयम् (ज ब ग ड द) वागीशः - बृहस्पतिः (देवानां गुरुः)।

विकल्पेन अनुनासिकविधिः।

७. यरोऽनुनासिकेऽनुनासिको वा। (८-४-४५)

यरः अनुनासिके अनुनासिकः वा इति चतुष्पदं सूत्रम्। अनेन सूत्रेण विकल्पेन अनुनासिकः विधीयते। यरः पदान्तस्यानुनासिके परे अनुनासिको वा स्यात्।

यथा - **एतन्मुरारिः**। एतद् + मुरारिः इति स्थिते 'यरोऽनुनासिकेऽनुनासिको वा'इति विकल्पेन अनुनासिके नकारे एतन्मुरारिः।
अनुनासिकाभावे **एतद्मुरारिः**।

नित्यत्वेनानुनासिकविधिः।
प्रत्यये भाषायां नित्यम्।(वार्तिकम्)
त्रिपदं वार्तिकम्। अनेन वार्तिकेन नित्यमनुनासिकः विधीयते।भाषायाम् इत्यस्य लौकिकप्रयोगे इत्यर्थः। प्रत्यये विद्यमाने अनुनासिके परतः पदान्तस्य यरः नित्यमनुनासिकादेशः स्यात्।
यथा - **तन्मात्रम्**। तद् + मात्रम् इत्यत्र मात्रच्प्रत्ययः परत्वेन वर्तमानत्वात् 'प्रत्यये भाषायां नित्यम्'इति वार्तिकेन अनुनासिके तन्मात्रम् इति।
एवं चिद् + मयम् - **चिन्मयम्**।

हलः परसवर्णविधिः।
८. तोर्लिः। (९८-४-६०)
तोः लि इति द्विपदं सूत्रम्। अनेन परसवर्णः विधीयते।
तु इत्यस्य पञ्चम्यैकवचनं भवति तोः। लि इत्यस्य लकारे परे। तवर्गस्य लकारे परे परसवर्णः स्यात्।
यथा - तद् लयः इत्यत्र 'तोर्लि'इति परसवर्णे लकारे **तल्लयः**इति रूपम्।
एवं विद्वान् लिखति - **विद्वाँल्लिखति**।
नकारस्य (अनुनासिकस्य) स्थाने आगतत्वात् **'ँ'**इत्ययं चिह्नः।

पुनरावृत्तिः (Recap)

- स्तोः श्चुना श्चुः इति सूत्रेण श्चुत्वम् विधीयते।
- शात् इति सूत्रेण श्चुत्वनिषेधः विधीयते।
- ष्टुना ष्टुः इति सूत्रेण ष्टुत्वं विधीयते।
- न पदान्ताट्टोरनाम् इति सूत्रेण पदान्तात् टवर्गात्परस्य ष्टुत्वनिषेधः।
- अनाम्नवतिनगरीणामिति वाच्यम् इति वार्त्तिकेन नाम्, नवति, नगरी एषां ष्टुत्वनिषेधो न।
- तोः षि इति सूत्रेण तवर्गस्य षकारे परे न ष्टुत्वम्।
- झलां जशोऽन्ते इति सूत्रेण जश्त्वम्।
- यरोऽनुनासिकेऽनुनासिको वा इति सूत्रेण विकल्पेन अनुनासिकः विधीयते।
- प्रत्यये भाषायां नित्यम् इति वार्तिकेन नित्यत्वेनानुनासिकविधिः।
- तोर्लिः इति सूत्रेण हलः परसवर्णविधिः।

वस्तुनिष्ठप्रश्नाः(Objective type questions)

१. 'स्तोः श्चुना श्चुः'इति सूत्रेण किं विधीयते?

२. केन सूत्रेण श्चुत्वनिषेधः विधीयते?
३. ष्टुत्वविधायकसूत्रं किम्?
४. 'न पदान्ताट्टोरनाम्'इति सूत्रेपदान्तात् इति किम्?
५. सत् + चित् - ..... ।(सन्धिं कुरुत)
६. ..... स्थाने आगतत्वात् 'ँ'इत्ययं चिह्नः। (पूरयत)
७. एतद् मुरारिः इति स्थिते अनुनासिकाभावपक्षे रूपं किम्?
८. 'तोर्लिः' इति सूत्रस्य उदाहरणं लिखत।
९. शात्परस्य ..... श्चुत्वं न स्यात्।
१०. 'न पदान्ताट्टोरनाम्'इति सूत्रेण किं विधीयते?
११. षट् + सन्तः - सन्धत्तं रूपं किम्?
१२. सन् षष्ठः इत्यत्र कुतः ष्टुत्वं न?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

१. षड् + नवतिः अत्र सन्धिनियमः कः?
२. एतन्मुरारिः - एतद्मुरारिः भेदः स्पष्टयत।
३. वागीशः - सन्धिकार्याणि स्पष्टयत।

एकैकया खण्डिकया उत्तराणि लिखत
(Answer the following questions in a paragraph)

१. 'न पदान्ताट्टोरनाम्'इति सूत्रं उदाहरणसहितं व्याख्यात।
२. 'झलां जशोऽन्ते'इति सूत्रं उदाहरणसहितं व्याख्यात।।

निर्दिष्टाभ्यासः (Assignments)

१. ष्टुत्वविधिं विशदयत।
२. श्चुत्वविधिं विवृणुत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. श्चुत्वम्।
२. शात्।
३. ष्टुना ष्टुः।
४. ईद् + टे इत्यत्र पदान्तत्वाभावात् 'ष्टुना ष्टुः'इति ष्टुत्वे ईट्टे इति रूपम्।

SGOU

५. सच्चित्।
६. नकारस्य (अनुनासिकस्य)
७. एतद्मुरारिः।
८. तल्लयः।
९. तवर्गस्य।
१०. ष्टुत्वनिषेधः।
११. षट् सन्तः।
१२. तोः षि इति सूत्रात्।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डां कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-2

उदःस्थास्तम्भोः पूर्वस्य इति सूत्रादारभ्य वा पदान्तस्य इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- व्याकरणविषये प्राथमिकतत्त्वानां ज्ञानम्।
- हल्सन्धिकार्याणां प्रक्रियावगमनम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- वार्तिकस्याशयं सोदाहरणं गृह्णाति।

प्राग्व्यपेक्षाः (Prerequisites)

पूर्वस्मिन् एकक व्यञ्जनसन्ध्यां श्चुत्वसन्धिः, ष्टुत्वसन्धिः, तेषां निषेधकार्याणि च पठितानि। इदानीं हल्सन्धिम् अन्तर्गतानां चर्त्वविधिः, छत्वविधिः तथा विधीयमानानि सूत्राणां व्याख्यानं, तेषा भेदः साम्यता च विस्तरेण प्रस्तूयते। श्रद्धया पठन्तु।

मुख्यपदानि (Key words)

हलः पूर्वसवर्णविधिः, विकल्पेन झरः लोपः, चर्त्वविधिः, झयः विकल्पेन पूर्वसवर्णः, हलः पूर्वसवर्णविधिः, विकल्पेन छत्वविधिः, अनुस्वारविधिः, अनुस्वारस्य परसवर्णः,विकल्पेन अनुस्वारस्य परसवर्णः,

Discussion

१. उदः स्थास्तम्भोः पूर्वस्य। (७-४-६१)

त्रिपदं सूत्रम्। अनेन पूर्वसवर्णः विधीयते। उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्।

यथा - उद् स्थानम् इत्यत्र 'उदः स्थास्तम्भोः पूर्वस्य'इति सूत्रेण पूर्वसवर्णः। दकारस्य सवर्णः थ् आयाति।

२. तस्मादित्युत्तरस्य। (१-१-६७)

तस्मात् इति उत्तरस्य इति त्रिपदं सूत्रम्। पञ्चमीनिर्देशेन विधीयमानं कार्यं परस्य स्थाने स्यात् इति कार्यमनेन सूत्रेण विधीयते। पञ्चमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेण अव्यवहितस्य परस्य ज्ञेयम्।

यथा - उद् स्थानम् इत्यत्र 'उदः स्थास्तम्भोः पूर्वस्य'इति सूत्रेण पूर्वसवर्णः विधीयते। उदः इति पञ्चमी। अतः अयं पूर्वसवर्णः परस्य स्था इत्यस्य स्थाने स्यात्।

३. आदेः परस्य। (१-१-५४)

द्विपदमिदं सूत्रम्। परस्य विहितं कार्यं तस्यादेः स्यादिति इदं परिभाषासूत्रं विशदयति। परस्य यद् विहितं तद् तस्यादेः बोध्यम्।

SGOU

यथा - उद् + स्थानम् इत्यत्र 'उदः स्थास्तम्भोः पूर्वस्य'इति सूत्रेण विधीयमानं कार्यं परस्य आदेः सकारस्य स्थाने स्यात्। उद् थ् थानम्।

विकल्पेन झरः लोपः।

४.झरो झरि सवर्णे। (८-४-६५)

झरः झरि सवर्णे इति त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन झरः लोपः विधीयते। हलः परस्य झरो वा लोपः स्यात् सवर्णे झरि।

यथा - उद् थ् थानम् इत्यवस्थायां 'झरो झरि सवर्णे'इति सूत्रेण विकल्पेन झरः थकारस्य लोपे उद् थानम्।

चर्त्वविधिः।

५.खरि च। (८-४-५५)

द्विपदं सूत्रम्। अनेन सूत्रेण चर्त्वं विधीयते। खरि परे झलां चरः स्युः।

यथा - उद् + थानम् इत्यत्र 'खरि च'इति सूत्रेण चर्त्वे तकारे उत्थानम् इति रूपम्।

सन्धत्त - उद् +स्थानम्। उद् +स्तम्भनम्।

उद् + स्थानम् इति स्थिते 'उदःस्थास्तम्भोः पूर्वस्य'इति सूत्रेण पूर्वसवर्णे 'तस्मादित्युत्तरस्य'इति सूत्रसाहाय्येन परस्य स्थानेऽयं पूर्वसवर्णः। 'आदेः परस्य'इति सूत्रसाहाय्येन परस्यादेः सकारस्य स्थाने थकारे उद् थ् थानम्। 'झरो झरि सवर्णे'इति विकल्पेन पूर्वथकारस्य लोपे उद् थानम्। 'खरि च'इति सूत्रेण चर्त्वे उत्थानम् इति रूपम्।

थकारस्य लोपाभावपक्षे उत्थ्थानम् इति रूपम्।

उद् +स्तम्भनम् इत्यत्र 'उदःस्थास्तम्भोः पूर्वस्य'इति पूर्वसवर्णे उद् थ् तम्भनम्। 'झरो झरि सवर्णे'इति थकारस्य विकल्पेन लोपे उद् तम्भनम् 'खरि च'इति चर्त्वे तकारे उत्तम्भनम्। थकारस्य लोपाभावे उत्थ्तम्भनम् इति रूपम्।

झयः विकल्पेन पूर्वसवर्णः।

६. झयो होऽन्यतरस्याम्। (८-४-६२)

झयः हः अन्यतरस्याम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन पूर्वसवर्णः विधीयते। अन्यतरस्याम् इत्यनेन वैकल्पिकविधिः। झयः परस्य हस्य वा पूर्वसवर्णः स्यात्।

यथा -**वाग्हरिः**। वाक् +हरिः इत्यत्र 'झलां जशोऽन्ते'इति जश्त्वे 'झयो होऽन्यतरस्याम्'इति सूत्रेण वैकल्पिकेन पूर्वसवर्णः। हकारस्य स्थाने ककारस्य सवर्णः। सः पूर्वसवर्णः घकारः। वाग्घरिः इति रूपम्।

पूर्वसवर्णाभावे वाग्हरिः इति रूपम्।

(हशः संवाराः नादाः घोषाश्च। हशि ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द इत्येते वर्णाः। अस्मिन् हकारस्य सवर्णत्वेन घ ग च अन्तर्भवतः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः। अतः महाप्राणे हकारः कवर्गस्थः घकारश्च स्तः।अतः हकारस्य स्थाने घकारः स्यात्।)

SGOU

विकल्पेन छत्वविधिः।

७.शश्छोऽटि। (८-४-६३)

शः छः अटिइति त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन छत्वं विधीयते। पदान्तात् झयः परस्य शस्य छो वा स्यदटि।

यथा - **तच्छिवः**। तद् शिवः इत्यत्र 'स्तोः श्चुना श्चुः'इति सूत्रेण दकारस्य श्चुत्वे जकारे तज् शिवः। 'खरि च'इति चर्त्वे चकारे तच् शिवः। अत्र 'शश्छोऽटि' इति सूत्रेण विकल्पेन छत्वे तच्छिवः इति रूपम्।
छत्वाभावपक्षे तच्शिवः इति रूपम्।

वार्तिकम्।

छत्वममीति वाच्यम्।

छत्वम् अम् इति वाच्यम् इति चतुष्पदं वार्तिकम्। अनेन वार्तिकेन छत्वं विधीयते। पदान्तात् झयः परस्य शकारस्य छः स्यात् अमि परे।

यथा - **तच्छ्लोकेन**। तद् श्लोकेन इत्यत्र 'स्तोः श्चुना श्चुः'इति शचुत्वे तज् श्लोकेन। 'खरि च'इति चर्त्वे चकारे तच् श्लोकेन। 'छत्वममीति वाच्यम्'इति वार्तिकेन तच्छ्लोकेन इति रूपम्।

तारतम्यपठनम् (छत्वम्)	
शश्छोऽटि	**छत्वममीति वाच्यम्**
पदान्तात् झयः परः शकारः छः स्यात् अट् परत्वेन पाक्षिकविधिः	पदान्तात् झयः परः शकारः छःस्यात् अम् परत्वेन पाक्षिकविधिः

अनुस्वारविधिः।

८. मोऽनुस्वारः। (८-३-२३)

मः अनुस्वारः इति द्विपदं सूत्रम्। अनेन सूत्रेण अनुस्वारः विधीयते। मान्तस्य पदस्यानुस्वारः स्यात् हलि।

यथा -**हरिं वन्दे**। हरिम् +वन्दे इत्यत्र 'मोऽनुस्वारः'इति सूत्रेण अनुस्वारे हरिं वन्दे इति रूपम्।

९. नश्चापदान्तस्य झलि। (८-३-२४)

नः च अपदान्तस्य झलि इति चतुष्पदं सूत्रम्। अनेन सूत्रेण अनुस्वारः विधीयते। नस्य मस्य च अपदान्तस्य झल्यनुस्वारः स्यात्।

यथा - **यशांसि**। यशान् + सि इत्यत्र 'नश्चापदान्तस्य झलि'इति सूत्रेण नकारस्यानुस्वारे यशांसि इति रूपम्।
एवम् आक्रम् +स्यते - आक्रंस्यते।
झलि इति किम्? झलि परे एव अनुस्वारः।
मन् यते इत्यत्र झलः परत्वाभावात् नानुस्वारः। मन्यते इति।

को भेदः?	
मोऽनुस्वारः	**नश्चापदान्तस्य झलि**
१. मान्तं पदं भवेत्	१. अपदान्तं भवेत्
२. हल् परत्वेन	२. झल् परत्वेन
३. मकारस्य एव	३. नकारस्य मकारस्य वा
यथा - हरिं वन्दे	यथा -यशांसि, आक्रंस्यते।

अनुस्वारस्य परसवर्णः।

१०. अनुस्वारस्य ययि परसवर्णः। (८-४-५८)

त्रिपदं सूत्रम्। अनेन सूत्रेण परसवर्णः विधीयते। अनुस्वारस्य ययि परसवर्णः स्यात्।

यथा - शां + तः इत्यत्र 'अनुस्वारस्य ययि परसवर्णः'इति सूत्रेण परसवर्णे नकारे शान्तः इति रूपम्।

विकल्पेन अनुस्वारस्य परसवर्णः।

११. वा पदान्तस्य। (८-४-५९)

द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन परसवर्णः विधीयते। पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्।

यथा - त्वं + करोषि इत्यत्र 'वा पदान्तस्य'इति सूत्रेण विकल्पेन परसवर्णे त्वङ्करोषि इति रूपम्। परसवर्णाभावे त्वं करोषि इति रूपम्।

को भेदः? कुत्र साम्यता?	
अनुस्वारस्य ययि परसवर्णः	**वा पदान्तस्य**
१. नित्यत्वेन	१. पाक्षिकत्वेन
२. अनुस्वारस्य	२.पदान्तस्य अनुस्वारस्य
३. ययि परे	३. ययि परे
यथा - शान्तः	त्वङ्करोषि, त्वं करोषि

पुनरावृत्तिः (Recap)

- उदः स्थास्तम्भोः पूर्वस्य इति सूत्रेण हलः परसवर्णविधिः।
- तस्मादित्युत्तरस्य इति सूत्रेण परस्य स्थाने विधिः।
- आदेः परस्य इति सूत्रेण परस्यादौ स्यात्।
- झरो झरि सवर्णे इति सूत्रेण विकल्पेन झरः लोपः।
- खरि च इति सूत्रेण चर्त्वविधिः।
- झयो होऽन्यतरस्याम् इति सूत्रेण झयः विकल्पेन पूर्वसवर्णः।
- शश्छोऽटि इति सूत्रेण विकल्पेन छत्वविधिः।

SGOU

- छत्वममीति वाच्यम्वार्तिकेन छत्वं विधीयते।
- अनुस्वारस्य ययि परसवर्णः इति सूत्रेण अनुस्वारस्य परसवर्णः।
- वा पदान्तस्य इति सूत्रेण विकल्पेन अनुस्वारस्य परसवर्णः।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. 'छत्वममीति वाच्यम्'इत्यस्योदाहरणम् किम्?
२. मान्तस्य पदस्यानुस्वारः स्यात् ..... । (पूरयत)
३. अनुस्वारविधिः केन नियमेन विधीयते?
४. विकल्पेन छत्वं केन सूत्रेण?
५. उदः इत्यत्र का विभक्तिः?
६. नश्चापदान्तस्य झलि इति सूत्रस्यार्थे झलि इति किम्?
७. विकल्पेन झरः लोपः केन नियमेन?
८. वा पदान्तस्य इति सूत्रेण किम् विधीयते?
९. शश्छोऽटि इति सूत्रस्य एकं उदाहरणं लिखत।
१०. चर्त्वं विधीयमानं सूत्रं किम्?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. त्वङ्करोषि, त्वं करोषि इति रूपद्वयं कथम्?
२. मन् यते इत्यत्र नानुस्वारः कुतः?

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

१. झयो होऽन्यतरस्याम्।(सूत्रं व्याख्याता)
२. तद् + शिवः - सन्धत्त।

निर्दिष्टाभ्यासः (Assignments)

शान्तः - सन्धिकार्याणि स्पष्टयत।
शश्छोऽटि-छत्वमिति वाच्यम् अनयोः सूत्रयोः भेदः स्पष्टयत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. तच्छ्लोकेन।
२. हलि।

SGOU

३. मोऽनुस्वारः।
४. शश्छोऽटि।
५. पञ्चमी।
६. झलि परे एव अनुस्वारः। मन् यते इत्यत्र झलः परत्वाभावात् नानुस्वारः। मन्यते इति।
७. झरो झरि सवर्णे।
८. वा पदान्तस्य इति सूत्रेण विकल्पेन अनुस्वारस्य परसवर्णः।
९. तच्छिवः।
१०. खरि च।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डां कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-3

मो राजि समः क्वौ इति सूत्रादारभ्य शि तुक् इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- व्याकरणविषये प्राथमिकतत्त्वानां ज्ञानम्।
- हल्सन्धिकार्याणां ज्ञाम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- वार्तिकस्याशयं सोदाहरणं गृह्णाति।

प्राग्व्यपेक्षाः (Prerequisites)

भवद्भिः व्यञ्जनसन्ध्यां अनुस्वारसन्धिं चत्वसन्धिं, पाक्षिकेण छत्वविधानं च सम्यक् पठितवन्तः। अधुना व्यञ्जनसन्ध्यां आगमसन्धेः तत्रन्यानि सूत्राणि, तेषां मध्ये प्रयुक्तानि अन्यानि सूत्राणि च अस्मिन् पाठभागे प्रस्तूयते। श्रद्धया पठन्तु।

मुख्यपदानि (Key words)

मस्य मः, विकल्पेन मस्य मकारः, सानुनासिकाः यवलाः विधीयन्ते, विकल्पन मकारस्य नकारः, धुडागमः, आद्यन्तत्वे विधीयेते, कुक् टुक् इत्येतौ आगमौ, विकल्पेन वर्गद्वितीयादेशाः, विकल्पेन तुगागमः।

Discussion

मस्य मः

१. मो राजि समः क्वौ। (८-३-२५)

मः राजि समः क्वौ इति चतुष्पदं सूत्रम्। अनेन सूत्रेण मस्य म एव विधीयते। क्विबन्ते राजतौ परे समो मस्य म एव स्यात्।

यथा -**सम्राट्** । सम् + राट् इत्यत्र राज्शब्दः क्विबन्तः। अतः अनेन सूत्रेण समः मकारास्य म एव, सम्राट्। न तु अनुस्वारः।

विकल्पेन मस्य मकारः।

२. हे मपरे वा। (८-३-२६)

त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन मस्य मकारः स्यात्। मपरे हकारे परे मस्य मो वा स्यात्।

यथा - **किम्ह्वलयति**। किम् +ह्वलयति इत्यत्र मपरः हकारः परत्वेन वर्तमानत्वात् 'हे मपरे वा'इति सूत्रेण मकारे किम्ह्वलयति इति रूपम्।

मकाराभावे 'मोऽनुस्वारः'इति इत्यनुस्वारे **किं ह्वलयति**इति।

सानुनासिकाः यवलाः विधीयन्ते।

यवलपरे यवला वा। वार्तिकम्।

त्रिपदं वार्तिकमिदम्। अनेन वार्तिकेन सानुनासिकाः यवलाः विधीयन्ते। यवलाः परत्वेन वर्तन्ते चेत् यवलानां विकल्पेन सानुनासिकत्वं स्यात्।

य व ल परे हकारे (ह्य, ह्व, ह्ल) परे मकारस्य यथाक्रमं य्, व्, ल् आदेशाः वा स्युः।

यथा -**किय्ँ ह्यः**। किम् + ह्यः इत्यत्र यकारपरत्वेन हकारः वर्तमानत्वात् 'यवलपरे यवला वा'इति वार्तिकेन सानुनासिके यकारे किय्ँ ह्यः।

सानुनासिकयकारस्याभावे 'मोऽनुस्वारः'इत्यनुस्वारे **किं ह्यः**इति रूपम्।

एवं **किम् ह्वलयति - किव्ँ ह्वलयति - किं ह्वलयति**।

किम् ह्लादयति किव्ँ ह्लादयति - किं ह्लादयति।

विकल्पेन मकारस्य नकारः।

३. नपरे नः। (८-३-२७)

द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन मकारस्य नत्वं विधीयते।नपरे हकारे परे मस्य नो वा स्यात्।

यथा - **किन् ह्नुते**। किम् + ह्नुते इत्यत्र नपरे हकारे परत्वात् मकारस्य नत्वे किन् ह्नुते।

नकाराभावे 'मोऽनुस्वारः'इत्यनुस्वारे किं ह्नुते।

धुडागमः।

४. ङः सि धुट्। (८-३-२)

त्रिपदं सूत्रम्। अनेन सूत्रेण धुडागमः (धुट् आगमः) विधीयते। ङात्परस्य सस्य धुट् वा स्यात्।

यथा -**षट्सन्तः**। षड् सन्तः इत्यत्र 'ङः सि धुट्'इत्यनेन विकल्पेन धुडागमे टित्वात् आद्यावयवे षड् ध् सन्तः।'खरि च'इति चर्त्वे षड् त् सन्तः। पुनरपि चर्त्वे षट् त् सन्तः इति। धुडागमाभावे चर्त्वे षट्सन्तः।

आद्यन्तत्वे विधीयेते।

५. **आद्यन्तौ टकितौ। (१-१-४६)**

द्विपदं सूत्रम्। आदिः च अन्तः च आद्यन्तौ। टकारः इत् यस्य सः टित्। ककारः इत् यस्य सः कित्। टित् च कित् च टकितौ। टित्किती यस्योक्तौ तस्य आद्यान्तावयवौ स्तः।

यथा - **षड् सन्तः** इत्यत्र 'ङः सि धुट्'इति धुडागमः। धुटि ट् इत्। अनेन परिभाषासूत्रेण टित्त्वात् आद्यावयवे षड् ध् सन्तः। 'खरि च'इति चर्त्वे षड् त् सन्तः। पुनरपि चर्त्वे षट् त् सन्तः इति रूपम्।

कुक् टुक्इत्येतौ आगमौ विकल्पेन।

६. ङ्णोः कुक्टुक् शरि।(८-३-२८)

त्रिपदं सूत्रम्। अनेन सूत्रेण कुक्टुक् इत्येतौ आगमौ विधीयेते। ङकारणकारयोः कुक्टुकौ आगमौ स्तः शरि। यथा - प्राङ् षष्ठः इति स्थिते 'ङ्णोः कुक्टुक् शरि'इति सूत्रेण विकल्पेन कुगागमे प्राङ् क् षष्ठः।

वर्गद्वितीयादेशाः।

वार्तिकम्।

चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्।

चयः द्वितीयाः शरि पौष्करसादेः इति वाच्यम् इति षट् पदानि सन्ति। अनेन वार्तिकेन वर्गद्वितीयाः विकल्पेन विधीयन्ते।

Note :पौष्करसादिः पाणिनेः पूर्वतनः कश्चन वैयाकरणाचार्यः। आचार्याणां नामानि सूत्रेषु सन्ति चेत् तैः विधीयमानानि कार्याणि पाक्षिकाणि भवन्ति। शरि परे झयः स्थाने विकल्पेन वर्गद्वितीयाः स्युः पौष्करसादेः मते।

यथा - प्राङ् षष्ठः इत्यत्र 'ङ्णोः कुक्टुक् शरि'इति सूत्रेण विकल्पेन कुगागमे प्राङ् क् षष्ठः। 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्'इति वार्तिकेन वर्गद्वितीये प्राङ् ख् षष्ठः। वर्गद्वितीयाभावे प्राङ् क् षष्ठः, प्रङ्क्षष्ठः। कुगागमाभावे प्राङ् षष्ठः।

एवं सुगण् ठ् षष्ठः, सुगण् ट् षष्ठः, सुगण् षष्ठः।

सन्धत्त -सुगण् षष्ठः।

सुगण् ट् षष्ठः - ङ्णोः कुक्टुक् शरि।
सुगण् ठ् षष्ठः - चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्।
सुगण् ट् षष्ठः - वर्गद्वितीयीभावे
सुगण् षष्ठः - टुगः अभावे।

७. नश्च। (८-३-३०)

नः च इति द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन धुडागमः विधीयते। नान्तात्परस्य सस्य धुड् वा स्यात्।

यथा - **सन्सः**। सन् +सः इत्यत्र 'नश्च'इति सूत्रेण विकल्पेन धुडागमे सन् ध् सः। 'खरि च'इति सूत्रेण चर्त्वे सन्त्सः इति रूपम्। धुडागमाभावे सन् सः।

साम्यता विरुद्धता च।		
भेदः	**ङः सि धुट्**	**नश्च**
	टात्परस्य सस्य धुट् वा	नान्तात्परस्य सस्य धुट् वा
साम्यता (समानता)	सस्य धुट्	सस्य धुट्
उदाहरणम्	षट् त् सन्तः	सन्सः

SGOU

विकल्पेन तुगागमः।

८. शि तुक्। (८-३-३१)

द्विपदं सूत्रम् अनेन सूत्रेण विकल्पेन तुगागमः विधीयते। पदान्तस्य नस्य शे परे तुग्वा स्यात्।

यथा -**सञ्छम्भुः - सञ्च्छम्भुः - सञ्च्छम्भुः**। सन् शम्भुः इत्यत्र 'शि तुक्'इति सूत्रेण विकल्पेन तुगागमे सन् त् शम्भुः। 'स्तोः श्चुना श्चुः'इति सूत्रेण तकारस्य श्चुत्वे सन् च् शम्भुः। पुनरपि श्चुत्वे नकारस्य ञत्वे सञ् च् शम्भुः। 'शश्छोऽटि'इति सूत्रेण शकारस्य विकल्पेन छत्वे सञ् च् छम्भुः। 'झरो झरि सवर्णे'इति सूत्रेण वैकल्पिकत्वेन झरः चकारलोपे सञ्छम्भुः इति रूपम्।

चकारस्य लोपाभावपक्षे सञ्च्छम्भुः।

छत्वाभावे चकारस्य लोपाभावे च सञ्च्छम्भुः।

'शि तुक्'इति तुगभावे श्चुत्वे सञ्शम्भुः इति चतुर्थं रूपम्।

पुनरावृत्तिः (Recap)

- मो राजि समः क्वौ इति सूत्रेण मस्य मः।
- हे मपरे वा इति सूत्रेण विकल्पेन मस्य मकारः।
- यवलपरे यवला वा इति वार्तिकेन सानुनासिकाः यवलाः विधीयन्ते।
- नपरे नः इति सूत्रेण विकल्पेन मकारस्य नकारः।
- डः सि धुट्इति सूत्रेण धुडागमः।
- आद्यन्तौ टकितौ इति सूत्रेण आद्यन्तत्वे विधीयेते।
- ङ्णोः कुक्टुक् शरि इति सूत्रेण कुक् टुक् इत्येतौ आगमौ विकल्पेन।
- चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् इति वार्तिकेन वर्गाद्वितीयादेशाः।
- डः सि धुट्, नश्च इत्योतौ सूत्राभ्यां विकल्पेन धुडागमः।
- शि तुक् इति सूत्रेण विकल्पेन तुगागमः।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. ङ्णोः कुक् टुक् ..... । (पूरयत)
२. केन सूत्रेण विकल्पेन तुगागमः विधीयते?
३. चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् इति वार्तिकेन विधीयमानं कार्यं किम्?
४. विकल्पेन मकारस्य नत्वं विधायकसूत्रं किम्?
५. विकल्पेन धुडागमं विधीयमानं सूत्रं किम्?
६. ङ्णोः कुक्टुक् शरि इति सूत्रेण किं विधीयते?
७. सन्सः इति रूपे धुडागमः कथम्?
८. क्विबन्ते राजतौ परे समो ..... म एव स्यात्। (पूरयत)
९. यवलापरे यवला वा इति वार्तिकस्य उदाहरणानि लिखत।
१०. टित् कः?

SGOU

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. सम् + राट्इत्यत्र अनुस्वारः न भवति । कुतः?
२. हे मपरे वा इति सूत्रस्य अर्थः कः?
३. आद्यन्तौ टकितौ इति सूत्रस्य प्रयोजनं किम्?

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

१. किम्ह्वलयति - किं ह्वलयति अनयोः भेदः स्पष्टयत।
२. डः सि धुट् इति सूत्रं व्याख्याता।

निर्दिष्टाभ्यासः (Assignments)

सुगण् षष्ठः - सप्रमाणं सन्धत्त।
सञ्छम्भुः - सञ्च्छम्भुः - सञ्च्छम्भुः - सञ्शम्भुः इत्यादि रूपाणां सप्रमाणं सन्धत्त।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. शरि।
२. शि तुक् इति सूत्रेण तुगागमः विधीयते।
३. चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् इति वार्तिकेन वर्गद्वितीयाः विकल्पेन विधीयन्ते।
४. नपरे नः।
५. डः सि धुट्।
६. कुक् टुक् इत्येतौ आगमौ विकल्पेन।
७. नश्च इति सूत्रेण
८. मस्य।
९. किय्ँ ह्यः-किं ह्यः, किव्ँ ह्वलयति - किं ह्वलयति, किव्ँ ह्लादयति - किं ह्लादयति।
१०. टकारः इत् यस्य सः टित्।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

SGOU

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५

२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७

३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-4

ङमो ह्रस्वादचि ङमुण्नित्यम् इति सूत्रादारभ्य पदान्ताद्वा इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- व्याकरणविषये प्राथमिकतत्त्वानां ज्ञानम्।
- हल्सन्धिकार्याणां प्रक्रियावगमनम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- वार्तिकस्याशयं सोदाहरणं गृह्णाति।

प्राग्व्यपेक्षाः (Prerequisites)

भाषायाः प्रयोगे व्यवहारे च व्यञ्जनसन्ध्यां आगमसन्धिविषयकाणां सूत्राणां ज्ञानम् आवश्यकं भवति। अस्मिन् एकके तुगागमसन्धौ प्रयुक्तानि सूत्राणि, अनुबन्धानि अन्यानि सूत्राणि च पठामः।

मुख्यपदानि (Key words)

ङमुडागमः, मकारस्य रेफादेशविधिः, रेफस्य विकल्पेन अनुनासिकः रेफपूर्वस्यानुस्वारागमः, रेफस्य विसर्गादेशः, विसर्गस्य सकारादेशः, मस्य रुत्वं, नान्तस्य रुत्वं, विसर्गस्य सकारः, आम्रेडितसंज्ञा, तुगागमः, विकल्पेन तुगागमः

Discussion

ङमुडागमः

१. ङमो ह्रस्वादचि ङमुण्नित्यम्। (८-३-३२)

ङमः ह्रस्वात् अचि ङमुट् नित्यम् इति पञ्च पदानि सन्ति। अनेन सूत्रेण ङमुडागमः विधीयते। ङम् इति प्रत्याहारे ङणनाः सन्ति। ङमुडि ङट् णट् नट् च सन्ति। ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्य अचो नित्यं ङमुडागमः स्यात्।

यथा- **प्रत्यङ्ङात्मा**। प्रत्यङ् + आत्मा इत्यत्र 'ङमो ह्रस्वादचि ङमुण्नित्यम्'इति सूत्रेण ङमुडागमे प्रत्यङ् ङ् आत्मा, प्रत्यङ्ङात्मा इति।

एवं सुगण् ईशः - **सुगण्णीशः**।

सन् अच्युतः - **सन्नच्युतः**।

मकारस्य रेफादेशविधिः।

२. समः सुटि। (८-३-५)

SGOU

द्विपदं सूत्रम्। अनेन सूत्रेण मकारस्य रुत्वं विधीयते। समो रुः स्यात् सुटि।

यथा - सम् + कर्ता इत्यत्र 'सम्परिभ्यां करोतौ भूषणे'इति सुटि अनुबन्धलोपे सम् स् कर्ता।

अत्र 'समः सुटि'इति सूत्रेण मकारस्य रुत्वे सर् स् कर्ता।

Noteः अनुबन्धलोपः - सुडागमे ट्, उ इत्येतौ इतौ। तयोः लोपः स्यात्। तादृश्याः प्रक्रियायाः संक्षिप्तं रूपं भवति अनुबन्धलोपः इति।

रेफस्य विकल्पेन अनुनासिकः

३. अत्रानुनासिकः पूर्वस्य तु वा। (८-३-२)

पञ्चपदं सूत्रम्। अनेन सूत्रेण वैकल्पिकेन अनुनासिकः विधीयते। अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्।

यथा - सम् कर्ता इत्यत्र 'सम्परिभ्यां करोतौ भूषणे'इति सुडागमे सम् स् कर्ता। 'समः सुटि'इति मस्य रुत्वे सर् स् कर्ता। 'अत्रानुनासिकः पूर्वस्य तु वा'इति सूत्रेण अनुनासिके सँर् स्कर्ता।

रेफपूर्वस्यानुस्वारागमः।

४. अनुनासिकात्परोऽनुस्वारः। (८-३-४)

अनुनासिकात् परः अनुस्वारः इति त्रिपदं सूत्रम्। अनेन सूत्रेण अनुस्वारागमः विधीयते। अनुनासिकं विहाय रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात्।

यथा - सम् कर्ता इत्यत्र 'सम्परिभ्यां करोतौ भूषणे'इति सुडागमे सम् स् कर्ता। 'समः सुटि'इति मस्य रुत्वे सर् स्कर्ता। 'अनुनासिकात्परोऽनुस्वारः'इति सूत्रेण अनुस्वारागमे संर् स्कर्ता।

रेफस्य विसर्गादेशः।

५. खरवसानयोर्विसर्जनीयः। (८-३-१५)

खरवसानयोः विसर्जनीयः इति द्विपदं सूत्रम्। अनेन रेफस्य विसर्गः विधीयते। खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात्।

यथा - संर् स्कर्ता इत्यत्र 'खरवसानयोर्विसर्जनीयः'इति विसर्गे संः स्कर्ता इति।

विसर्गस्य सकारादेशः।

वार्तिकम् - सम्पुम्कानां सो वक्तव्यः।

सम्पुम्कानां सः वक्तव्यः इति त्रिपदं वार्तिकम्। अनेन वार्तिकेन रेफस्य सकारः विधीयते। सम्पुम्कानां सम्बन्धः यः विसर्गः तस्य सकारः आदेशत्वेन स्यात्।

यथा - संः स्कर्ता इत्यत्र 'सम्पुम्कानां सो वक्तव्यः'इति वार्तिकेन सत्वे संस्कर्ता इति रूपम्।

सन्धत्त - संस्कर्ता - सँस्कर्ता। सम् कर्ता इत्यत्र 'सम्परिभ्यां करोतौ भूषणे'इति सूत्रेण सुडागमे सम् स् कर्ता। 'समः सुटि'इति मस्य रुत्वे सर् स् कर्ता। 'अत्रानुनासिकः पूर्वस्य तु वा'इति सूत्रेण विकल्पेन अनुनासिके सँर्

स्कर्ता। 'अनुनासिकात्परोऽनुस्वारः'इति अनुस्वारे संर् स्कर्ता। 'खरवसानयोर्विसर्जनीयः'इति रेफस्य विसर्गे संः स्कर्ता। अनुनासिकपक्षे सँः स्कर्ता। 'सम्पुम्कानां सो वक्तव्यः'इति इति विसर्गस्य सत्वे संस्कर्ता इति। अनुनासिकपक्षे सँस्कर्ता इति रूपम्।

६. पुमः खय्यम्परे। (८-३-२)

पुमः खयि अम्परे इति त्रिपदं सूत्रम्। अनेन सूत्रेण मस्य रुत्वं विधीयते। अम्परे खयि पुमो रुः स्यात्।

यथा - **पुम् कोकिलः** इति स्थिते 'पुमः खय्यम्परे इति इति सूत्रेण रुत्वे पुर् कोकिलः। 'अत्रानुनासिकः पूर्वस्य तु वा'इति विकल्पेन अनुनासिके पुँर् कोकिलः। 'खरवसानयोर्विसर्जनीयः'इति विसर्गे पुँःकोकिलः। 'सम्पुम्कानां सो वक्तव्यः'इति वार्तिकेन रेफस्य सकारे पुँस्कोकिलः इति रूपम्।

अनुनासिकाभावे 'अनुनासिकात्परोऽनुस्वारः'इत्यनुसारे पुंस्कोकिलः इति रूपम्।

नान्तस्य रुत्वम्।

७. नश्छव्यप्रशान्। (८-३-७)

नः छवि अप्रशान् इति त्रिपदं सूत्रम्। अनेन सूत्रेण नस्य रुत्वं विधीयते। अम्परे छवि नान्तस्य पदस्य रुः स्यात्।

यथा - चक्रिन् त्रायस्व इत्यत्र 'नश्छव्यप्रशान्'इति सूत्रेण रुत्वे चक्रिर् त्रायस्व।

८. विसर्जनीयस्य सः। (८-३-३४)

द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य सकारः विधीयते। खरि विसर्जनीयस्य सः स्यात्।

यथा - **चक्रिंस्त्रायस्व**। चक्रिन् त्रायस्व इत्यत्र 'नश्छव्यप्रशान्'इति सूत्रेण नस्य रुत्वे चक्रिर् त्रायस्व। 'अत्रानुनासिकः पूर्वस्य तु वा इति' विकल्पेन अनुनासिकागमे चक्रिँर् त्रायस्व। 'खरवसानयोर्विसर्जनीयः'इति विसर्गे चक्रिँः त्रायस्व। 'विसर्जनीयस्य सः'इति विसर्गस्य सत्वे चक्रिँस्त्रायस्व इति रूपम्। अनुनासिकाभावे 'अनुनासिकात्परोऽनुस्वारः'इत्यनुस्वारे चक्रिंस्त्रायस्व इति रूपम्।

'नश्छव्यप्रश्नान्'इत्यत्र अप्रश्नान् इति किम्? प्रश्नान् इत्यत्र रुत्वं न।

यथा - प्रश्नान् तनोति।

पदान्तस्य इति किम्? पदान्तस्य नस्य रुत्वम्। हन् ति इत्यत्र पदान्ताभावात् न रुत्वम्।

९. नॄन् पे। (८-३-१०)

द्विपदं सूत्रम्। अनेन सूत्रेण नस्य रुत्वं विधीयते। नॄन् इत्यस्य रुः स्यात् पकारे परे।

यथा -**नॄः पाहि**। नॄन् पाहि इत्यत्र 'नॄन् पे'इति सूत्रेण रुत्वे नॄः पाहि।

विसर्गस्य ≍क ≍पौ विसर्गः च विधीयते विकल्पेन।

१०. कुप्वोः ≍क ≍ पौ च। (८-३-३७)

कुप्वोः ≍क ≍पौ च इति त्रिपदं सूत्रम्। अनेन सूत्रेण ≍क ≍पौ विसर्गः च विधीयन्ते। कवर्गे पवर्गे च परे विसर्गस्य ≍ क ≍ पौ स्तः। चाद्विसर्गः।

यथा - **नॄन् पाहि** इत्यत्र 'नॄन् पे'इति सूत्रेण नस्य रुत्वे नॄर् पाहि। 'अत्रानुनासिकः पूर्वस्य तु वा'इति विकल्पेन अनुनासिके नॄँर् पाहि। 'खरवसानयोर्विसर्जनीयः'इति रेफस्य विसर्गे नॄँः पाहि। 'कुप्वो ≍क ≍पौ च'इति सूत्रेण विभाषया उपाध्मानीये नॄँ ≍पाहि ।

(≍प ≍फ - पफाभ्यां प्रागर्धविसर्गसदृशः उपाध्मानीयः)

सन्धत्त - नॄन् पाहि इत्यत्र 'नॄन् पे'इति नस्य रुत्वे नॄन् पाहि। 'अत्रानुनासिकः पूर्वस्य तु वा'इत्यनेन विभाषया अनुनासिके नॄँर् पाहि। 'खरवसानयोर्विसर्जनीयः'इति विसर्गे नॄँः पाहि। 'कुप्वोः ≍ क ≍ पौ च'इति वैकल्पिकेन उपध्मानीये **नॄँ ≍पाहि।**(१)

अनुनासिकाभावपक्षे - 'अनुनासिकात्परोऽनुस्वारः'इत्यनुस्वारे **नॄं ≍पाहि**। (२)

उपध्मानीयाभावपक्षे - **नॄँः पाहि**।(३)

अनुस्वारपक्षे - **नॄं पाहि**। (४)

रुत्वाभावे - **नॄन् पाहि**। (५)

आम्रेडितसंज्ञा।

११.तस्य परमाम्रेडितम्। (८-१-२)

तस्य परम् आम्रेडितम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण आम्रेडितसंज्ञः विधीयते। द्विरुक्तस्य परं रूपमाम्रेडितं स्यात्।

यथा - कान् कान् इत्यत्र परस्य कान् इत्यस्य आम्रेडितसंज्ञा।

एवं 'तान् तान् इत्यत्र परस्य तान् इत्यस्याम्रेडितत्वम्। 'कानाम्रेडिते'इत्यादावस्य प्रयोजनम्।

१२.कानाम्रेडिते। (६-१-७३)

कान् आम्रेडिते इति द्विपदं सूत्रम्। अनेन सूत्रेण नकारस्य रुत्वं विधीयते। कान्नकारस्य रुः स्यादाम्रेडिते परे।

यथा -**कांस्कान्-काँस्कान्**। कान् कान् इति स्थिते 'कानाम्रेडिते इति सूत्रेण आम्रेडितसंज्ञकस्य पूर्वस्य नकारस्य रुत्वे कार् कान्। 'अत्रानुनासिकः पूर्वस्य तु वा'इति इति विकल्पेन अनुनासिके काँर् कान्। 'खरवसानयोर्विसर्जनीयः'इति विसर्गे काँः कान्। 'सम्पुम्कानां सो वक्तव्यः'इति वार्तिकेन सत्वे काँस्कान् इति रूपम्।

अनुनासिकाभावे 'अनुनासिकात्परोऽनुस्वारः'इत्यनुस्वारे कांस्कान् इति।

तुगागमः।

१३. छे च। (६-१-७३)

द्विपदं सूत्रम् अनेन सूत्रेण तुगागमः विधीयते। ह्रस्वस्य छे परे तुगागमः स्यात्।

यथा - **शिवच्छाया।** शिव + छाया इत्यत्प 'छे च'इति सूत्रेण तुगागमे शिव त् छाया। 'स्तोः श्चुना श्चुः'इति श्चुत्वे शिवच्छाया इति रूपम्।

१४. पदान्ताद्वा। (६-१-७६)

पदान्तात् वा इति द्विपदं सूत्रम्। अनेन सूत्रेण वैकल्पिकेन तुगागमः विधीयते।

दीर्घात् पदान्ताच्छे परे तुग्वा स्यात्।

यथा -**लक्ष्मीच्छाया-लक्ष्मी छाया**। लक्ष्मी + छाया इत्यत्र 'पदान्ताद्वा'इति सूत्रेण तुगागमे लक्ष्मी त् छाया। 'स्तोः श्चुना श्चुः'इति श्चुत्वे लक्ष्मीच्छाया इति रूपम्।

तुगागमाभावे लक्ष्मी छाया इति रूपम्।

भेदज्ञानम्	
छे च	**पदान्ताद्वा**
तुगागमः ह्रस्वात् छे परे शिव छाया - शिवच्छाया	विकल्पेन तुगागमः पदान्तात् दीर्घात् छे परे लक्ष्मी छाया - लक्ष्मीच्छाया, लक्ष्मी छाया वा

अस्य खण्डस्य संक्षिप्तीकरणम्।

सन्धिनाम	**विधीयमानं सूत्रम्/वार्तिकम्**	**उदाहरणम्**	**सविशेषता**
छत्वविधिः	शश्छोऽटि छत्वमिति वाच्यम्	तच्छिवः,तच्शिवः, तच्छ्लोकेन	वैकल्पिकेन वार्तिकम्
परसवर्णः	अनुस्वारस्य ययि परसवर्णः	शान्तः	
टिकितौ	आद्यन्तौ टकितौ	षट् त् सन्तः	आद्यन्ताावयवौ अनेन विधीयते
कुक्टुगौ आगमौ	ङ्णोः कुक्टुक् शरि	प्राङ्ख् षष्ठः, प्राङ्क् षष्ठः, प्राङ् षष्ठः	वैकल्पिकत्वेन
धुडागमः	ङः सि धुट् नश्च	षट् त् सन्तः, षट् सन्तः, सन्त्सः, सन्सः	वैकल्पिकत्वेन वैकल्पिकत्वेन
ङमुडागमः	ङमो ह्रस्वादचि ङमुण्नित्यम्	प्रत्यङ्ङात्मा, सन्नच्युतः	
विसर्गः	खरवसानयोर्विसर्जनीयः	संस्कर्ता	
अनुस्वारः	मोऽनुस्वारः नश्चापदान्तस्य झलि	हरिं वन्दे, यशांसि,आक्रंस्यते	
विकल्पेन परसवर्णः	वा पदान्तस्य	त्वङ्करोषि, त्वं करोषि	वैकल्पिकेन

SGOU

संज्ञा/सन्धिकार्यम्	सूत्रम्	उदाहरणम्	सविशेषता	उदाहरणसूत्रम्
१. आम्रेडितम्	तस्य परमाम्रेडितम्	कान् कान् इत्यस्य द्वितीयः कान्		कानाम्रेडिते
२. तुगागमः	छे च पदान्ताद्वा	शिवच्छाया लक्ष्मीच्छाया लक्ष्मी छाया वा	विकल्पेन	
३. विसर्गस्य सः	विसर्जनीयस्य सः	संस्कर्ता		

पुनरावृत्तिः (Recap)

- ङमो ह्रस्वादचि ङमुण्नित्यम् इति सूत्रेण ङमुडागमः विधीयते।
- समः सुटि इति सूत्रेण मकारस्य रेफादेशविधिः।
- अत्रानुनासिकः पूर्वस्य तु वा इति सूत्रेण रेफस्य विकल्पेन अनुनासिकः।
- अनुनासिकात्परोऽनुस्वारः इति सूत्रेण रेफपूर्वस्यानुस्वारागमः।
- खरवसानयोर्विसर्जनीयः इति सूत्रेण रेफस्य विसर्गादेशः।
- सम्पुम्कानां सो वक्तव्यः इति वार्तिकेन विसर्गस्य सकारादेशः।
- पुमः खय्यम्परे इति सूत्रेण पुमो रुत्वं स्यात्।
- नश्छव्यप्रशान् इति सूत्रेण नान्तस्य रुत्वम्।
- विसर्जनीयस्य सः इति सूत्रेण विसर्गस्य सकारः विधीयते।
- नॄन् पे इति सूत्रेण नॄन् इत्यस्य रुः स्यात्।
- तस्य परमाम्रेडितम् इति सूत्रेण आम्रेडितसंज्ञः।
- कानाम्रेडिते इति सूत्रेण नकारस्य रुत्वम्।
- छे च इति सूत्रेण तुगागमः।
- पदान्ताद्वा इति सूत्रेण वैकल्पिकेन तुगागमः।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. रेफस्य विसर्गः केन सूत्रेण विधीयते?
२. पटत् पटत् इत्यत्र द्वितीयस्य पटत् इत्यस्य का संज्ञा?
३. केन सूत्रेण तुगागमः विधीयते?
४. वैकल्पिकेन तुगागमः केन सूत्रेण विधीयते?
५. आम्रेडितसंज्ञायाः उदाहरणसूत्रं किम्?

SGOU

६. नॄन् पे इति सूत्रेण किं विधीयते?
७. रेफस्य विकल्पेन अनुनासिकः सूत्रं किम्?
८. विसर्गस्य सकारादेशः केन वार्तिकेन?
९. समः सुटि इति सूत्रेण किं विधीयते?
१०. नान्तस्य रुत्वम् केन सूत्रेण?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. सम्पुङ्कानां सो वक्तव्यः इति वार्तिकस्य कोऽर्थः?
२. नश्चव्यप्रश्नान् इत्यत्र अप्रश्नान् इति किम्?

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

सूत्रं व्याख्यात-

१. ङमो ह्रस्वादचि ङमुण्नित्यम्।
२. तस्य परमाम्रेडितम्।

निर्दिष्टाभ्यासः (Assignments)

१. पुम् + कोकिलः - सन्धत्त।
२. लक्ष्मीच्छाया - लक्ष्मीछाया सप्रमाणं सन्धत्त।
३. सम् कर्ता - सप्रमाणं सन्धत्त।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. विसर्जनीयस्य सः।
२. आम्रेडितम्।
३. 'शि तुक्', 'छे च'इति सूत्राभ्यां तुगागमः विधीयेते।
४. 'वा पदान्तस्य'इति सूत्रेण वैकल्पिकेन तुगागमः विधीयते।
५. 'कानाम्रेडिते'इति उदाहरणसूत्रम्।
६. नॄन् इत्यस्य रुः।
७. अत्रानुनासिकः पूर्वस्य तु वा।
८. सम्पुम्कानां सो वक्तव्यः।
९. मकारस्य रेफादेशविधिः।
१०. नश्छव्यप्रशान्।

SGOU

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, २०११

SGOU

BLOCK - 4

लघुसिद्धान्तकौमुदी-
विसर्गसन्धिः
कारकप्रकरणं च-
विस्तरेण अध्ययनम्

SGOU

Unit-1

विसर्गसन्धिः

उद्देश्यानि (Learning Outcomes)

- विसर्गसन्धिं अधिकृत्यावगमनम्।
- सन्धिकार्याणां ज्ञानम्।
- पदानां सन्धिं सन्धिच्छेदं च कर्त्तुं शक्यते।
- विसर्गसन्धिं सामान्यतया अवगच्छति।

प्राग्व्यपेक्षाः (Prerequisites)

स्वरव्यञ्जनसन्ध्योरनन्तर प्रतिपाद्यते विसर्गसन्धिम्। यत्र विसर्गस्य विकारः दृश्यते तत्रैव विसर्गसन्धिः। विसर्गस्य रेफादेशः, विसर्गस्य सकारादेशः, विसर्गलोपः, विसर्गस्य उत्वं, विसर्गस्य यादेशः, नकारस्य रुत्वं च अत्र विशदयन्ति।

मुख्यपदानि (Key words)

विसर्गस्य रेफादेशः, विसर्गस्य सकारादेशः, विसर्गलोपः, विसर्गस्य उत्वं, विसगस्य यादेशः, नकारस्य रुत्वं, रेफस्य लोपः, पूर्वस्य अणः दीर्घः, परं कार्यम्।

Discussion

१. विसर्जनीयस्य सः(८-३-३४)

विसर्जनीयस्य सः इति पदद्वयम्।'खरवसानयार्विसर्जनीयः'इत्यतः खरि इति अनुवर्तते। खरि विसर्जनीयस्य सः स्यात्। खरि (सप्तमी) - खरि परे। खर् - ख फ छ ठ थ च ट त क प श ष स। विसर्जनीयस्य (षष्ठी) - विसर्गस्य स्थाने। सः (प्रथमा) - सकारः स्यात्।

यथा - **विष्णुस्त्राता**। विष्णुः + त्राता इति स्थिते 'विसर्जनीयस्य सः'इति सूत्रेण तकारे परे (खरि परे) विसर्गस्य स्थाने सकारादेशे विष्णुस्त्राता इति रूपम्।

एवं **शिरश्छेदम्** -शिरः + छेदम् इति स्थिते छकारे परे (खरि परे) 'विसर्जनीयस्य सः'इत्यनेन विसर्गस्य सकारादेशे शिरस् छेदम् इति स्थिते 'स्तोःश्चुना श्चुः'इति सूत्रेण सकारस्य श्चुत्वे (शकारादेशे) शिरश्छेदम् इति रूपम् ।

२. वा शरि (८-३-३६)

SGOU

वा शरि इति पदद्वयम्। 'विसर्जनीयस्य सः'इत्यतः विसर्जनीयस्य इति 'शर्परे विसर्जनीयः'इत्यतः विसर्जनीयः इति च अनुवर्तते। शरि विसर्गस्य विसर्गो वा स्यात्। शरि (सप्तमी) - शर्परे। शर् श ष स। विसर्जनीयस्य (षष्ठी) - विसर्गस्य स्थाने विसर्जनीयः (प्रथमा) - विसर्गः वा - विकल्पेन भवति।

यथा - **हरिश्शेते**। हरिः +शेते इति स्थिते 'वा शरि' इति सूत्रेण शकारे परे विसर्गस्य विसर्गादेशे हरिः शेते इति रूपम् । तदभावे 'विसर्जनीयस्य सः'इति सूत्रेण शकारपरे (खरि परे) विसर्गस्य सकारादेशत्वात् हरिस् शेते इति जाते 'स्तोः श्चुना श्चुः'इति सूत्रेण सकारस्य शकारादेशत्वात् हरिश्शेते इति रूपम्।

१. हरिः + शेते - हरिःशेते (वा शरि)

२. हरिः + शेते - हरिस् शेते (विसर्जनीयस्य सः)

हरिश्शेते (स्तोः श्चुना श्चुः)

एवं मनः सुखम् - **मनस्सुखम्**, मनः शल्यम् - **मनश्शल्यम्**, इत्याद्युदाहरणानि द्रष्टव्यानि।

३. ससजुषो रुः। (८-२-६६)

ससजुषोः रुः इति पदच्छेदः। अनेन सूत्रेण रुत्वं विधीयते। सश्च सजुष् च ससजुषौ, तयोः ससजुषोः। पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात् । पदान्तस्य सस्य - पदान्तस्य सकारस्य, सजुष्शब्दस्य - सजुष् शब्दान्तं यत् पदं तदन्तस्य षकारस्य रुः स्यात् ।

यथा - **रामः**। रामशब्दात् प्रथमाविभक्तौ एकवचने सुप्रत्यये अनुबन्धलोपे च रामस् इति स्थिते 'ससजुषो रुः'इति सूत्रेण पदान्तस्य रुत्वे रामर्। 'खरवसानयोर्विसर्जनीयः'इति सूत्रेण रेफस्य विसर्गादेशत्वात् रामः इति रूपम्।

राम स् - राम र् (ससजुषो रुः)

रामः (खरवसानयोर्विसर्जनीयः)

४. अतो रोरप्लुतादप्लुते। (६-१-११३)

अतः रोः अप्लुतात् अप्लुते इति चतुष्पदम् सूत्रम् । अनेन सूत्रेण रोः उत्वं विधीयते । 'ऋत उत्'इत्यतः उः इत्यनुवर्तते। अप्लुताकारात् परस्य रोः (षष्ठी) स्थाने (रेफस्य स्थाने) अप्लुते अति (अप्लुते अकारे परे) उः उकारः आदेशः स्यात् । अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति।

यथा -**शिवोऽर्च्यः**। शिवस् + अर्च्यः इति स्थिते 'ससजुषो रुः'इति सूत्रेण सकारस्य रुत्वे शिव र् अर्च्यः। 'अतो रोरप्लुतादप्लुते'इति सूत्रेण रेफस्य उकारादेशे शिव उ अर्च्यः इति संजाते 'आद्गुणः'इति सूत्रेण वकारात्परस्य अकारस्य उकारस्य च स्थाने ओकारादेशे शिव् ओ अर्च्यः, शिवो अर्च्यः। 'एङः पदान्तादति'इति सूत्रेण पूर्वरूपे शिवोऽर्च्यः इति रूपम्।

शिवस् अर्च्यः - शिव र् अर्च्यः (ससजुषो रुः)

शिव उ अर्च्यः - (अतो रोरप्लुतादप्लुते)

शिव् ओ अर्च्यः (आद्गुणः)

शिवोऽर्च्यः (एङः पदान्तादति)

५. हशि च। (६-१-११४)

हशि च इति द्विपदं सूत्रम्। अनेन सूत्रेण उत्वं विधीयते। 'अतो रोरप्लुतादप्लुते'इत्यतः अतः रोः अप्लुतात् इति, 'ऋतः उत्'इत्यतः उत् इति च अनुवर्तते। अप्लुतात् अतः परस्य रोः उः स्यात् हशि। अप्लुतात् अतः - अप्लुताकारात् परस्य रोः (षष्ठी) - रोः स्थाने (रेफस्य स्थाने) हशि (सप्तमी) - हशि परे (हश् ह य व र ल ञ म ङ म न झ भ घ ढ ध ज ब ग ड द)। उः (प्रथमा) उकारादेशः स्यात्।

यथा - **शिवो वन्द्यः**। शिवस् वन्द्यः इत्यत्र 'ससजुषो रुः'इति रुत्वे शिवर् वन्द्यः इति स्थिते 'हशि च'इति सूत्रेण रेफस्य उकारादेशे शिव उ वन्द्यः इति। 'आद्गुणः'इति सूत्रेण वकारात्परस्य अकारस्य उकारस्य च स्थाने गुणादेशे (ओकारादेशे) शिवो वन्द्यः इति रूपं सिद्धम्।

शिवर् वन्द्यः - शिव उ वन्द्यः (हशि च)

शिवो वन्द्यः - (आद्गुणः)

६. भो भगोअघोअपूर्वस्य योऽशि। (८-३-१७)

भो-भगो-अघो अपूर्वस्य, यः, अशि इति पदत्रयम्। 'रोऽसुपि'इत्यतः रोः इत्यनुवर्तते। अनेन सूत्रेण रेफस्य यादेशः विधीयते। भो भगोअघोअपूर्वस्य रोः यादेशः स्यात् अशि परे।

यथा - **भो देवाः**। भोस् देवाः इति स्थिते 'ससजुषो रुः'इति रुत्वे भोर् देवाः। 'भो भगोअघोअपूर्वस्य योऽशि'इति सूत्रेण रेफस्य यादेशे भोय् देवाः। 'हलि सर्वेषाम्'इति सूत्रेण यकारस्य लोपे भो देवाः।

एवं भगोस् नमस्ते - **भगो नमस्ते**। अघोस् याहि - **अघो याहि**।

७. हलि सर्वेषाम्। (८-३-२२)

द्विपदं सूत्रम्। अनेन सूत्रेण यकारस्य लोपः विधीयते। भो-भगो-अघो-अपूर्वस्य यस्य लोपः स्यात् हलि।

यथा - भगोस् नमस्ते इत्यत्र 'ससजुषो रुः'इति सूत्रेण सकारस्य रुत्वे भगोर् नमस्ते।'भो-भगो-अघो-अपूर्वस्य योऽशि'इति सूत्रेण रेफस्य यादेशे भगोय् नमस्ते। 'हलि सर्वेषाम्'इति यकारलोपे **भगो नमस्ते** इति रूपम्।

८. रोऽसुपि। (८-२-६९)

रः असुपि इति द्विपदं सूत्रम्। अनेन सूत्रेण अहन् शब्दस्य नकारस्य रुत्वं विधीयते। अह्नो रेफादेशः स्यात् न तु सुपि।

यथा -**अहरहः**। अहन् + अहः इति स्थिते 'रोऽसुपि'इति सूत्रेण नकारस्य रुत्वे अहर् अहः अहरहः इति रूपम्।

एवं अहन् + गणः - **अहर्गणः**।

रेफस्य लोपः।

९. रोरि।(८-३-१४)

रः रि इति द्विपदं सूत्रम्। अनेन सूत्रेण रेफस्य लोपः विधीयते। रेफस्य रेफे परे लोपः स्यात्।

यथा - **पुना रमते**। पुनर् रमते इत्यत्र 'रोरि' इति सूत्रेण र् इत्यस्य लोपे पुन रमरे। 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'इति सूत्रेण अणः दीर्घे पुना रमते इति रूपम्।

पूर्वस्य अणः दीर्घः।

१०. ढ्रलोपे पूर्वस्य दीर्घोऽणः। (८-३-१११)

ढ्रलोपे पूर्वस्य दीर्घः अणः इति चतुष्पदं सूत्रम्। अनेन सूत्रेण पूर्वस्य अणः दीर्घः विधीयते। ढरेफयोः लोपनिमित्तयोः पूर्वस्य अणः दीर्घः स्यात्। ढ् च र् च द्वौ, तौ लोपयतीति ढ्रलोपः, तस्मिन् ढ्रलोपे।

यथा - **हरी रम्यः**। हरिस् रम्यः इत्यत्र 'ससजुषो रुः'इति रुत्वे हरिर् रम्यः। 'रोरि'इति सूत्रेण पूर्वस्य रेफस्य लोपे हरि रम्यः। अत्र 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'इति सूत्रेण पूर्वस्य अणः दीर्घे हरीरम्यः।

सन्धत्त

हरिस् + रम्यः	शम्भुस् + राजते	पुनस् + रमते	
हरिर् रम्यः	शम्भुर् राजते	पुनर् रमते	ससजुषो रु :
हरि रम्यः	शम्भु राजते	पुन रमते	रोरि
हरी रम्यः	शम्भू राजते	पुना रमते	ढ्रलोपे पूर्वस्य दीर्घोऽणः

एवं स्वाराज्यं, नीरवः, नीरसः, नीरूपः इत्याद्युदाहरणानि द्रष्टव्यानि।

अणः इति किम्?

अणः एव दीर्घः। तृढ् ढ इत्यत्र 'ढो ढे लोपः'इति सूत्रेण ढकारलोपः। अत्र ऋकारस्य दीर्घो न। अणः अभावात्। तृढः इति रूपम्।

परं कार्यम्।

११. विप्रतिषेधे परं कार्यम्। (७-४-२)

द्विपदं सूत्रम्। अनेन सूत्रेण परं कार्यं विधीयते। तुल्यबलविरोधे परं कार्यं स्यात्। अन्यत्रान्यत्र लब्धावकाशयोः एकत्र एकधा प्राप्तिः तुल्यबलविरोधः।

यथा - **मनोरथः**। मनस् रथः इत्यत्र 'ससजुषो रुः'इति रुत्वे मनर् रथः। अत्र 'हशि च' (६-१-११४) इति पूर्वसूत्रेण उत्वस्य, 'रोरि'इति सूत्रेण रेफस्य लोपस्य च प्रसक्तिः। अत्र 'विप्रतिषेधे परं कार्यम्'इति सूत्रेण परस्य प्रसक्तिः। किन्तु 'पूर्वत्रासिद्धम्'इति सूत्रबलात् 'रोरि'इति सूत्रस्य प्रवृत्तिः 'हशि च'इति सूत्रस्य दृष्ट्या न। अतः 'हशि च'इति उत्वे मन उ रथः। 'आद्गुणः'इति गुणे मनोरथः इति रूपम्।

SGOU

परम् इत्यस्य इष्टमित्यर्थोऽपि वर्तत इति पतञ्जलिः।
पूर्वपरयोः मध्ये परस्य प्राधान्यम्।

सुलोपः।

१२. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि। (६-१-१३२)

एतत्तदोः सुलोपः अकोः अनञ्समासे हलि इति पञ्चपदं सूत्रम्। अनेन सूत्रेण सुलोपः विधीयते। अककारयोः एतत्तदोः यः सुस्तस्य लोपः स्यात् हलि।

यथा -**एष विष्णुः**। एष सु विष्णुः। अत्र 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि'इति सूत्रेण सुलोपे एष विष्णुः। एवं स शम्भुः इति।

स सु शिवः स शिवः।

अको इति किम्?

एषक सु रुद्रः इत्यत्र कपूर्वकः एतद् शब्दः एषकः।

अनञ्समासे इति किम्?

न सः असः। अत्र नञ्समासः। अनञ्समासे एव सु इत्यस्य लोपः।

हलि इति किम्?

हल्परत्वेन वर्तते चेदेव सोर्लोपः। एष सु अत्र इत्यत्र सोर्परत्वात् अच् वर्तमानत्वात् सु इत्यस्य न लोपः। सु इत्यस्य उकारस्य इत्संज्ञायां लोपे एष स् अत्र। रुत्वे (ससजुषो रुः इति सूत्रेण) एषर् अत्र। 'हशि च'इति उत्वे एष उ अत्र। 'आद्गुणः'इति गुणे एषो अत्र। 'एङः पदान्तादति'इति पूर्वरूपे **एषोऽत्र**इति रूपम्।

१३. सोऽचि लोपे चेत्पादपूरणम्। (६-१-१३४)

सः अचि लोपे चेत् पादपूरणम् इति पञ्चपदं सूत्रम्। अनेन सूत्रेण सोर्लोपः विधीयते। स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत।

यथा - **सैष** दाशरथी रामः। कस्यचन श्लोकस्य पादोऽयम्। अनुष्टुप् छन्दः। स सु एष दाशरथी रामः इत्यत्र पदपूरणार्थं सु इत्यस्य लोपः स्यात्। 'सोऽचि लोपे चेत्पादपूरणम्'इति सूत्रेण।

सेमामविड्ढिप्रभृतिम् - श्लोकस्य कश्चन पादोऽम्। स सु इमाम् - **सेमाम्**। 'सोऽचि लोपे चेत्पादपूरणम्'इति सूत्रेण पादपूरणत्वात् स सु इत्यत्र सोर्लेपः। पुनः 'आद्गुणः'इति गुणे सेमाम् इति रूपम्।

संक्षिप्तीकरणम्।

अस्य पाठभागस्य संक्षिप्तं रूपम् अधो दीयते पट्टिकयाम्।

सन्धेः नाम	विधीयमानं सूत्रम्	उदाहरणम्	सविशेषता
विसर्गस्य सत्वम्	विसर्जनीयस्य सः	विष्णुस्त्राता	
विकल्पेन विसर्गस्य विसर्गः	वा शरि	हरिः शेते हरिश्शेते	वैकल्पिकेन

रुत्वम्	ससजुषो रुः	रामस् - रामर्	
रेफस्य उत्वम्	अतो रोरप्लुतादप्लुते	शिवोऽर्च्यः	
	हशि च	शिवो वन्द्यः	
रेफस्य यत्वम्	भो-भगो-अघो-अपूर्वस्य योऽशि	देवा इह	
यलोपः	हलि सर्वेषाम्	भो देवाः	
नकारस्य रेफादेशः	रोऽसुपि	अहरहः	
रेफस्य लोपः	रोरि	पुना रमते	
पूर्वस्य अणः दीर्घः	ढ्रलोपे पूर्वस्य दीर्घोऽणः	शम्भू राजते	
परं कार्यम्	विप्रतिषेधे परं कार्यम्	मनोरथः इत्यत्र परस्य रेफलोपस्य प्रसक्तिः	
सुलोपः	एतत्तदोः सुलोपोऽकोरनञ्समासे हलि	एष विष्णुः	
सुलोपः	सोऽचि लोपे चेत्पदपूरणम्	सैष दाशरथी रामः	

पुनरावृत्तिः (Recap)

- विसर्जनीयस्य सः इति सूत्रेण विसर्गस्य सकारादेशः।
- वा शरि इति सूत्रेण विकल्पेन विसर्गः स्यात्।
- ससजुषो रुः इति सूत्रेण रुत्वं विधीयते।
- अतो रोरप्लुतादप्लुते इति सूत्रेण रोः उत्वं विधीयते।
- हशि च इति सूत्रेण हशि परे रोः उत्वं विधीयते।
- भो भगोअघोअपूर्वस्य योऽशि इति सूत्रेण रेफस्य यादेशः विधीयते।
- हलि सर्वेषाम् इति सूत्रेण यकारस्य लेपः स्यात्।
- रोऽसुपि इति सूत्रेण अहन् शब्दस्य नकारस्य रुत्वं विधीयते।
- रोरि इति सूत्रेण रेफस्य लोपः विधीयते।
- ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रेण पूर्वस्य अणः दीर्घः विधीयते।
- विप्रतिषेधे परं कार्यम् इति सूत्रेण परं कार्यं विधीयते।
- एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति सूत्रेण सुलोपः विधीयते।
- सोऽचि लोपे चेत्पादपूरणम् इति सूत्रेण सोर्लोपः विधीयते।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. रामः च इत्यत्र विसर्गस्य सकारादेशः केन सूत्रेण विधीयते?
२. रेफस्य उत्वविधायकं सूत्रं किम्?

SGOU

३. यलोपविधायकं सूत्रं किम्?
४. भो-भगो-अघो-अपूर्वस्य योऽशिइति सूत्रेण किं विधीयते?
५. अघोय् याहि इत्यत्र यकारलोपः केन सूत्रेण?
६. हरिर् रम्यः इत्यत्र रेफस्य लोपः केन सूत्रेण विधीयते?
७. शम्भुस् राजते .....।
८. 'मनोरथः'इत्यत्र रोरि इति सूत्रं कुतः न वर्तते?
९. विसर्गस्य सकारविधायकं सूत्रं किम्?
१०. शिवोऽर्च्यः - पदच्छेदः कः?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. रामः तिष्ठति - इत्यस्य सन्धत्तं रूपं किं? विधीयमानं सूत्रं किम्?
२. विसर्जनीयस्य सः इति सूत्रस्य अर्थः कः?
३. हशि च इति सूत्रेण किं विधीयते?
४. 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि'इति सूत्रेण किं विधीयते?
५. तुल्यबलविरोधे किं सम्भवति?
६. सन्धत्त - विष्णु त्राता।

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

१. वा शरि इति सूत्रं व्याख्यात।
२. शिवोऽर्च्यः, भो देवाः - सन्धत्त।
३. विसर्जनीयस्य सः इति सूत्रं सोदाहरणं विशदीकुरुत।
४. ससजुषो रुः इति सूत्रं सोदाहरणं व्याख्यात।
५. भो-भगो-अघो-अपूर्वस्य योऽशि, हलि सर्वेषाम् - द्वे सूत्रे व्याख्यात।
६. रोरि-व्याख्यात।
७. सोऽचि लोपे चेत्पादपूरणम्।
८. पुना रमते इत्यस्य रूपसिद्धिः कथम्?

निर्दिष्टाभ्यासः (Assignments)

१. विसर्गसन्धिं विशदयत।
२. वा शरि, विसर्जनीयस्य सः -उदाहरणसहितं व्याख्यात।

SGOU

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. विसर्जनीयस्य सः।
२. अतो रोरप्लुतादप्लुते।
३. हलि सर्वेषाम्।
४. रेफस्य यकारः।
५. हलि सर्वेषाम्।
६. रोरि।
७. शम्भू राजते।
८. पूर्वत्रासिद्धत्वात्।
९. विसर्जनीयस्य सः।
१०. शिवस् अर्च्यः।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit- 2

कारकप्रकरणम् - अकथितं च इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- विभक्तिनियमानां विशिष्यावगमनम्।
- कारकनियमानां ज्ञानेन विभक्तीनां प्रयोगस्य वाक्यरचनायाश्च ज्ञानम्।
- साधुवाक्यानां ज्ञानम्।
- कारकसूत्राणि अवगच्छति।

प्राग्व्यपेक्षाः (Prerequisites)

कारकप्रकरणं पठामः। भाषासु वाक्यस्य प्राधान्यं वर्तते। वाक्यं नाम किम्? पदसमूहः वाक्यम्। तर्हि गौरश्वः पुरुषो हस्ति इति पदसमूहः वाक्यं वा? न भवति। नामपदमात्रं न वाक्यम् भवति। उक्तं च - 'आख्यातं साव्ययकारकविशेषणं वाक्यम्'इति। अन्यदपि लक्षणम् उक्तम् - 'एकतिङ् वाक्यम्'इति। अर्थात् सर्वेषु वाक्येषु क्रियापदम् अध्याहियत एव। 'कारकान्विता क्रिया वाक्यम्'इत्यपि वाक्यस्य लक्षणम्। अथ किं नाम कारकम्? क्रियान्वयि कारकम्। वाक्ये क्रियया सह यत् सम्बन्धं प्राप्नोति, तत् कारकम्। करोतीति कारकम्। किं करोति? क्रियां करोति। अत एव संस्कृतवाक्यज्ञानार्थं कारकज्ञानं नितान्तम् आवश्यकं भवति। कारकाणि आश्रित्य विभक्तयः भवन्ति। विभक्तीनां प्रवृत्तौ बहूनि निमित्तानि भवितुमर्हन्ति। कारकं पुरस्कृत्य विभक्तिः प्रवर्तते। उदा - रामः भवनं गच्छति। अत्र कर्मकारकनिमित्तेन भवनशब्दस्य द्वितीयाविभक्तिः। वृक्षात् फलं पतति। अत्र अपादानकारकनिमित्तेन वृक्षशब्दस्य पञ्चमीविभक्तिः। कारकनिमित्तत्वेन प्रवृत्तायाः विभक्तेः कारकविभक्तिः इति नाम भवति। सामान्यतया संस्कृतभाषायां पदानां कश्चन समन्वयः दृश्यते।स च समन्वयः त्रिप्रकारः भवति।

१. कर्तुः क्रियायाश्च समन्वयः।
२. विशेषणविशेष्ययोः समन्वयः।
३. सापेक्षशब्दानां तत्पूर्ववर्तिसम्बन्धशब्दैः साकं समन्वयः।

एतत् प्रकारत्रयमपि कारकम् आश्रित्यैव तिष्ठति। तस्मात् कारकज्ञानं वाक्यज्ञाने अत्यन्तम् अपेक्षकं भवति। यथा - बालः पठति, गां स्पृशति, कन्दुकेन क्रीडति. याचकाय ददाति, वृक्षात् पतति, रामस्य भवनं, पीठे उपविशति।

मुख्यपदानि (Key words)

कर्तृकारकम्, कर्मकारकम्, प्रथमाविभक्तिः, द्वितीयाविभक्तिः, सम्बोधनं, अनभिहिते, सकर्मकधातवः, अकर्मकधातवः

SGOU

Discussion

कारकं षोढा।

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानाधिकरणम् इत्याहुः कारकाणि षट्।।

१. कर्तृकारकम्।
२. कर्मकारकम्।
३. करणकारकम्।
४. सम्प्रदानकारकम्।
५. अपादानकारकम्।
६. अधिकरणकारकम्।

१. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। (२-३-४६)

प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे, प्रथमाइति द्विपदं सूत्रम्। नियतोपस्थितिकः प्रातिपदिकार्थः। यस्मिन् प्रातिपदिके उच्चारिते यस्य अर्थस्य नियमेन उपस्थितिः भवति सः प्रातिपदिकार्थः इत्यर्थः। मात्राशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे च प्रथमा स्यात्।

उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम् इत्यादीनि प्रातिपदिकार्थमात्रे इत्यस्योदाहरणानि। अलिङ्गाः नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम्।

उच्चैः, नीचैः - अलिङ्गाः।
कृष्णः - पुल्लिङ्गः।
श्रीः - स्त्रीलिङ्गः।
ज्ञानम् - नपुंसकलिङ्गः।
अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य। उदाहरणम् - तटः - तटी - तटम्।
प्रथमाविभक्तिः प्रातिपदिकार्थं, तत्तल्लिङ्गं च बोधयति। वचनमपि।
नियतोपस्थितिकः प्रातिपदिकार्थः। प्रातिपदिके उच्चारिते यस्य अर्थस्य नियमेन भानं भवति सः प्रातिपदिकार्थः।
परिमाणमात्रे - द्रोणो व्रीहिः।
द्रोणः परिमाणविशेषः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिः इत्यर्थः।
वचनम् संख्या - एकः द्वौ बहवः।
संख्यामात्रस्य भाने प्रथमाविभक्तिः भवति। उदा - एकः, द्वौ, बहवः। अत्र एकत्व-द्वित्व-बहुत्वानां नियतरूपेण प्रातिपदिकेनैव भानात् अयं प्रातिपदिकार्थ एव।

२. सम्बोधने च। (२-३-४७)

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (२-३-४६) इति सूत्रात् प्रथमा इति अनुवर्तते।

SGOU

इह प्रथमा स्यात्। हे राम। सम्बोधने अधिके गम्येऽपि प्रथमा स्यात् इत्यर्थः। सम्बोधनम् अभिमुखीकृत्य ज्ञापनम् - हे राम! इति।

३. कारके। (२-४-२३)

इत्यधिकृत्य। इत आरभ्य तत्प्रयोजको हेतुश्च (२-४-५५) इति सूत्रपर्यन्तं कारकाधिकारः। क्रियाजनकं कारकम्। ब्राह्मणस्य पुत्रं पश्यति इत्यत्र ब्राह्मणस्य इति शब्दस्य क्रियायां सम्बन्धः नास्ति । अतः कारकत्वमपि नास्ति।

४. कर्तुरीप्सिततमं कर्म। (२-४-४९)

द्विपदं सूत्रम्। कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। उदा - पाचकः तण्डुलान् पचति। पच् - धातोरर्थः विक्लित्यनुकूलः व्यापारः। तादृशः व्यापाराश्रयः पाचकः। स एव कर्ता। कर्तृनिष्ठः व्यापारः - विक्लित्यनुकूलः व्यापारः। विक्लित्तेः आश्रयः - तण्डुलाः। अत तण्डुलानां कर्मत्वम्। कर्ता - पाचकेन स्वक्रियया - पाकक्रियया आप्तुम् - सम्बद्धुम् इष्टतमं कारकं - तण्डुलाः कर्मसंज्ञं स्यात् इति समन्वयः। अभिहिते तु कर्मणि प्रथमा। यथा - हरिः सेव्यते।
अभिहिते तु कर्मणि प्रातिपदिकार्थमात्रे इति प्रथमैव।

५. कर्मणि द्वितीया। (२-३-२)

कर्मणि द्वितीया इति द्विपदं सूत्रम्। अनभिहिते इति अधिक्रियते। अनुक्ते कर्मणि द्वितीया स्यात्।
यथा - हरिं भजति। अत्र भजनक्रियया सह कर्ता हरिम् एव सम्बद्धुम् इच्छति इत्यतः 'कर्तुरीप्सिततमं कर्म'इति कर्मसंज्ञायां 'कर्मणि द्वितीया'इति द्वितीया। हरिम् इति रूपम्।

६. अकथितं च। (२-४-५१)

'कर्तुरीप्सिततमं कर्म'इत्यतः कर्म इत्यनुवर्तते। इदं कर्मसंज्ञाविधायकं सूत्रं भवति। अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।
यथा - माणवकं पन्थानं पृच्छति।

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथमुषाम्।
कर्मयुक्स्यादकथितं तथा स्यान्नीहकृष्वहाम्।।

दुह् याच् पच् दण्ड् रुधि प्रच्छि चि ब्रू शासु जी मथ मुष् णीञ् हृञ् कृष् वह् एते अकथितधातवः।
द्विकर्मकः धातवः।

१. दुह - प्रपूरणे
२. टुयाच् - याञ्चायाम्
३. डुपषच् - पाके
४. दण्ड - दण्डनिपातने (निग्रहे)
५. रुधिर् - आवरणे

६. प्रच्छ - ज्ञीप्सायां
७. चिञ् - चयने
८. ब्रूञ् - व्यक्तायां वाचि
९. शासु - अनुशिष्टौ
१०. जि - अभिभवे
११. मन्थ - विलोडने
१२. मुष् - स्तेये
१३. णीच् - प्रापणे
१४. हृञ् - हरणे
१५. कृष - विलेखने
१६. वह - प्रापणे

क्रियाजन्यफलाश्रयं सत् सकर्मसंज्ञकं प्रधानकर्म। अन्यैः कारकविशेषैः अविवक्षितं सत् कर्मसंज्ञकं अप्रधानं/गौणं कर्म।

१. (गोपालः) गां दोग्धि पयः।

गाम् अप्रधानकर्म, पयः प्रधानकर्म। दोहनं - क्षरणानुकूलः व्यापारः। पयः कर्म।

अत्र 'अकथितं च'इत्येन कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीयाविभक्तिः भवति।

२. (वामनः) बलिं याचते वसुधाम्।

याचनम् - दानानुकूलव्यापारः। वसुधा - कर्म। अत्र याच् धातोः योगात् 'अकथितं च'इति सूत्रेण बलिम् इत्यस्य कर्मसंज्ञायां 'कर्मणि द्वितीया'इति सूत्रेण बलिं याचते इति रूपम्।

३. (दुर्बलः) अविनीतं विनयं याचते।

याचनम् - अनुनयानुकूलः। अत्र याच् धातोः योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीयया अविनीतं विनयं याचते इति रूपम्।

४. (पाचकः) तण्डुलान् ओदनं पचति।

पाचकः - विक्लित्यनुकूलः व्यापारः। ओदनः कर्म। अत्र पच् धातोः योगात् 'अकथितं च'इति सूत्रेण तण्डुलान् इत्यस्य कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीयया तण्डुलान् ओदनं इति रूपे।

५. (राजा) गर्गान् शतं दण्डयति।

दण्डनं - ग्रहणानुकूलः व्यापारः। शतं कर्म। अत्र दण्ड् धातोः योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीया। गर्गान् शतं इति रूपे।

६. (गोपालः) व्रजमवरुणद्धि गाम्।

अवरोधनम् - निर्गमप्रतिबन्धानुकूलः व्यारपारः।

गौः प्रधानं कर्म। व्रजः देशस्य नाम। अत्र रुधि धातोः योगात् 'अकथितं च'इति सूत्रेण गाम् इत्यस्य कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीया। व्रजं गाम् इति रूपे।

SGOU

७. (पथिकः) माणवकं पन्थानं पृच्छति।

पन्थाः प्रधानं कर्म। अत्र प्रछि धातोः योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीयया माणवकं पन्थानं इति रूपे।

८. (बालः) वृक्षम् अवचिनोति फलानि।

फलानि प्रधनकर्म। अत्र चि धातोः योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीया। वृक्षम् फलानि इति रूपे।

९. (गुरुः) माणवकं धर्मं ब्रूते शास्ति वा।

वचनं/शासनं - बोधनानुकूलः व्यापारः। धर्मः कर्म। अत्र ब्रूञ् धातोः शास् धातोः च योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीया। माणवकं धर्मं इति रूपे।

१०.(यज्ञदत्तः) शतं जयति देवदत्तम्।

जयः ग्रहणानुकूलताडनादिव्यापारः। शतं प्रधानं कर्म। अत्र जि धातोः योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीया। शतं देवदत्तम् इति रूपे।

११. (देवदानवगणः) सुधां क्षीरनिधिं मथ्नाति।

अत्र सुधा प्रधानं कर्म। मथ् धातोः योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीया। सुधां क्षीरनिधिं इति रूपे।

१२.(यज्ञदत्तः) देवदत्तं शतं मुष्माति।

अत्र शतं प्रधानकर्म। अत्र मुष् धातोः योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीया। देवदत्तं शतम् इति रूपे।

१३.(चैत्रः) ग्राममजां नयति, हरति, कर्षति, वहति वा।

नयनम् - देशान्तरसंयोगानुकूलः व्यापारः। अजा - प्रदानकर्म। अत्र णीञ् धातोः योगात् 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया'इत्यनेन द्वितीया। ग्रामम् अजाम् इति रूपे।

अर्थनिबन्धनेयं संज्ञा।

दुह्याच्पच् इत्यादीनां षोडशधातूनाम् अर्थे वर्तमानानाम् इतरधातूनामपि कर्मसंज्ञां लभते।

यथा - **बलिं भिक्षते वसुधाम्**। अत्र भिक्षधातुः याच्धातोः अर्थे वर्तते। अतः 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्ममि द्वितीया'इति द्वितीया।

१४.बलिं भिक्षते वसुधाम्। अत्र भिक्षधातुः याच्धातोः अर्थे वर्तते। अतः 'अकथितं च'इति सूत्रेण कर्मसंज्ञायां 'कर्ममि द्वितीया'इति द्वितीया।

१५.माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि।

अत्र ब्रूञ्धातोः समानार्थकत्वात् 'अकथितं च'इति सूत्रेण माणवकस्य कर्मसंज्ञायां 'कर्मणि द्वितीया'इति सूत्रेण द्वितीयाविभक्तिः स्यात्। माणवकं धर्मम् इति रूपे।

पुनरावृत्तिः (Recap)

- वाक्ये क्रियया सह यत् अन्वयं (सम्बन्धं) प्राप्नोति, तत् कारकम्।
- कारकाणि षट्।
- प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति सूत्रेण प्रथमा विभक्तिः विधीयते।
- सम्बोधने च इति सूत्रेण सम्बोधने अधिके गम्येऽपि प्रथमा विभक्तिः विधीयते।
- कारके इति सूत्रेणइत आरभ्य तत्प्रयोजको हेतुश्च इति सूत्रपर्यन्तं कारकाधिकारः भवति।
- कर्तुरीप्सिततमं कर्म इत्यनेन सूत्रेण कर्मसंज्ञं विधीयते।
- धातूपात्तव्यापाराश्रयः कर्ता।
- कर्तृव्यापारप्रयोज्यफलाश्रयः कर्म।
- कर्मणि द्वितीया इत्यनेन सूत्रेण द्वितीया विभक्तिः विधीयते।
- अकथितं च इत्यनेन सूत्रेण कर्मसंज्ञं विधीयते।
- यत्र धातोः फलं वायापारश्च भिन्नेषु पदार्थेषु भवतः, सः धातुः सकर्मकः।
- यत्र धातोः फलं व्यापारश्च एकस्मिन्नेव पदार्थे भवतः, सः धातुः अकर्मकः।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. करोतीति .....।
२. कारकाणि कति सन्ति?
३. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे .....।
४. परिमाणमात्रे इत्यस्य उदाहरणं किम्?
५. कर्तुः क्रियया आप्तुमिष्टतमं कारकं .....।
६. पाचकः तण्डुलान् ओदनं पचति इत्यत्र द्वितीयाविभक्तिविधायकं सूत्रं किम्?
७. हरिः लक्ष्म्या सेवितः इत्यत्र हरिशब्दे प्रयुक्ता विभक्तिः का?
८. 'अकथितं च'इति सूत्रस्य वृत्तिः का?
९. 'बलिं याचते वसुधाम्'इत्यत्र बलिशब्दस्य कर्मसंज्ञाविधायकं सूत्रं किम्?
१०. कर्मसंज्ञाविधायकं सूत्रं किम्?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. द्विकर्मधातवः के?
२. प्रातिपदिकार्थः नाम कः?
३. कति कारकाणि सन्ति? कानि च तानि ?

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

SGOU

१. प्रथमाविभक्तेः निमित्तानि उदाहरणसहितं व्याख्यात।
२. सकर्मक-अकर्मकयोः को भेदः?

निर्दिष्टाभ्यासः (Assignments)

१. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति सूत्रं उदाहरणसहितं व्याख्यानं कुरुत।
२. द्वितीयाविभक्ति विधायकानि सूत्राणि उदाहरणसहितं व्याख्यात।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. कारकम्।
२. षट्।
३. प्रथमा।
४. द्रोणो व्रीहिः।
५. कर्म कारकम्।
६. कर्मणि द्वितीया।
७. 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'इति सूत्रेण प्रथमाविभक्तिः प्रयुज्यते।
८. अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।
९. याच् धातुः प्रयुज्यमानत्वात् 'अकथितं च'इति सूत्रेण द्वितीया।
१०. कर्तुरीप्सिततमं कर्म।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-3

कारकप्रकरणम् - स्वतन्त्रः कर्ता इति सूत्रादारभ्य नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- कारकाणां विशिष्यावगमनम्।
- कारकनियमानां ज्ञानेन विभक्तीनां प्रयोगस्य वाक्यरचनायाश्च ज्ञानम्।
- साधुवाक्यानां ज्ञानम्।
- कारकसूत्राणि अवगच्छति।

प्राग्व्यपेक्षाः (Prerequisites)

कारकप्रकरणे पूर्वस्मिन् एकके प्रथमा-द्वितीयाविभक्त्योः विशेषाध्ययनं अकुर्वन्। इदानीं तृतीयाचतुर्थीविभक्तीं पठामः।

मुख्यपदानि (Key words)

कर्ता, करणं, तृतीयाविभक्तिः, सम्प्रदानं, चतुर्थीविभक्तिः

Discussion

१. स्वतन्त्रः कर्ता। (१-४-५४)

कारके इति अधिक्रियते। अनेन सूत्रेण कर्तृकारकसंज्ञा विधीयते। क्रियायां स्वातन्त्र्येन विवक्षितोऽर्थः कर्ता स्यात्।

यथा - **बालः पठति** इत्यत्र पठनक्रियां कर्तुं बाले स्वातन्त्र्यमस्ति। अतः बालः कर्ता।

२. साधकतमं करणम्। (२-४-४२)

कारके इति अधिक्रियते। क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। अनेन सूत्रेण करणसंज्ञा विधीयते।

यथा - **बालः कन्तुकेन क्रीडति** इत्यत्र क्रीडां कर्तुं सहाय्यकं भवति कन्तुकम्। अतः कन्तुकस्य करणसंज्ञां लभते।

३. कर्तृकरणयोस्तृतीया। (२-३-१८)

कर्तृकरणयोः तृतीया इति द्विपदं सूत्रम्। अनेन सूत्रेण तृतीया विधीयते। अनभिहिते इति अधिक्रियते। अनभिहिते कर्तरि करणे च तृतीया स्यात्।

SGOU

यथा - **रामेण बाणेन हतो बाली।**

४. कर्मणा यमभिप्रैति स सम्प्रदानम्। (१-४-३२)

कारके इति अधिक्रयते। अनेन सूत्रेण सम्प्रदानसंज्ञः विधीयते। दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।

यथा - **विप्राय धनं ददाति** इत्यत्र विप्रशब्दस्य सम्प्रदानसंज्ञः स्यात्।

५. चतुर्थी सम्प्रदाने। (६.३.१३)

द्विपदं सूत्रम्। अनेन सूत्रेण चतुर्थी विधीयते। सम्प्रदाने चतुर्थी स्यात्।

यथा - **विप्राय गां ददाति।** दानक्रियया सम्बन्धुं कर्तुः ईप्सिततमत्वात् गौः कर्म। कर्मणः उद्देश्यं विप्रः। तस्माद् विप्रस्य सम्प्रदानत्वम्। 'चतुर्थी सम्प्रदाने'इति सूत्रेण विप्राय इति रूपम्।

६. नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च। (२-३-१६)

द्विपदं सूत्रम्। अनेन सूत्रेण चतुर्थी विधीयते। 'चतुर्थी सम्प्रदाने'इत्यतः चतुर्थी इति अनुवर्तते। नमः-स्वस्ति-स्वाहा-स्वधा-अलं-वषड् इत्यादीनां योगे चतुर्थी स्यात्।

यथा - **हरये नमः।** अत्र हरये नमः इति स्थिते नमः इति पदस्य योगे 'नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च' इति सूत्रेण हरिशब्दस्य चतुर्थी। हरये इति रूपं सिद्धम्।

एवमेव **प्रजाभ्यः स्वस्ति**, **अग्नये स्वाहा**, **पितृभ्यः स्वधा** इत्यादिः।

अलमिति पर्याप्तर्थग्रहणम्।

अलमित्यनेन पर्याप्त्यर्थकशब्दानां ग्रहणमित्यर्थः। तेन पर्याप्त्यर्थग्रहणेन **दैत्येभ्यो हरिः अलम्**, दैत्येभ्यो हरिः प्रभुः, दैत्येभ्यो हरिः समर्थः, दैत्येभ्यो हरिः शक्तः इत्यादि।

अलम् इत्यस्य अर्थद्वयं वर्तते। पर्याप्तिः, निषेधः च।

पर्याप्त्यर्थे चतुर्थी, निषेधार्थे तृतीया।

पुनरावृत्तिः(Recap)

- स्वतन्त्रः कर्ता इति सूत्रेण कर्तृकारकसंज्ञा विधीयते।
- क्रियायां स्वातन्त्र्येन विवक्षितोऽर्थः कर्ता भवति।
- साधकतमं करणम् इति सूत्रेण करणसंज्ञं विधीयते।
- कर्तृकरणयोस्तृतीया इति सूत्रेण तृतीयाविभक्तिः विधीयते।
- कर्मणा यमभिप्रैति स सम्प्रदानम् इत्यनेन सूत्रेण सम्प्रदानसंज्ञः विधीयते।
- चतुर्थी सम्प्रदाने इति सूत्रेण चतुर्थीविभक्तिः विधीयते।
- नमः-स्वस्ति-स्वाहा-स्वधा-अलं-वषड् इत्यादीनां योगे चतुर्थी विभक्तिः भवति।
- अलम् इत्यस्य योगे पर्याप्त्यर्थे चतुर्थी विभक्तिः स्यात्।

SGOU

- अलम् इत्यस्य योगे निषेधार्थे तृतीया विभक्तिः स्यात्।

वस्तुनिष्ठप्रश्नाः(Objective type questions)

१. किं नाम करणम्?
२. किं नाम कर्ता?
३. करणे का विभक्तिः भवति?
४. सम्प्रदानविधायकं सूत्रं किम्?
५. सम्प्रदाने का विभक्तिः भवति?
६. क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः ..... स्यात्।
७. नमः-स्वस्ति-स्वाहा-स्वधा-अलं-वषड् इत्यादीनां योगे का विभक्तिः भवति?
८. अलम् इत्यस्य अर्थद्वयं वर्तते। ते के?
९. तृतीयाविभक्तेः कारकं किम्?
१०. विप्राय गां ददाति इत्यस्मिन् वाक्ये कर्मसंज्ञकं पदं किमस्ति?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. 'हरये नमः'इति वाक्ये हरये इति पदे का विभक्तिः?
२. विप्राय गां ददाति इत्यत्र केन सूत्रेण चतुर्थीविभक्तिः भवति?

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

I.रेखाङ्कितपदानां विभक्तिकार्यं स्पष्टयत।

१. हरये नमः।
२. दैत्येभ्यो हरिः अलम्।

II.सूत्रव्याख्यानं कुरुत।

१. नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च।
२. कर्मणा यमभिप्रैति स सम्प्रदानम्।

निर्दिष्टाभ्यासः (Assignments)

१. तृतीयाविभक्तिविधायकानि सूत्राणि कानि? उदाहरणसहितं व्याख्यात।
२. चतुर्थीविभक्तिविधायकानि सूत्राणि कानि? उदाहरणसहितं व्याख्यात।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणं भवति।

२. क्रियायां यः सर्वथा स्वतन्त्रो भवति सः कर्ता भवति।
३. तृतीया।
४. कर्मणा यमभिप्रैति स सम्प्रदानम्।
५. चतुर्थी।
६. कर्ता।
७. चतुर्थी।
८. पर्याप्तिः, निषेधः च।
९. करणकारकम्।
१०. गो।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता ईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, २०११

SGOU

Unit-4

ध्रुवमपायेऽपादनम् इति सूत्रादारभ्य सप्तम्यधिकरणे च इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- विभक्तिनियमानां विशिष्यावगमनम्।
- कारकनियमानां ज्ञानेन विभक्तीनां प्रयोगस्य वाक्यरचनायाश्च ज्ञानम्।
- साधुवाक्यानां ज्ञानम्।
- कारकसूत्राणि अवगच्छति।

प्राग्व्यपेक्षाः (Prerequisites)

कारकप्रकरणे तृतीये एकके तृतीयाचतुर्थीविभक्तिविधायकानि सूत्राणि तेषां विशेषाध्ययनं अकुर्वम। इदानीं पञ्चमी-षष्ठी-सप्तमीविभक्तिविधायकानि सूत्राणि पठामः।

मुख्यपदानि (Key words)

अपादानम्, पञ्चमीविभक्तिः, षष्ठीविभक्तिः, स्वस्वामिभावः, अधिकरणम्, सप्तमीविभक्तिः

Discussion

१. ध्रुवमपायेऽपादनम्। (१-४-२४)

ध्रुवम् अपाये अपादानम् इति त्रिपदं सूत्रम्। अनेन सूत्रेण अपादानसंज्ञः विधीयते। अपायो विश्लेषः। तस्मिन् साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्। द्वयोः संयुक्तयोः अन्यतरस्य चलनात् विश्लेषः इति। तादृशं चलनम् अनाश्रयभूतं एव ध्रुवम्।

यथा - **वृक्षात् फलं पतति** इत्यत्र 'ध्रुवमपायेऽपादानम्'इति सूत्रेण वृक्षशब्दस्य अपादानसंज्ञा स्यात्।

२. अपादाने पञ्चमी। (२-३-२८)

द्विपदं सूत्रम्। अनेन सूत्रेण पञ्चमी विधीयते। अपादाने पञ्चमी स्यात्।

यथा - **ग्रामादायाति, धावतोऽश्वात् पतति।** ग्रामात् आयाति इत्यत्र 'ध्रुवमपायेऽपादानम्'इति सूत्रेण ग्रामशब्दस्य अपादानत्वात् 'अपादाने पञ्चमी'इति सूत्रेण अपादानस्य पञ्चमी, अश्वात् इति रूपम्।

एवं धावतः अश्वात् पतति इत्यत्र अश्वशब्दस्य 'ध्रुवमपायेऽपादानम्'इति सूत्रेण ग्रामशब्दस्य अपादानत्वात् 'अपादाने पञ्चमी'इति सूत्रेण अश्वात् इति पञ्चमी।

SGOU

३. षष्ठी शेषे। (२-३-५०)

द्विपदं सूत्रम्। अनेन सूत्रेण षष्ठी विधीयते। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। तत्र षष्ठी स्यात्। स्वस्वामिभावादिः - स्व-स्वामिभावः, जन्य-जनकभावः अवयव-अवयविभावः सेव्य-सेवकभावः च ग्रह्यन्ते।

यथा - **राज्ञः पुरुषः** - राज्ञः पुरुषः इत्यत्र स्वस्वामिभावात् 'षष्ठी शेषे'इति सूत्रेण राज्ञः इति षष्ठीरूपम्। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठी एव। कर्मत्वकर्तृत्वादीनामपि सम्बन्धत्वविवक्षायां षष्ठ्येव। न कारकविभक्तयः इत्यर्थः।

सतां गतम् - इत्यत्र सद्सम्बन्धि गमनम् इत्यर्थः। कर्तृविवक्षायां सद्भिः गतम् इति तृतीया भवत्येव। तदविवक्षायां सम्बन्धसामान्ये सद्सम्बन्धिगमनम् इत्यर्थे षष्ठी भवति।

सर्पिषो जानीते - इत्यत्र करणत्वविवक्षायां सर्पिषा उपायेन प्रवर्तते इत्यर्थः। करणत्वस्य सम्बन्धविवक्षायां षष्ठ्येव। सर्पिषः इति षष्ठी।

मातुः स्मरति - कर्मत्वविवक्षायां मातरं स्मरति इत्यर्थः। कर्मत्वस्य सम्बन्धमात्रविवक्षायां षष्ठ्येव।
एधोदकस्य उपस्कुरुते - कर्मत्वविवक्षायाम् एधोदकम् उपस्कुरुते इति रूपम्। कर्मत्वस्य शेषत्वविवक्षायां एधोदकस्य उपस्कुरुते इति।
भजे शम्भोश्चरणयोः - अत्र चरणयोः शेषत्वविवक्षायां षष्ठी। शम्भुचरणसम्बन्धि भजनमित्यर्थः।

४. आधारोऽधिकरणम्। (१-४-४५)

आधारः अधिकरणम् इति द्विपदं सूत्रम्। अनेन सूत्रेण अधिकरणसंज्ञा विधीयते। कारके इति अधिक्रियते। कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकमधिकरणं स्यात्। आधारकारकम् अधिकरणमेव भवति। कस्य आधारः इति चेत् क्रियायाः आधारः एव। सा क्रिया च कर्तृकर्मद्वारा स्यात्।
यथा - **गेहे वसति**। अत्र वासक्रियायां गेहः आधारः। अतः अधिकरणसंज्ञा।

५. सप्तम्यधिकरणे च। (२-३-३६)

सप्तमी अधिकरणे च इति त्रिपदं सूत्रम्। अनेन सूत्रेण सप्तमी विधीयते। अधिकरणे सप्तमी स्यात्।
चकाराद् दूरान्तिरार्थेभ्यः।
दूरान्तिकार्थेभ्यो द्वितीया च इति पूर्वसूत्रात् दूरान्तिकार्थेभ्य इत्यस्य चकारेण अनुकर्षणादिति भावः। दूरान्तिकार्थेभ्यः अपि सप्तमी भवितुमर्हति।
औपश्लेशिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। औपश्लेषिकः वैषयिकः अभिव्यापकः च इति आधारः त्रिधा। औपश्लेषिकः संयोगादिसम्बन्धः। विषयतासम्बन्धकृतः वैषयिकः। सकलावयवव्याप्तिकृतः अभिव्यापकः।

कटे आस्ते - औपश्लेषिकस्य उदाहरणं भवति। देवदत्तः कटे आस्ते इत्यत्र देवदत्तस्य कटस्य च संयोगसम्बन्धः स्यात्। आसनक्रियां प्रति कटस्य संयोगसम्बन्धात् अधिकरणत्वम्। 'आधारोऽधिकरणम्'इति सूत्रेण अधिकरणसंज्ञायां 'सप्तम्यधिकरणे च'इति सूत्रेण कटशब्दस्य सप्तमी। कटे इति रूपम्।

स्थाल्यां पचति - तण्डुलं स्थाल्यां पचति। अत्र पाकक्रियां प्रति स्थाल्याः संयोगसम्बन्धं पुरस्कृत्य आधारत्वादधिकरणत्वम्। 'आधारोऽधिकरणम्'इति सूत्रेण अधिकरणसंज्ञायां 'सप्तम्यधिकरणे च'इति सूत्रेण स्थाल्याम् इति शब्दस्य सप्तमी।

मोक्षे इच्छा अस्ति - अत्र मोक्षस्य विषये इच्छा अस्तीत्यतः अधिकरणत्वम्। 'आधारोऽधिकरणम्'इति सूत्रेण अधिकरणसंज्ञायां 'सप्तम्यधिकरणे च'इति सूत्रेण मोक्षशब्दस्य सप्तमी।

सर्वस्मिन्नात्मास्ति - अत्र आत्मनः सर्वव्यापकत्वात् सर्वस्यापि अधिकरणत्वम्। 'आधारोऽधिकरणम्'इति सूत्रेण अधिकरणसंज्ञायां 'सप्तम्यधिकरणे च'इति सूत्रेण सप्तमी। सर्वस्मिन् इति रूपम्।

वनस्य दूरे अन्तिके वा।

अत्र 'सप्तम्यधिकरणे च'इति सूत्रेण सप्तमी। दूरे अन्तिके इति सप्तम्यन्तरूपे।

अस्य खण्डस्य संक्षिप्तीकरणम्।

संज्ञाः	संज्ञाविधायकानि सूत्राणि	विभक्तयः	सूत्राणि, उदाहरणानि च
१. कर्तृ	स्वतन्त्रः कर्ता	प्रथमा	१. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा - राम, कृष्ण २. सम्बोधने च - हे राम
२. कर्म	कर्तुरीप्सिततमं कर्म	द्वितीया	१. कर्मणि द्वितीया - हरिं भजति। २. अकथितं च - गां दोग्धि पयः।
३. करणम्	साधकतमं करणम्	तृतीया	कर्तृकरणयोस्तृतीया - बालः कन्तुकेन क्रीडति।
४. सम्प्रदानम्	कर्मणा यमभिप्रैति स सम्प्रदानम्	चतुर्थी	१. चतुर्थी सम्प्रदाने - विप्राय गां ददाति। २. नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च - गुरवे नमः।
५. अपादानम्	ध्रुवमपायेऽपादानम्	पञ्चमी	अपादाने पञ्चमी - वृक्षात् पर्णं पतति।
		षष्ठी	षष्ठी शेषे - मातुः स्मरति।
६. अधिकरणम्	आधारोऽधिकरणम्	सप्तमी	सप्तम्यधिकरणे च - गेहे वसति

SGOU

पुनरावृत्तिः (Recap)

- ध्रुवमपायेऽपादनम् इत्यनेन सूत्रेण अपदानसंज्ञः विधीयते।
- अपादाने पञ्चमी इति सूत्रेण पञ्चमीविभक्तिः विधीयते।
- षष्ठी शेषे इति सूत्रेण षष्ठीविभक्तिः विधीयते।
- स्वस्वामिभावादिसम्बन्धे षष्ठी स्यात्।
- कर्मत्वकर्तृत्वादीनामपि सम्बन्धत्वविवक्षायां षष्ठ्येव स्यात्।
- करणत्वस्य सम्बन्धविवक्षायां षष्ठ्येव।
- शेषत्वविवक्षायां षष्ठी।
- आधारोऽधिकरणम् इति सूत्रेण अधिकरणसंज्ञा विधीयते।
- सप्तम्यधिकरणे च इति सूत्रेण सप्तमीविभक्तिः विधीयते।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. किं नाम अपादानम्?
२. अपादाने का विभक्तिः भवति?
३. केन सूत्रेण षष्ठीविभक्तिः विधीयते?
४. सप्तमीविधायकसूत्रं किम्?
५. मातुः स्मरति इति वाक्ये केन सूत्रेण षष्ठीविभक्तिः भवति?
६. किं नाम अधिकरणम्?
७. मोक्षे इच्छा अस्ति इति वाक्ये मोक्षपदस्य विभक्तिः का?
८. स्वस्वामिभावादिः के?
९. 'ग्रामादायाति'इत्यत्र ग्रामात् इति पदस्य का संज्ञा?
१०. औपश्लेषिकस्य उदाहरणं किम्?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

I.सूत्राणां लघुव्याख्यानं कुरुत।

१. षष्ठी शेषे।
२. ध्रुवमपायेऽपादनम्।
३. आधारोऽधिकरणम्।

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

I.अधोलिखितवाक्यानां विभक्तिकार्यं स्पष्टयत।

SGOU

१. कटे आस्ते।
२. स्थाल्यां पचति।
३. गेहे वसति।

निर्दिष्टाभ्यासः (Assignments)

१. षष्ठीविधायकसूत्राणि उदाहरणसहितं व्याख्यात।
२. सप्तमीविधायकसूत्राणि उदाहरणसहितं व्याख्यात।
३. कारकाणि कति? सविस्तरं प्रतिपादयत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. अपाये यद् ध्रुवं भवति तस्य अपादानसंज्ञा भवति।
२. पञ्चमी।
३. षष्ठी शेषे।
४. सप्तम्यधिकरणे च।
५. षष्ठी शेषे।
६. आधारस्य अधिकरणसंज्ञा भवति।
७. सप्तमी
८. स्व-स्वामिभावः, जन्य-जनकभावः अवयव-अवयविभावः सेव्य-सेवकभावः च ग्रह्यन्ते।
९. अपादानसंज्ञा।
१०. कटे आस्ते।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

BLOCK - 5

लघुसिद्धान्तकौमुदी-समासप्रकरणम्।

केवलसमास-अव्ययीभावसमासयोः विस्तरेण अध्ययनम्

SGOU

Unit- 1

प्राक्कथनम्

उद्देश्यानि (Learning Outcomes)

- समासपरिज्ञानम्।
- समासादीनां नियमज्ञानेन भाषायाः विस्तृतज्ञानम्।
- पदानां व्युपत्तिज्ञानेन अर्थज्ञानम्।
- लौकिक-अलौकिकविग्रहयोः भेदं गृह्णाति।
- समासभेदान् जानाति।

प्राग्व्यपेक्षाः (Pre requisites)

समसनं समासः। द्वयोः तदधिकानां वा पदानां एकीभवनं समास इति। सम् उपसर्गात् अस् धातोः घञ् प्रत्ययात् समासः निष्पद्यते। समासः सुबन्तानां भवति, न तु तिङन्तानाम्। समासः युगपत् द्वयोः द्वयोः सुबन्तयोः भवति। द्वन्द्वे तु युगपत् बहूनामपि। वृक्षस्य शाखा वृक्षशाखा इति प्रथमस्योदाहरणम्। रामः च कृष्णः च गापालः च रामकृष्णगोपालाः इति बहुपदविग्रहः।

मुख्यपदानि (Key words)

समासः, वृत्तिः, विग्रहः

Discussion

समासः पञ्चधा।

१. केवलसमासः।
२. अव्ययीभावसमासः।
३. तत्पुरुषसमासः।
४. बहुव्रीहिसमासः।
५. द्वन्द्वसमासः च।

विशेषसंज्ञाविनिर्मुक्तः केवलसमासः। यथा-भूतपूर्वः। प्रायेण पूर्वपदार्थप्रधानो अव्ययीभावः। यथा- यथामति। प्रायेण उत्तरपदार्थप्रधानो तत्पुरुषः। यथा-राजपुरुषः। तत्पुरुषभेदः कर्मधारयः। तत्पुरुषः समानाधिकरणः कर्मधारयः यथा - कृष्णसर्पः। कर्मधारयभेदः द्विगुः। संख्यापूर्वो द्विगुः। यथा सप्तर्षयः। प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिः। यथा — पीताम्बरः। प्रायेण उभयपदार्थप्रधानो द्वन्द्वः च। यथा -संज्ञापरिभाषम्।
प्राकृतसमासप्रकरणे एषः नियमः स्मरणीयः।

SGOU

चकार बहुलो द्वन्द्वः स चासौ कर्मधारयः।
यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषः स्मृतः।।

पदार्थाभिधानं वृत्तिः। वृत्तिः पञ्चधा। कृत्, तद्धितः, समासः, एकशेषः, सनाद्यन्तधातवः। तत्र पचति इति क्रिया। पाचकः इति कृद्वृत्तिः। दशरथस्य अपत्यं पुमान् दाशरथिः इति तद्धितवृत्तेः उदाहरणम्। उपकृष्णं, राजपुरुषः इत्यादयः समासवृत्तिः। माता च पिता च पितरौ इति एकशेषवृत्तिः। गन्तुमिच्छति जिगमिषति, भृशं राजते रराजते इति सनाद्यन्तधातुवृत्तिः। एतेषां पञ्चवृत्तीनाम् अर्थबोधकवाक्यं भवति विग्रहः। विग्रहः द्विविधः स्वपदविग्रहः, अस्वपदविग्रहः च। समासघटकपदैः अर्थं वदति चेत् स्वपदविग्रहः।

उदा - राज्ञः पुरुषः राजपुरुषः।

स्वपदविग्रहं कर्तुम् अशक्यं चेत् तत्र अस्वपदविग्रहः।

उदा - उपकृष्णम्। अत्र उप कृष्णम् इति विग्रहं कर्तुं न शक्यते। किन्तु समीपम् इत्यर्थे। कृष्णस्य समीपम् उपकृष्णम् इत्येव वक्तुं शक्यते।

पुनः विग्रहः लौकिकविग्रहः अलौकिकविग्रहः चेति द्विविधः। लोके प्रयोगार्हैः पदैः विग्रहार्थकथने लौकिकविग्रहः।

यथा - राज्ञः पुरुषः राजपुरुषः। किन्तु लौकिकप्रयोगानर्हः शास्त्रप्रक्रियासहायकं प्रकृति-प्रत्यय रूपेण निर्दिष्टः विग्रहः अलौकिकविग्रहः।

यथा - राजन् ङस् पुरुष सु इति अलौकिकविग्रहः। समासे अलौकिकविग्रहस्य प्राधान्यम्।

पुनरावृत्तिः (Recap)

- समासः पञ्चधा।
- विशेषसंज्ञाविनिर्मुक्तः केवलसमासः।
- प्रायेण पूर्वपदार्थप्रधानो अव्ययीभावः।
- प्रायेण उत्तरपदार्थप्रधानो तत्पुरुषः।
- प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिः।
- प्रायेण उभयपदार्थप्रधानो द्वन्द्वः।
- पदार्थाभिधानं वृत्तिः।
- वृत्तिः पञ्चधा।
- पञ्चवृत्तीनां अर्थबोधकवाक्यं भवति विग्रहः।
- विग्रहः द्विविधः।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. पदार्थाभिधानं किं भवति?
२. कति वृत्तयः?
३. कर्मधारयभेदः कः?
४. उभयपदार्थप्रधानः कः?

SGOU

५. अन्यपदार्थप्रधानः कः?
६. उत्तरपदार्थप्रधानः कः?
७. विशेषसंज्ञाविनिर्मुक्तो समासः कः?
८. पूर्वपदार्थप्रधानः कः?
९. समसनं --------।(रिक्तं पूरयत)

एकैकया खण्डिकया उत्तराणि लिखत
(Answer the following questions in a paragraph)

१. वृत्तिः का?ताः काः?
२. समासः कतिविधः? के च ते?

निर्दिष्टाभ्यासः (Assignments)

१.विग्रहः कः? विशदयत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. वृत्तिः।
२. पञ्च।
३. द्विगुः।
४. द्वन्द्वः।
५. बहुव्रीहिः।
६. तत्पुरुषः।
७. केवलसमासः।
८. अव्ययीभावः ।
९. समासः।

सूचनाग्रन्थाः (References)

१. वरदराजः, लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

SGOU

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५

२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७

३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit- 2

केवलसमासः

उद्देश्यानि (Learning Outcomes)

- समासादीनां नियमज्ञानेन भाषायाः ज्ञानम्।
- पदानां व्युपत्तिज्ञानेन अर्थज्ञानम्।
- लौकिक-अलौकिकविग्रहयोः भेदं गृह्णाति।
- समासभेदान् जानाति।

प्राग्व्यपेक्षाः (Pre requisites)

पूर्वस्मिन् एकके वयं समासस्य सामान्यपरिचयं, वृत्तेः स्वरूपं च सविस्तृतं अपठाम। इदानीं समासप्रकरणे केवलसमासः तस्य उदाहरणानि च विशदयन्ति।

मुख्यपदानि (Key words)

भूतपूर्वः, सह सुपा, सुबन्तस्य लेपः, विभक्तेः अलोपः, इव शब्दः

Discussion

१. समर्थः पदविधिः। (२-१-१)

द्विपदं सूत्रमिदम्। समर्थः पदविधिः इति पदच्छेदः। पदस्य विधिः पदविधिः। समर्थः समर्थाश्रितः इत्यर्थः। पदानाम् अन्योन्याश्रयेण आकांक्षया विशिष्टमर्थं बोधयति। एवं विशिष्टार्थबोधनं सामर्थ्यमिति वदति। पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः।

२. प्राक्कडारात्समासः। (२-१-३)

त्रिपदं सूत्रम्। प्राक् कडारात् समासः इति पदच्छेदः। कडाराः कर्मधारये इत्यतः प्राक् समास इत्यधिक्रियते।

३. सह सुपा। (२-१-४)

सह सुपा इति द्विपदं सूत्रम्। समस्यते इति अनुवर्तते। सुप् सुपा सह वा समस्यते।
यथा - भूतपूर्वः। समासत्वात् प्रातिपदिकत्वात् सुपो लुक्।

भूतपूर्वः - पूर्वं भूतः भूतपूर्वः इति लौकिकविग्रहः। पूर्व अम् भूत सु इति अलौकिकविग्रहे 'सह सुपा'इति सूत्रेण समासे 'कृत्तद्धितसमासाश्च'इति सूत्रेण समासत्वात् प्रातिपदिकसंज्ञायां 'सुपो धातुप्रातिपदिकयोः'इति

SGOU

सुप्प्रत्ययस्य लोपे पूर्वभूत इति। एवं जाते 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति सूत्रेण पूर्वभूतशब्दयोः उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्'इति सूत्रेण पूर्वनिपाते प्राप्ते 'भूतपूर्वे चरट्'इति निर्देशेन भूतशब्दस्य पूर्वनिपाते भूतपूर्व इति जाते 'स्वौजसमौट्....'इति सुप्रत्यये 'उपदेशेऽजनुनासिक इत्'इति उकारस्य इत्संज्ञायां 'तस्य लोपः'इति लोपे भूतपूर्व स्। 'ससजुषो रुः'इति सूत्रेण सकारस्य रुत्वे भूतपूर्व र्। 'खरवसानयोर्विसर्जनीयः'इति सूत्रेण रेफस्य विसर्गे भूतपूर्वः इति रूपम्।

इवेन समासो विभक्त्यलोपश्च। (वार्तिकम्)

इवेन समासः विभक्त्यलोपः च इति पदच्छेदः। इव शब्देन सह समासः, विभक्तेः अलोपः च भवति।

यथा -**वागर्थाविव**। वागर्थौ + इव - वागर्थाविव। वागर्थ औ इव इत्यत्र 'इवेन समासो विभक्त्यलोपश्च'इति वार्तिकेन समासे विभक्तिप्रत्ययस्य औकारस्य अलोपे औकारस्य 'एचोऽयवायावः'इति सूत्रेण आवादेशे वागर्थाविव इति रूपम्।

पुनरावृत्तिः (Recap)

- विशेषसंज्ञाविनिर्मुक्तः केवलसमासः।
- समर्थः पदविधिः इति सूत्रेण विशिष्टार्थबोधनं सामर्थ्यम्।
- प्राक्कडारात्समासः इति सूत्रेण कडाराः कर्मधारये इत्यतः प्राक् समासः।
- सह सुपा इति सूत्रेण सुबन्तं सुबन्तेन सह वा समस्यते।
- सुपो धातु प्रातिपदिकयोः इति सूत्रेण प्रातिपदिकस्य सुबन्तस्य लोपः।
- इवेन समासो विभक्त्यलोपश्च इति वार्तिकेन इव शब्देन सह समासः, विभक्तेः अलोपः च भवति।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. विशेषसंज्ञाविनिर्मुक्त समासः कः?
२. पूर्वं भूतः अत्र कः समासः?
३. इवेन ..... विभक्त्यलोपश्च।
४. पदसम्बन्धी यो विधिः स ..... बोध्यः।
५. पदविधिः - विग्रहः कः?
६. भूतपूर्वः इत्यत्र कः अलौकिकविग्रहः?
७. वागर्थाविव अत्र विभक्तिलोपः कथं न भवति?

SGOU

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

लघुव्याख्यानं कुरुत

१. सह सुपा।

२. समर्थः पदविधिः।

निर्दिष्टाभ्यासः (Assignments)

१.भूतपूर्वः सप्रमाणं समासकार्याणि विशदयत

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. केवलसमासः।
२. केवलसमासः।
३. समासः।
४. समर्थाश्रितः।
५. पदस्य विधिं पदविधिः।
६. पूर्व + अम् भूत सु इति।
७. इवेन समासो विभक्तिलोपश्च इति निषेधात् विभक्तिलोपः न भवति।

सूचनाग्रन्थाः (References)

१. वरदराजः लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-3

अव्ययीभावसमासप्रकरणम् -तृतीयासप्तम्योर्बहुलम् इति सूत्रपर्यन्तम्

उद्देश्यानि (Learning Outcomes)

- समासादीनां नियमज्ञानेन भाषायाः विस्तृतज्ञानम्।
- पदानां व्युपत्तिज्ञानेन अर्थज्ञानम्।
- लौकिक-अलौकिकविग्रहयोः भेदं गृह्णाति।
- अव्ययीभावसमासभेदान् जानाति।

प्राग्व्यपेक्षाः (Pre requisites)

पूर्वस्मिन् एकके केवलसमास्य सविस्ततं अध्ययनं कृतम्। अस्मिन् एकके समासप्रकरणे अव्ययीभावसमासः तस्य भेदान् उदाहरणानि च प्रतिपादयन्ति।

मुख्यपदानि (Key words)

अव्ययीभावसमासः, उपसर्जनसंज्ञा, उपसर्जनं प्राक् नपुंसकत्वं, लोपनिषेधः, अमादेशः

Discussion

१. अव्ययीभावः। (२-१-५)

एकपदं सूत्रम्। अधिकारोऽयं प्राक् तत्पुरुषात्। तत्पुरुषः इति सूत्रं यावत् अव्ययीभावः इति पदम् अनुवर्तते।

२. अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावाऽत्ययाऽसंप्रतिशब्दप्रादुर्भाव-पश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु। (२-१-६)

अनेन सूत्रेण अव्ययीभावसमासः विधीयते। विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते सोऽव्ययीभावः। प्रायोणाविग्रहो नित्यसमासः, प्रायेण अस्वपदविग्रहो वा। विभक्तौ
यथा - **अधिहरि**।
हरि ङि अधि इति स्थिते अनेन सूत्रेण समासः विधीयते।

३. प्रथमानिर्दिष्टं समास उपसर्जनम्। (१-२-४३)

त्रिपदं सूत्रम्। प्रथमानिर्दिष्टं, समास, उपसर्जनम् इति पदच्छेदः। अनेन सूत्रेण उपसर्जनसंज्ञा विधीयते। समासशास्त्रे प्रथमानिर्दिष्टम् उपसर्जनसंज्ञं स्यात्। 'उपसर्जनं पूर्वम्'इत्यादावस्य प्रयोजनम्।

SGOU

हरि ङि अधि इत्यत्र अव्ययीभावसमासः, अव्ययं विभक्ति..... इत्यदिना सूत्रेण। समासत्वात् सुपः लुक्। अधि इत्यस्य अनेन सूत्रेण उपसर्जनसंज्ञा।

४. उपसर्जनं पूर्वम्। (२-२-३०)

द्विपदं सूत्रम्। उपसर्जनं पूर्वम् इति पदच्छेदः। समासे इति अनुवर्तते। समासे उपसर्जनं प्राक् प्रयोज्यम्। अधेः प्राक् प्रयोगः।

अधिहरि - हरौ इति अधिहरि इति लौकिकविग्रहः। हरि ङि अधि इति अलौकिकविग्रहः। हरि ङि अधि इति स्थिते 'अव्ययं विभक्ति...'इत्यादिना सूत्रेण अव्ययीभावसमासः। 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति सूत्रेण अधि इत्यस्य उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्'इति तस्य पूर्वनिपाते अधिहरि ङिः। समासत्वात् 'कृत्तद्धितसमासाश्च'इति सूत्रेण प्रातिपदिकत्वात् 'सुपो धातुप्रातिपदिकयोः'इति सुपः लोपे अधिहरि इति जाते प्रथमाविभक्तौ सुप्रत्यये प्रातिपदिकत्वात् सु इत्यस्य 'अव्ययीभावश्च'इति नपुंसकत्वात् 'अव्ययादाप्सुपः'इति सोः लुकि अधिहरि इति रूपम्।

५. अव्ययीभावश्च। (२-४-१८)

द्विपदं सूत्रमिदम्। अव्ययीभावः च इति पदच्छेदः। नपुंसकम् इति अनुवर्तते। अनेन सूत्रेण नपुंसकत्वं विधीयते। अयं नपुंसकं स्यात्।

यथा - अधिहरि इत्यस्मात् सु प्रत्ययः। अव्ययीभावश्च इति सूत्रेण नपुंसकत्वात् 'अव्ययादाप्सुपः'इति सुलोपः।

६. नाव्ययीभावादतोऽम्त्वपञ्चम्याः। (२-४-८३)

न अव्ययीभावाद् अतः अम् तु अपञ्चम्याः इति षड्पदं सूत्रम्। अनेन सूत्रेण लोपनिषेधः, अमादेशः च विधीयते। अदन्तादव्ययीभावात् सुपो न लुक्, तस्य पञ्चमीं विना अमादेशश्च स्यात्।

गाः पातीति गोपः, तस्मिन् अधिगोपम्।

यथा - अधिगोप सु इत्यवस्थायां 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः'इति सूत्रेण अमादेशः। 'अमि पूर्वः'इति पूर्वरूपे **अधिगोपम्।**

७. तृतीयासप्तम्योर्बहुलम्। (२-४-८४)

द्विपदं सूत्रम्। तृतीयासप्तम्योः बहुलम् इति पदच्छेदः। अदन्तात् अव्ययीभावात् अम् इति चानुवर्तन्ते। अदन्तादव्ययीभावात्तृतीयासप्तम्योः बहुलम् अम् भावः स्यात्।

अधिगोपम्, अधिगोपेन, अधिगोपे वा - गाः पाति इति गोपाः तस्मिन् इति अधिगोपम् इति लौकिकविग्रहः। अत्र अधि इति सप्तम्यर्थमव्ययं सुबन्तेन सह समस्यते। गोपा ङि अधि इति अलौकिकविग्रहः। 'अव्ययं विभक्ति.....'इत्यादिना सूत्रेण अव्ययीभावसमासः। समासत्वात् 'कृत्तद्धितसमासाश्च'इति सूत्रेण प्रातिपदिकसंज्ञायां 'सुपो धातुप्रातिपदिकयोः'इति सुपः लोपे गोपा अधि। 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति

सूत्रेण अधि इत्यस्य उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्'इति सूत्रेण पूर्वनिपाते अधि गोपा। प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सुप्रत्यये अधिगोपा सु। अव्ययीभावत्वात् 'अव्ययीभावश्च'इति सूत्रेण नपुंसकत्वात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य'इति अधिगोपा इत्यस्य ह्रस्वे अधिगोप सु । 'अव्ययादाप्सुपः'इति सुपः लोपे प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः'इति लोपनिषेधे अमादेशे अधिगोप अम्। 'अमि पूर्वः'इति सूत्रेण पूर्वरूपैकादेशे **अधिगोपम्** इति।

अधिगोपशब्दस्य तृतीया एकवचनविवक्षायां प्रातिपदिकसंज्ञायां 'स्वौजसमौट् .....'इत्यादिना सूत्रेण टाप्रत्यये अधिगोप टा। 'तृतीयासप्तम्योर्बहुलम्'इति सूत्रेण पाक्षिकेण अमि अधिगोप अम्। 'अमि पूर्वः'इति सूत्रेण पूर्वरूपैकादेशे **अधिगोपम्** इति रूपम्।

अमादेशाभावपक्षे अधिगोप टा। 'टाङसिङसामिनात्स्याः'इति टा इत्यस्य इनादेशे अधिगोप इन। 'अद्गुणः'इति सूत्रेण गुणे **अधिगोपेन** इति रूपम्।

सप्तम्यां अधिगोप ङि। ङेः विकल्पेन अमादेशे अधिगोप अम्। 'अमि पूर्वः'इति पूर्वरूपैकादेशे अधिगोपम्। अमादेशाभावपक्षे अधिगोप ङि। 'लशक्वतद्धिते'इति सूत्रेण ङकारस्य इत्संज्ञायां 'तस्य लेपः'इति लोपे अधिगोप इ। 'आद्गुणः'इति गुणे **अधिगोपे** इति च रूपम्।

कृष्णस्य समीपम् उपकृष्णम् - समीपार्थे विद्यमानम् अव्ययं समर्थेन सुबन्तेन सह समस्यते।

कृष्णस्य समीपम् उपकृष्णम् इति लौकिकविग्रहः। कृष्ण ङस् उप इति अलौकिकविग्रहः। 'अव्ययं विभक्तिसमीप....'इत्यादिना अव्ययीभावसमासः। समासत्वात् सुपः लुक्। 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति सूत्रेण उप इत्यस्य उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्'इति पूर्वनिपाते उप कृष्ण ङस्। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे उप कृष्ण। तस्मात् प्रथमैकवचनविवक्षायां सुप्रत्यये 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः'इति सूत्रेण अमादेशे उपकृष्ण अम्। 'अमि पूर्वः'इति पूर्वरूपे **उपकृष्णम्** इति रूपम्।

मद्राणां समृद्धिः सुमद्रम् - मद्र आम् सु इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति....'इत्यादिना सूत्रेण समासे 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्'इति पूर्वनिपातेन सुमद्र आम्। समासत्वात् प्रतिपदिकत्वेन सुपः लुकि सुमद्र। तस्मात् सुप्रत्यये 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः'इति सूत्रेण अमादेशे सुमद्र अम्। 'अमि पूर्वः'इति सूत्रेण पूर्वरूपे सुमद्रम् इति रूपम्।

एवं यवनानां व्यृद्धिः **दुर्यवनम्**। मक्षिकाणाम् अभावः **निर्मक्षिकम्**।

हिमस्य अत्ययः अतिहिमम्- हिम ङस् अति इति अलौकिकविग्रहः। 'अव्ययं .....'इत्यादिना समासे 'प्रथमानिर्दिष्टं....'इति उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्'इति अतेः पूर्वनिपाते अति हिम ङस्। समासत्वात्

प्रातिपदिकत्वात् सुपः लोपे अतिहिम। प्रथमाविवक्षायां सुप्रत्यये अव्ययीभावश्च इति अव्ययत्वात् सुपः लोपे प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः'इति तन्निषेधे अमादेशे अतिहिम अम्। पूर्वरूपे अतिहिमम् इति रूपम्।

तृतीयाविभक्तौ अतिहिमटा। 'तृतीयासप्तम्योर्बहुलम्'इति टाप्रत्ययस्य अमादेशे पूर्वरूपे अतिहिमम्। अमादेशाभावपक्षे 'टाङसिङसामिनात्स्याः'इति इनादेशे अतिहिम इन। 'आद्गुणः'इति गुणे अतिहिमेन इति रूपम्।

अतिनिद्रम् - निद्रा सम्प्रति न युज्यत इति अतिनिद्रम्। निद्रा सु अति इति अलौकिकविग्रहः। 'अव्ययं विभक्ति....'इत्यादिना अव्ययीभावसमासे उपसर्जनसंज्ञायां पूर्वनिपाते अतिनिद्र सु। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे अतिनिद्रा। 'अव्ययीभावश्च'इति नपुंसकत्वात् प्रातिपदिकस्य 'ह्रस्वे नपुंसके प्रातिपदिकस्य'इति ह्रस्वे अतिनिद्र। प्रथमैकवचने सुप्रत्यये अमादेशे पूर्वरूपे अतिनिद्रम् इति रूपम्।

एवं **इतिहरि**।

हरिशब्दस्य प्रकाशः इतिहरि। हरि ङस् इति इति अलौकिकविग्रहः। 'अव्ययं विभक्ति...'इत्यादिना समासे, समासत्वात्सुपः लुकि हरि इति। इति इत्यस्य पूर्वनिपाते इतिहरि। तस्मात्सुप्रत्यये 'स्वमोर्नपुंसकात्'इति सुलोपे इतिहरि इति रूपम्।

अनुविष्णु - विष्णोः पश्चात् अनुविष्णु। विष्णु ङस् अनु इति अलौकिकविग्रहः। अनोः उपसर्जनत्वात् पूर्वनिपाते अनुविष्णु ङस्। प्रातिपदिकत्वात् ङसः लोपे अनुविष्णु। प्रथमैकवचनप्रत्यये अनुविष्णु सु।'स्वमोर्नपुंसकात्'इति सुलोपे अनुविष्णु। योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः।

एवं रूपस्य योग्यम् **अनुरूपम्**। अर्थम् अर्थं प्रति **प्रत्यर्थम्**।

यथाशक्ति - शक्तिमनतिक्रम्य यथाशक्ति। शक्ति अम् यथा इति अलौकिकविग्रहे 'अव्ययं विभक्ति....'इति समासे उपसर्जनसंज्ञायां प्राक् प्रयोगे यथाशक्ति सु। सोः लोपे, पुनः प्रथमैकवचने सुप्रत्यये 'अव्ययादात्सुपः'इति सुपः लोपे यथाशक्ति।

पुनरावृत्तिः (Recap)

- पूर्वपदार्थप्रधानो अव्ययीभावः ।
- विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते।
- प्रथमानिर्दिष्टं समास उपसर्जनम् इति सूत्रेण उपसर्जनसंज्ञा।
- उपसर्जनं पूर्वम् इति सूत्रेण समासे उपसर्जनं प्राक्प्रयोज्यम्।
- अव्ययीभावश्च इति सूत्रेण नपुंसकत्वम्।

- नाव्ययीभावादतोऽम्त्वपञ्चम्याः इति लोपनिषेधः, अमादेशः।
- तृतीयासप्तम्योर्बहुलम् इति सूत्रेण सुप्रत्ययस्य अमादेशः।
- कृष्णस्य समीपम् उपकृष्णम्।
- मद्राणां समृद्धिः सुमद्रम्।
- हिमस्य अत्ययः अतिहिमम्।
- निद्रा सम्प्रति न युज्यत इति अतिनिद्रम्।
- विष्णोः पश्चात् अनुविष्णु।
- शक्तिमनतिक्रम्य यथाशक्ति।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. पूर्वपदार्थप्रधानः समासःकः?
२. उपसर्जनसंज्ञाविधायकं सूत्रं किम्?
३. केन सूत्रेण नपुंसकत्वं विधीयते?
४. कृष्णस्य समीपम् उपकृष्णम् - अस्य अलौकिकविग्रहः कः?
५. रूपस्य योग्यम् समस्तरूपं किम्?
६. अदन्तादव्ययीभावात्तृतीयासप्तम्योः बहुलम् अम्भावः। केन सूत्रेण?
७. अतिहिम टा इति स्थिते अमादेशः केन सूत्रेण?
८. केन सूत्रेण उपकृष्णम् इत्यत्र अमादेशः?
९. शक्तिं अनतिक्रम्य इत्यस्य समस्तपदम्?
१०. कृष्णस्य समीपम् उपकृष्णम्, अत्र कः समासः?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

लघुव्याख्यानं कुरुत

१. अव्ययीभावश्च।
२. तृतीयासप्तम्योर्बहुलम्।

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

१. उपसर्जनं पूर्वम् सूत्रं व्याख्यात।
२. उपकृष्णं सप्रमाणं समासकार्याणि विशदयत।
३. तृतीयासप्तम्योर्बहुलम् सूत्रं व्याख्यात।

SGOU

निर्दिष्टाभ्यासः (Assignments)

१. इतिहरि, अतिनिद्रं, यथाशक्ति- सप्रमाणं समासकार्याणि विशदयत।
२. अधिगोपम्, अधिगोपेन, अधिगोपे - सप्रमाणं समासकार्याणि विशदयत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. अव्ययीभावसमासः।
२. प्रथमानिर्दिष्टं समास उपसर्जनम्।
३. अव्ययीभावश्च।
४. कृष्ण ङस् उप।
५. अनुरूपम्।
६. तृतीयासप्तम्योर्बहुलम्।
७. तृतीयासप्तम्योर्बहुलम्।
८. नाव्ययीभावादतोऽम्त्वपञ्चम्याः।
९. यथाशक्ति।
१०. अव्ययीभावः।

सूचनाग्रन्थाः (References)

१. वरदराजः लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-4

अव्ययीभावसमासे शिष्टो भागः

(अव्ययीभावे चाकाले इति सूत्रादारभ्य झयः इति सूत्रपर्यन्तम्)

उद्देश्यानि (Learning Outcomes)

- समासादीनां नियमज्ञानेन भाषायाः विस्तृतज्ञानम्।
- पदानां व्युपत्तिज्ञानेन अर्थज्ञानम्।
- लौकिक-अलौकिकविग्रहयोः भेदं गृह्णाति।
- अव्ययीभावसमासभेदान् जानाति।

प्राग्व्यपेक्षाः (Pre requisites)

समासप्रकरणे केवलसमासः, अव्ययीभावसमासे कानिचन सूत्राणि च अस्माभिः पठितानि। अस्मिन् एकके समासप्रकरणम् अव्ययीभावसमासे शिष्टभागे विद्यमानानि सूत्राणि च पठामः।

मुख्यपदानि (Key words)

सादेशः,संख्या समस्यते, टच्, समासान्त प्रत्ययः, जरसादेशः, टच् तद्धितप्रत्ययः, टेः लोपः,विकल्पेन टच्

Discussion

१. अव्ययीभावे चाकाले। (६-३-८१)

त्रिपदं सूत्रम्। अव्ययीभावे च अकाले इति पदच्छेदः। अनेन सूत्रेण सहस्य सादेशः विधीयते। सहस्य सः इति अनुवर्तते। सहस्य सः स्यादव्ययीभावे न तु काले।

यथा - सहरि।

सहरि - हरेः सादृश्यं सहरि। हरि ङस् सह इति अलौकिकविग्रहः। 'अव्ययं विभक्ति.....'इत्यादिना समासः। समासे 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति सह इत्यस्य उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्'इति तस्य प्राक् प्रयोगे सह हरि ङस्। प्रातिपदिकत्वे 'सुपो धातुप्रातिपदिकयोः'इति सुपः लोपे सह हरि। 'अव्ययीभावे चाकाले'इति सूत्रेण सह इत्यस्य सादेशे सहरि। ततः प्रथमैकवचनविवक्षायां सु प्रत्यये सुपः लोपे सहरि इति रूपम्।

एवं ज्येष्ठस्य आनुपूर्व्येण **अनुज्येष्ठम्**। चक्रेण युगपत् **सचक्रम्**। क्षत्राणां सम्पत्तिः **सक्षत्रम्**। तृणमप्यपरित्यज्य **सतृणम्**। अग्निग्रन्थपर्यन्तमधीते **साग्नि**।

SGOU

सदृशः सख्या **ससखि** - सखि टा सह इति अलौकिकविग्रहः। 'अव्ययं विभक्ति... 'इत्यादिना समासः। सदृशः इत्यर्थे सह इत्यव्ययं च। समासत्वात् सुपः लुक्। सहेत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे सह सखि। 'अव्ययीभावे चाकाले'इति सादेशे ससखि। पुनः सुप्रत्यये स्वमोर्नपुंसकात् इति सुलोपः।

२. नदीभिश्च। (२-१-२०)
नदीभिः च इति द्विपदं सूत्रम्। अनेन सूत्रेण संख्या नदीवाचकशब्देन समस्यते। नदीभिः सह संख्या समस्यते। संख्या नदीवाचकाः सुबन्तेन सह समस्यते समाहारार्थे। अयं समासः समाहारार्थे एव।
उदा - **पञ्चगङ्गम्, द्वियमुनम्**।

पञ्चगङ्गम् - पञ्चानां गङ्गानां समाहारः पञ्चगङ्गम्। पञ्चन् आम् गङ्गा आम् इति अलौकिकविग्रहः। 'नदीभिश्च'इति सूत्रेण समासे, सुपः लोपे, पञ्चन् गङ्गा। 'नलोपः प्रातिपदिकान्तस्य'इति सूत्रेण नलोपे पञ्चगङ्गा। अव्ययीभावत्वात् नपुंसके 'ह्रस्वो नपुंसके प्रातिपदिकस्य'इति ह्रस्वे पञ्चगङ्ग। पुनः सुप्रत्यये अमादेशे पूर्वरूपे पञ्चगङ्गम् इति रूपम्।

द्वियमुनम्- द्वयोः यमुनयोः समहारः द्वियमुनम्। 'समाहारे चायमिष्यते'इति वार्तिकेन समाहारे (समूहे) अर्थे एव अयं समासः विधीयते।

३. तद्धिताः। (४-१-७६)
एकपदं सूत्रम्। आपञ्चमसमाप्तेरधिकारोऽयम्। पञ्चमाध्यायपर्यन्तं तद्धिताः।

४. अव्ययीभावे शरत्प्रभृतिभ्यः। (५-४-१०७)
द्विपदं सूत्रम्। टच्, तद्धिताः, समासान्ताः इति पदानि अनुवर्तन्ते। शरदादिभ्यष्टच् स्यात् समासान्तोऽव्ययीभावे।
यथा - **शरदः समीपम् उपशरदम्**।

उपशरदम् - शरद् ङस् उप इति अलौकिकविग्रहः। 'अव्ययं..... इत्यादिना' अव्ययीभावसमासः। समासत्वात् उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्'इति उप इत्यस्य पूर्वनिपाते उपशरद् ङस्। समासत्वात् प्रातिपदिकत्वात् 'सुपो धातुप्रातिपदिकयोः'इति सुपः लोपे उपशरद्। 'अव्ययीभावे शरत्प्रभृतिभ्यः'इति सूत्रेण टच् प्रत्यये उपशरद् टच्। 'चुटू'इति सूत्रेण टकारस्य इत्संज्ञायां 'हलन्त्यम्'इति सूत्रेण चकारस्य च इत्संज्ञायां 'तस्य लोपः'इति लोपे उपशरद् अ - उपशरद। सुप्रत्यये अमादेशे पूर्वरूपे उपशरदम् इति रूपम्।
एवं **प्रतिविपाशम्**।

५. जरायाः जरश्च।

जरायाः जरस् च इति त्रिपदं गणसूत्रम्। अव्ययीभावे उत्तरपदस्य जराशब्दस्य जरसादेशः टच् प्रत्ययश्च स्यात्। उदा -उपजरसम्

उपजरसम्- जरायाः समीपम् उपजरसम्। जरा ङस् उप इति अलौकिकविग्रहः 'अव्ययं विभक्ति....'इत्यादिना समासः। उपशब्दस्य पूर्वनिपातः। उपजरा ङस्। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे उपजरा। 'जरायाः जरश्च'इति गणसूत्रेण जराशब्दस्य जरसादेशे टचि च उपजरस् टच्। अनुबन्धलोपे उपजरस् अ - उपजरस। सुप्रत्यये अमादेशे पूर्वरूपे उपजरसम् इति रूपम्।

६. अनश्च। (५-४-१०८)

अनः च इति द्विपदं सूत्रम्। अनः अन्नन्तात् इत्यर्थः। अव्ययीभावात् इति अनुवर्तते। अन्नन्तादव्ययीभावाट्टच् इत्यर्थः।

यथा -उपराजम्।

७. नस्तद्धिते। (६-१-१४४)

नः तद्धिते इति द्विपदं सूत्रम्। भस्य, टेः, लोपः इति अनुवर्तन्ते। नान्तस्य भस्य टेः लोपः तद्धिते। उदा - उपराजम् ।

उपराजम् - राज्ञः समीपम् उपराजम् इति लौकिकविग्रहः। राजन् ङस् उप इति अलौकिकविग्रहः। 'अव्ययं विभक्ति ...'इत्यादिना सूत्रेण समासे 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति उप इत्यस्य उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्'इति प्राक् प्रयोगे उपराजन् ङस्। 'सुपो धातुप्रतिपदिकयोः'इति सुपः लोपे उपराजन्। 'अनश्च'इति सूत्रेण टच् प्रत्यये अनुबन्धलोपे उपराजन् अ। 'यचि भम्'इति सूत्रेण अन् इत्यस्य भसंज्ञायां 'नस्तद्धिते'इति टेः लोपे उपराज। तस्मात् सुप्रत्यये अमादेशे पूर्वरूपे उपराजम् इति।

एवम् आत्मनि इति **अध्यात्मम्**।

८. नपुंसकादन्यतरस्याम्। (५-४-१०९)

द्विपदं सूत्रम्। नपुंसकात् अन्यतरस्याम् इति पदच्छेदः। अनः, अव्ययीभावात्, टच्, समासान्तः, तद्धितः इत्यादयः अनुवर्तन्ते। अन्नन्तं यद् क्लीबं तदन्तादव्ययीभावात् टज्वा स्यात्।

यथा - उपचर्मम् उपचर्म वा।

उपचर्मम् , **उपचर्म** - चर्मणः समीपम् उपचर्मम्, उपचर्म वा। चर्मन् ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति....'इत्यादिसूत्रेण अव्ययीभावसमासः। उपसर्जसंज्ञायाम् 'उपसर्जनं पूर्वम्'इति सूत्रेण उप इत्यस्य पूर्वनिपाते उपचर्मन् ङस्। प्रातिपदिकत्वात् सुपः लोपे उपचर्मन्। 'नपुंसकादन्यतरस्याम्'इति सूत्रेण पाक्षिकेण टच् प्रत्यये अनुबन्धलोपे उपचर्मन् अ। 'नस्तद्धिते'इति सूत्रेण टेर्लोपे उपचर्म् अ उपचर्म। तस्मात् प्रथमैकवचनविवक्षायां सुप्रत्यये अमादेशे पूर्वरूपे उपचर्मम् इति रूपम्।

SGOU

टचः अभावे उपचर्मन् शब्दात् सुप्रत्यये उपचर्मन् सु। अनुबन्धलोपे उपचर्मन् स्। 'हल्ङाब्भ्यो दीर्घात्....'इत्यादिना सुलोपे, 'नलोपः प्रातिपदिकान्तस्य'इति नलोपे च उपचर्म इति रूपम्।

९. झयः। (५.४.१११)

एकपदं सूत्रम्। अव्ययीभावात्, टच्, अन्यतरस्यां, समासान्तः इत्यादयः अनुवर्तन्ते। झयन्तादव्ययीभावाद् टज्वा स्यात्।

उदा - उपसमिधम्, उपसमित्।

उपसमिधम्, उपसमित् - समिधः समीपम् उपसमिधम्, उपसमित् वा। समिध् ङस् उप इति अलौकिकविग्रहः। 'अव्ययं विभक्ति....'इत्यादिना समासः। उप इत्यस्य उपसर्जनसंज्ञायां पूर्वनिपाते उपसमिध् ङस्। समासत्वात् सुपः लोपे उपसमिध्। 'झयः'इति सूत्रेण टच् प्रत्यये अनुबन्धलोपे उपसमिध् अ -उपसमिध। सुप्रत्यये अमादेशे पूर्वरूपे उपसमिधम् इति।

टचः अभावे उपसमिध्। सु प्रत्यये अनुबन्धलोपे सकारस्य लोपे उपसमिध् अ। 'वावसाने'इति सूत्रेण चर्त्वे उपसमित्।

चर्त्वाभावे 'झलां जशोऽन्ते'इति धकारस्य जश्त्वे उपसमिद् इति च रूपम्।

अस्य खण्डस्य संक्षिप्तीकरणम्

अव्ययीभावसमासः।

अव्ययीभावः, अव्ययं विभक्ति....इत्यादि, प्रथमानिर्दिष्टं समास उपसर्जनम्, उपसर्जनं पूर्वम्, अव्ययीभावश्च, नाव्ययीभावादतोऽम्त्वपञ्चम्याः, अव्ययीभावे चाकाले, इत्यादीनि सूत्राणि तथा अधिहरि, अधिगोपम्, उपकृष्णम्, निर्मक्षिकम्, यथाशक्ति, अनुरूपम् इत्यादि समासरूपाणि च अस्मिन् विभागे लिखितानि।

अव्ययीभावसमासस्य केचनभेदाः अधो दीयन्ते पट्टिकायाम्।

प्रसिद्धाः केचन भेदाः।

लौकिकविग्रहः	अलौकिकविग्रहः	समसितं रूपं	सुप्प्रत्यये सविशेषता
हरौ इति	हरि ङि अधि	अधिहरि	अव्ययादाप्सुपः
कृष्णस्य समीपम्	कृष्ण ङस् उप	उपकृष्णम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
मद्राणां समृद्धिः	मद्र अम् सु	सुमद्रम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
यवनानां व्यृद्धिः	यवन आम् दुर्	दुर्यवनम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
मक्षिकाणाम् अभावः	मक्षिकआम् निर्	निर्मक्षिकम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
हिमस्य अत्ययः	हिम ङस् अति	अतिहिमम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
निद्रा सम्प्रति न युज्यते	निद्रा सु अति	अतिनिद्रम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः,अमि पूर्वः

SGOU

हरिशब्दस्य प्रकाशः	हरि ङस् इति	इतिहरि	अव्ययादाप्सुपः
विष्णोः पश्चात्	विष्णु ङस् अनु	अनुविष्णु	अव्ययादाप्सुपः
रूपस्य योग्यम्	रूप ङस् अनु	अनुरूपम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमिपूर्वः
दिनं दिनं प्रति	दिन अम् प्रति	प्रतिदिनम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
शक्तिम् अनतिक्रम्य	शक्ति अम् यथा	यथाशक्ति	अव्ययादाप्सुपः
हरेः सादृश्यम्	हरि ङस् सह	सहरि	अव्ययादाप्सुपः
ज्येष्ठस्य आनुपूर्व्येण	ज्येष्ठ ङस्अनु	अनुज्येष्ठम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
चक्रेण युगपत्	चक्र टा सह	सचक्रम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
क्षत्राणां सम्पत्तिः	क्षत्र अम् सह	सक्षत्रम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
तृणमपि अपरित्यज्य	तृण अम् सह	सतृणम्	नाव्ययाभावादतोऽम्त्वपञ्चम्याः, अमि पूर्वः
अग्निग्रन्थपर्यन्तम्	अग्नि अम् सह	साग्नि	अव्ययादाप्सुपः

पुनरावृत्तिः (Recap)

- अव्ययीभावे चाकाले इति सूत्रेण सादेशः।
- नदिभिश्च इति सूत्रेण संख्या नदिभिः सह समस्यते।
- अव्ययीबावे शरत्प्रभृतिभ्यःइति सूत्रेण शरदादिभ्यः टच् विधीयते।
- अनश्च इति सूत्रेण टच् विधीयते।
- नपुंसकादन्यतरस्याम् इति सूत्रेण क्लीबन्तात् टच् विधीयते।
- झयः इति सूत्रेण विकल्पेन टच् विधीयते।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. अव्ययीभावे समासे सादेशः केन सूत्रेण विधीयते?
२. कया सह संख्या समस्यते?
३. झयः इति सूत्रस्य वृत्तिः का?
४. संख्या नदीवाचकाः सुबन्तेन सह समस्यते ..... अर्थे।(पूरयत)
५. अव्ययीभावे समासे जरसादेशःकेनगणसूत्रेण?
६. नपुंसकादन्यतरस्याम् इति सूत्रेण किं विधीयते?
७. शरदः समीपम् - समस्तपदं किम्?
८. पञ्चगङ्गम् इत्यस्य विग्रहः?
९. उपराजम् इत्यत्र टेः लोपः केन सूत्रेण विधीयते?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

SGOU

१. पञ्चगङ्गम् इत्यत्र केन सूत्रेण कः समासः विधीयते?
२. अव्ययीभावसमासे कस्य पदस्य प्राधान्यं वर्तते?

II. **लघुव्याख्यानं कुरुत**

१. नस्तद्धिते।
२. जरायाः जरश्च

एकैकया खण्डिकया उत्तराणि लिखत
(Answer the following questions in a paragraph)

१. उपराजम् सप्रमाणं समस्यत।
२. सहरि सप्रमाणं समस्यत।
३. नपुंसकादन्यतरस्याम् - सूत्रं व्याख्यात।

निर्दिष्टाभ्यासः (Assignments)

१. अव्ययीभावसमासं सोदाहरणं विवृणुत।
२. पञ्चगङ्गम्, द्वियमुनम्, उपशरदम् - सप्रमाणं समस्यत।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. अव्ययीभावे चाकाले।
२. नदीभिः सह संख्या समस्यते।
३. झयान्तादव्ययीभावात् टच् वा स्यात्।
४. समाहारे।
५. जरायाः जरश्च।
६. क्लीबन्तात् टच् प्रत्ययाः।
७. उपशरदम्।
८. पञ्चानां गङ्गानां समाहारः।
९. नस्तद्धिते।

सूचनाग्रन्थाः (References)

१. वरदराजः लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
3. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

SGOU

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५

२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७

३. वरदराजः लघुसिद्धान्तकामुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

BLOCK -6

लघुसिद्धान्तकौमुदी-तत्पुरुष-बहुव्रीहि-द्वन्द्वसमासानां विस्तरेण अध्ययनम्

SGOU

Unit-1

तत्पुरुषसमासः

उद्देश्यानि (Learning Outcomes)

- तत्पुरुषसमासस्य अवगमनम्।
- समासादीनां नियमज्ञानेन भाषायाः ज्ञानम्।
- पदानां व्युत्पत्तिज्ञानेन अर्थज्ञानम्।
- सूत्रवार्तिकानां ग्रहणम्।

प्राग्व्यपेक्षाः(Pre requisites)

समासप्रकरणे केवलसमासः अव्ययीभावसमासश्च अस्माभिः पठिताः। इदानीं तत्पुरुषसमासं पठितुम् अवसरः सम्प्राप्तः। श्रद्धया पठन्तु।

मुख्यपदानि (Key words)

द्वितीयान्तं श्रितादिभिः, तृतीयान्तं तृतीयार्थकृतैः गुणवचनैः, चतर्थ्यन्तम् अर्थादिभिः, पञ्चम्यन्तं भयार्थेन, षष्ठ्यन्तं सुबन्तेन, शौण्डादिभिः सप्तम्यन्तम्

Discussion

तत्पुरुषः।

उत्तरपदार्थप्रधानः तत्पुरुषसमासः।

१. तत्पुरुषः। (२-१-२२)

अधिकारसूत्रोऽयम्। एकपदं सूत्रम्। अधिकारोऽयं प्राक् बहुव्रीहेः। शेषो बहुव्रीहिः इति सूत्रं यावत्।

२. द्विगुश्च। (२-१-२३)

द्विगुः च इति द्विपदं सूत्रम्। तत्पुरुष इति अनुवर्तते। द्विगुरपि तत्पुरुषसंज्ञकः स्यात्। संख्यापूर्वो द्विगुः इति सूत्रेण द्विगुसंज्ञः विधीयते।

३. द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः। (२-१-२४)

द्विपदं सूत्रम्। द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति पदच्छेदः। अम्, औट्, शस् इति द्वितीयाप्रत्ययाः। समस्यते, तत्पुरुषः इति अनुवर्तते। द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः वा समस्यते, स च तत्पुरुषः।

यथा -**कृष्णश्रितः** - कृष्णं श्रितः कृष्णश्रितः इति लौकिकविग्रहः। कृष्ण अम् श्रित सु इति अलौकिकविग्रहः। अत्र कृष्णं इति द्वितीयान्तं श्रितः इति सुबन्तेन सह

समस्यते।'द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपोर्लुकि कृष्णाश्रित। प्रथमैकवचनप्रत्यये सु प्रत्यये अनुबन्धलोपे कृष्णाश्रित स्। 'ससजुषो रुः'इति सस्य रेफे कृष्णाश्रित र्। 'खरवसानयोर्विसर्जनीयः'इति रेफस्य विसर्गे कृष्णाश्रितः इति रूपम्।

एवं दुःखम् अतीतः **दुःखातीतः**।
गर्तं पतितः **गर्तपतितः**।
ग्रामं गतः **ग्रामगतः**।
ग्रामम् अत्यस्तः **ग्रामात्यस्तः**।
ग्रामं प्राप्तः **ग्रामप्राप्तः**।
संशयम् आपन्नः **संशयापन्नः**।

४. तृतीया तत्कृतार्थेन गुणवचनेन। (२-१-३०)

त्रिपदं सूत्रम्। तृतीया तत्कृतार्थेन गुणवचनेन इति। सह, सुपा, सुप्, समासः, विभाषा, तत्पुरुषः, इति अनुवर्तन्ते। तत्कृत इति लुब्धतृतीयकं पदं, तत्कृतेन इत्यर्थः। तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा समस्यते। टा, भ्याम्, भिस् इति तृतीयाप्रत्ययाः।

उदा - **शंकुलाखण्डः**- शंकुलया खण्डः शंकुलाखण्डः इति लौकिकविग्रहः। शंकुला टा खण्डः सु इत्यलौकिकविग्रहः। 'तृतीया तत्कृतार्थेन गुणवचनेन'इति सूत्रेण तत्पुरुषसमासः। समासत्वात् प्रातिपदिकत्वात् सुपो लुकि शंकुलाखण्ड। प्रथमैकवचनप्रत्यये रुत्वे विसर्गे शंकुलाखण्डः इति रूपम्।

एवं धान्येन अर्थः धान्यार्थः।

तत्कृतेति किम्? अक्ष्णा काणः।

तृतीया तत्कृतेन गुणवचनेन इत्युक्तत्वात् अत्र न समासः। काणत्वं न तृतीयान्तार्थेन अक्ष्णा उत्पादितम्। काणत्वं रोगावस्था। अतो न समासः।

५. कर्तृकरणे कृता बहुलम्। (२-१-३२)

त्रिपदं सूत्रम्। कर्तृकरणे कृता बहुलम् इति पदच्छेदः। कर्ता च करणं च अनयोः समाहारः कर्तृकरणम्, तस्मिन् कर्तृकरणे। तृतीया, सह, तत्पुरुषः इति अनुवर्तन्ते। कर्तरि करणे च तृतीया कृदन्तेन बहुलम् समस्यते।

उदा - **हरित्रातः** - हरिणा त्रातः हरित्रातः इति लौकिकविग्रहः। हरि टा त्रात इति अलौकिकविग्रहः। 'कर्तृकरणे कृता बहुलम्'इति सूत्रेण हरिणा इति कर्तरि तृतीया त्रात इति कृतन्तेन सह समस्यते। उपसर्जनसंज्ञायाम् उपसर्जनस्य हरि इत्यस्य पूर्वनिपातत्वे हरि टा त्रात। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे हरित्रात। प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च हरित्रातः।

एवं नखैः भिन्नः **नखभिन्नः**। (नख भिस् भिन्न सु)

प्रत्ययग्रहणे तदन्तग्रहणम् इति नियमेन कृता इत्यस्यकृदन्तेन इति अर्थकल्पनं कार्यम्।

हरिणा त्रातः हरित्रातः।

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्। (परिभाषा)

कृदन्तग्रहणे गतिपूर्वकस्य कारकपूर्वकस्यापि ग्रहणं कार्यम्। क्रियायोगे प्रादीनां गतिसंज्ञा। कर्तृकर्मादयः कारकाः।

उदा - **नखनिर्भिन्नः** - नखैः निर्भिन्नः नखनिर्भिन्नः इति लौकिकविग्रहः। नख भिस् निर्भिन्न सु इति अलौकिकविग्रहः। अत्र निर् इति गतिपूर्वक कृदन्तः भवति निर्भिन्नः इति। नखैः इति करणे तृतीया निर्भिन्न इति कृदन्तेन समस्यते। 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्'इति परिभाषया। कर्तृकरणे कृता बहुलम् इति सूत्रेण समासः समासत्वात् प्रातिपदिकत्वात् सुपः लोपे नखनिर्भिन्न। प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च नखनिर्भिन्नः इति।

६. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। (२-१-३६)

द्विपदं सूत्रम्। ङे, भ्यां, भ्यस् प्रत्ययाः चतुर्थीविभक्तिप्रत्ययाः। सह, सुपा, विभाषा, समासः, तत्पुरुषः इति अनुवर्तन्ते। चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा समस्यते।

उदा - **यूपदारु** - यूपाय दारु यूपदारु इति लौकिकविग्रहः। यूप ङे दारु सु इत्यलौकिकविग्रहः। 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः'इति सूत्रेण तत्पुरुषसमासः। यूपाय इति चतुर्थ्यन्तं तदर्थेन पदार्थेन दारुणा सह समस्यते। यूपाय इत्यस्य उपसर्जनत्वात् प्राक्प्रयोगः। समासत्वात् प्रातिपदिकत्वात् 'स्वमोर्नपुंसकात्'इति सुपः लोपे यूपदारु। तत्पुरुषसमासे उत्तरपदानुसारमेव लिङ्गनिश्चयः। अतः दारुशब्दस्य नपुंसकत्वात् समासोऽपि नपुंसकः। ततः सुप् प्रत्ययस्य लोपे यूपदारु इति रूपम्।

तदर्थेन प्रकृतिविकृतिभाव एवेष्टः। (वार्तिकम्)

तदर्थेन अत्र प्रकृतिविकृतिभावो ग्राह्यः। प्रकृतिः उपादानकारणम् इति। विकृतिः तु कार्यम्। रन्धनाय स्थाली इत्यत्र न समासः। यतः स्थाली रन्धनाय उपादानकारणं न भवति। तत्र प्रकृतिविकृतिभावोऽपि न।

अर्थेन नित्यसमासो विशेषलिङ्गता चेति वक्तव्यम् (वार्तिकम्)

चतुष्पदं वार्तिकम्। अनेन वार्तिकेन तत्पुरुषसमासः विधीयते। चतुर्थ्यन्तस्य अर्थशब्देन सह समासः। स समासः नित्यसमासः। विशेष्यस्य लिङ्गमेव स्यात्।

यथा -**द्विजार्थः**- द्विजाय अयं द्विजार्थः सूपः इति लौकिकविग्रहः। द्विज ङे अर्थ सु इति अलौकिकविग्रहः। 'अर्थेन नित्यसमासो विशेषलिङ्गता चेति वक्तव्यम्'इति वार्तिकेन नित्यसमासः। समासत्वात् प्रातिपदिकत्वात् सुपो लुकि द्विज अर्थ। सवर्णदीर्घे द्विजार्थ। प्रथमैकवचने सु अनुबन्धलोपे रुत्वे विसर्गे द्विजार्थः। सूपः इत्यस्य पुंलिङ्गत्वात् द्विजार्थः।

स्त्रीत्वविवक्षायां द्विजाय इयं द्विजार्था यवागूः। द्विज ङे अर्थ सु समासत्वात् सुपोर्लोपे सवर्णदीर्घे द्विजार्थ। स्त्रीत्वविवक्षायां टाप्। अनुबन्धलोपे द्विजार्थ आ, सवर्णदीर्घे द्विजार्था। सुप्रत्यये अनुबन्धलोपे 'हल्ङाब्भ्यो....'इति सलोपे द्विजार्था इति रूपम्।

द्विजाय इदं द्विजार्थं पयः। द्विज ङे अर्थ सु। समासत्वात् सुलोपे द्विज अर्थ। दीर्घे द्विजार्थ। सुप्रत्यये अमादेशे पूर्वरूपे द्विजार्थम् इति रूपम्।

एवं भूतेभ्यः बलिः **भूतबलिः**।

गोभ्यः हितं **गोहितम्**।
गोभ्यः रक्षितं **गोरक्षितम्**।

७. पञ्चमी भयेन।(२-३-३७)

द्विपदं सूत्रम्। ङसि, भ्यां, भ्यस् प्रत्ययाः पञ्चम्याम्। सुप्, सह, समासः, विभाषा, तत्पुरुषः अनुवर्तन्ते। पञ्चम्यन्तं सुबन्तं भयार्थसुबन्तेन सह विकल्पेन समस्यते स तत्पुरुषः।

यथा - **चोरभयम्** - चोराद् भयं चोरभयम् इति लौकिकविग्रहः। चोर ङसि भय सु इति अलौकिकविग्रहः। 'पञ्चमी भयेन'इति सूत्रेण पाक्षिकेण तत्पुरुषसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे उपसर्जनसंज्ञायां उपसर्जनस्य पूर्वनिपाते च चोरभय। तस्मात् सुप्रत्यये अमादेशे पूर्वरूपे चोरभयम् इति रूपम्।

एवं चोराद् भीतः **चोरभीतः**।
चोराद् भीतिः **चोरभीतिः**।
चोराद् भीः **चोरभीः**।

८. स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन। (२-१-३९)

द्विपदं सूत्रम्। पञ्चमी इति अनुवर्तते। पञ्चम्यन्तानि स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन सह समस्यते स तत्पुरुषः। स्तोकञ्च अन्तिकञ्च दूरञ्च स्तोकान्तिकदूराणि, स्तोकान्तिकदूराणि अर्थः येषां तानि स्तोकान्तिकदूरार्थानि, तानि च कृच्छ्रं च स्तोकान्तिकदूरार्थकृच्छ्राणि।

यथा - **स्तोकादागतः**-स्तोकात् आगतः स्तोकादागतः इति लौकिकविग्रहः। अत्र आगतः इति क्तप्रत्ययेन साकम् अनेन सूत्रेण समासः।

९. पञ्चम्याः स्तोकादिभ्यः। (६-३-२)

द्विपदं सूत्रम्। अलुगुत्तरपदे इति सूत्रम् अनुवर्तते। स्तोकादिभ्यः पञ्चम्याः अलुक् उत्तरपदे।

यथा -**स्तोकान्मुक्तः** - स्तोकात् मुक्तः स्तोकान्मुक्तः इति लौकिकविग्रहः। स्तोक ङसि मुक्त सु इति अलौकिकविग्रहः। 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन'इति सूत्रेण समासे, सुपः लोपे प्राप्ते 'पञ्चम्याः स्तोकादिभ्यः'इति सूत्रेण तन्निषेधे स्तोक ङसि मुक्त - स्तोकात् मुक्त। 'यरोऽनुनासिकेऽनुनासिको वा'इति अनुनासिकत्वे स्तोकान्मुक्त। सुपि विभक्तिकार्ये स्तोकान्मुक्तः।

एवं **अन्तिकादागतः**।
अभ्याशादागतः।
दूरादागतः।
कृच्छ्रादागतः। एते अलुक्समासाः।

१०.षष्ठी। (२-२-८)

एकपदं सूत्रम्। सह, सुपा, समासः, विभाषा, तत्पुरुषः इत्यादयः अनुवर्तन्ते। ङस्, ओस्, आम् इति षष्ठीप्रत्ययाः। षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह विकल्पेन समस्यते, स तत्पुरुषः।

यथा -**राजपुरुषः** - राज्ञः पुरुषः राजपुरुषः इति लौकिकविग्रहः। राजन् ङस् पुरुष सु इति अलौकिकविग्रहः। 'षष्ठी'इति सूत्रेण तत्पुरुषसमासः। समासत्वात् 'कृत्तद्धितसमासाश्च'इति सूत्रेण प्रातिपदिकसंज्ञा। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे राजन् पुरुष। 'नलोपः प्रातिपदिकान्तस्य'इति सूत्रेण राजन् इत्यस्य नकारलोपे राज पुरुष। प्रथमैकवचने सुप्रत्यये राजपुरुष सु। उकारस्य 'हलन्त्यम्'इति सूत्रेण इत्संज्ञायां 'तस्य लोपः'इति लोपे राजपुरुष स्। 'ससजुषो रुः'इति सूत्रेण सस्य रुत्वे राजपुरुष र्। 'खरवसानयोर्विसर्जनीयः'इति सूत्रेण रेफस्य विसर्गे राजपुरुषः इति रूपम्।

११. पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। (२-२-१)

त्रिपदं सूत्रम्। पूर्वापरोत्तरम् एकदेशिना एकाधिकरणे । पूर्वं च अपरं च अधरं च उत्तरं च एषां समाहारः पूर्वापराधरोत्तरम्। एकदेशः अस्यास्तीति एकदेशी, तेन एकदेशिना। एकं च तदधिकरणं च एकाधिकरणम्। अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वापराधरोत्तराणि समासविधायकसूत्रे प्रथमानिर्दिष्टानि ततः उपसर्जनानि।

उदा -**पूर्वकायः** - पूर्वं कायस्य पूर्वकायः इति लौकिकविग्रहः। पूर्व सु काय ङस् इति अलौकिकविग्रहः। 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे'इति सूत्रेण समासः। समासे पूर्वशब्दस्य प्रथमानिर्दिष्टत्वात् उपसर्जनत्वम्। अतः तस्य प्राक् प्रयोगः। समासत्वात् प्रातिपदिकत्वात् 'सुपो धातुप्रातिपदिकयोः'इति सुपः लोपे पूर्वकाय। प्रथमैकवचने सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे पूर्वकायः इति।

एवं अपरं कायस्य **अपरकायः**।

अधरं कायस्य **अधरकायः**।

उत्तरं कायस्य **उत्तरकायः**।

एकाधिकरणे किम्?

पूर्वछात्राणाम् इत्यत्र अवयविनः छात्राणाम् अनेकत्वात् न समासः।

१२. अर्धं नपुंसकम्। (२-२-२)

द्विपदं सूत्रम्। सह, सुपा, समासः, तत्पुरुषः, विभाषा इत्यादयः अनुवर्तन्ते। समांशवाच्यार्थशब्दो नित्यं क्लीबे, स समस्यते। नित्यनपुंसकः अर्धशब्दः अवयविवाचकेन सुबन्तेन सह विकल्पेन समस्यते स तत्पुरुषः। अर्धं प्रथमानिर्दिष्टम्। अतः उपसर्जनत्वम्। उपसर्जनत्वात् प्राक् प्रयोगः।

यथा - **अर्धपिप्पली** -अर्धं पिप्पल्याः अर्धपिप्पली इति लौकिकविग्रहः। अर्ध सु पिप्पली ङस् इति अलौकिकविग्रहः। 'अर्धं नपुंसकम्'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपोर्लुकि अर्धपिप्पली। तस्मात् सुप्रत्यये नपुंसकत्वात् 'स्वमोर्नपुंसकात्'इति सुलोपे अर्धपिप्पली इति।

१३. सप्तमी शौण्डैः। (२-१-४०)

द्विपदं सूत्रम्। सप्तमी शौण्डैः इति। सह, सुपा, समासः, तत्पुरुषः, विभाषा इत्यादयः अनुवर्तन्ते। ङि, ओस्, सुप् इति प्रत्ययाः सप्तम्याम्। सप्तम्यन्तं शौण्डादिभिः समस्यते। अर्थात् सप्तम्यन्तं सुबन्तं शौण्डादिभिः सुबन्तैः

सह समस्यते। स तत्पुरुषः।

यथा - **अक्षशौण्डः** - अक्षेषु शौण्डः अक्षशौण्डः इति लौकिकविग्रहः। अक्ष सुप् शौण्ड सु इति अलौकिकविग्रहः। 'सप्तमी शौण्डैः'इति सूत्रेण समासः। समासत्वात् 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति उपसर्जनत्वात् प्राक् प्रयोगः। अक्ष सुप् शौण्ड सु। समासत्वात् प्रातिपदिकत्वात् सुपोर्लुक् अक्ष शौण्ड। तस्मात् विभक्तिकार्ये रुत्वे विसर्गे अक्षशौण्डः इति रूपम्। द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादि विभक्तीनां प्रयोगवशात्समासो ज्ञेयः।

१४.दिक्संख्ये संज्ञायाम्।(२-१-५०)

द्विपदं सूत्रम्। दिक् च संख्या च दिक्संख्ये। समानाधिकरणेन, समासः, तत्पुरुषः इत्यादयः अनुवर्तन्ते। दिक्वाचकं संख्यावाचकं च सुबन्तं समानाधिकरणेन सुबन्तेन सह समस्यते स तत्पुरुषः। संज्ञायामेवेति नियमार्थं सूत्रम्।

यथा - **पूर्वेषुकामशमी** - पूर्वः इषुकामशमी पूर्वेषुकामशमीइति लौकिकविग्रहः। पूर्व सु इषुकामशमी सु इत्यलौकिकविग्रहः। 'दिक्संख्ये संज्ञायाम्'इति सूत्रेण पूर्वः इति दिक्वाचकशब्दः इषुकामशमी इति समानाधिकरणेन सुबन्तेन सह समस्यते। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे पूर्व इषुकामशमी। गुणे पूर्वेषुकामशमी। तस्मात् सुप्रत्यये अनुबन्धकार्ये पूर्वेषुकामशमी इति रूपम्।

सप्तर्षयः। सप्त च ते ऋषयः च सप्तर्षयः इति लौकिकविग्रहः। सप्तन् जस् ऋषि जस् इति अलौकिकविग्रहः। 'दिक्संख्ये संज्ञायाम्'इति सूत्रेण समासः। 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति सूत्रेण उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्'इति सूत्रेण सप्तन् शब्दस्य पूर्वनिपाते सप्तन् जस् ऋषि जस्। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे सप्तन् ऋषिः। 'नलोपः प्रातिपदिकान्तस्य'इति नलोपे सप्त ऋषि। 'आद्गुणः'इति सूत्रेण गुणे, 'उरण् रपरः'इति सूत्रेण रपरत्वे च सप्तर्षि। तस्मात् जस्प्रत्यये विभक्तिकार्ये सप्तर्षि जस्। जसि च इति गुणे सप्तर्षे अस्। एचोऽयवायावः इति अयादेशे सप्तर्षयस्। रुत्वे विसर्गे च सप्तर्षयः इति रूपम्।

तेनेह न - उत्तराः वृक्षाः। संज्ञाभावात् न समासः।

अत्र समानाधिकरणसुबन्तेन सह न समासः। एवं पञ्च ब्राह्मणः इत्रत्यापि।

'तत्पुरुषः'इति सूत्रादारभ्य दिक्संख्ये संज्ञायां तावत् एकके ऽस्मिन् व्याख्यातं कृतम्। तदत्र वर्तते।

समासकार्यम्	विधीयमानं सूत्रम्	उदाहरणम्
१. द्वितीयातत्पुरुषः	द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः	कृष्णश्रितः
२. तृतीयातत्पुरुषः	तृतीया तत्कृतार्थेन गुणवचनेन कर्तृकरणे कृता बहुलम्	शङ्कुलाखण्डः हरित्रातः
३. चतुर्थीतत्पुरुषः	चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः	यूपदारु
४. पञ्चमीतत्पुरुषः	स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन	स्तोकान्मुक्तः
५. षष्ठीतत्पुरुषः	अर्धं नपुंसकम्	अर्धपिप्पली
६. सप्तमीतत्पुरुषः	सप्तमी शौण्डैः	अक्षशौण्डः

SGOU

पुनरावृत्तिः (Recap)

- उत्तरपदार्थप्रधानः तत्पुरुषः।
- द्विगुरपि तत्पुरुषसंज्ञकः।
- संख्यापूर्वो द्विगुः।
- द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः - द्वितीयाप्रत्ययाः समस्यते।
- तृतीया तत्कृतार्थेन गुणवचनेन-तृतीयान्तार्थकृतगुणवचनेनार्थेन सह वा समस्यते।
- चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः - चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा समस्यते।
- पञ्चमी भयेन -पञ्चम्यन्तं सुबन्तं भयार्थसुबन्तेन सह वा समस्यते।
- षष्ठी - षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह वा समस्यते।
- पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे -अवयविना सह पूर्वादयः समस्यन्ते। षष्ठीसमासापवादः।
- सप्तमीशौण्डैः - सप्तम्यन्तं सुबन्तं शौण्डादिभिः सुबन्तैः सह समस्यते।

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. हरिणा त्रातः.....। (पूरयत)
२. नखनिर्भिन्नः इत्यत्र कः समासः?
३. रन्धनाय स्थाली इत्यत्र समासः कुतः न स्यात्?
४. द्विजार्थः सूपः - अत्र कुतः पुंलिङ्गत्वम्?
५. स्तोकान्मुक्तः इत्यत्र कुतः ङस्प्रत्ययस्य लुक् न भवति?
६. अर्धपिप्पली इत्यत्र समासविधायकं सूत्रं किम्?
७. अक्षेषु शौण्डः अक्षशौण्डः केन सूत्रेण समासो विधीयते?
८. सप्तर्षयः इत्यत्र समासविधायकं सूत्रं किम्?
९. उत्तरं कायस्य .....। (पूरयत)
१०. चोरभयम् इत्यस्य लौकिकविग्रहः कः?

SGOU

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

१. तृतीया तत्कृतार्थेन गुणवचनेन इत्यत्र तत्कृतेति किम्?
२. पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इति सूत्रे एकाधिकरणं किमर्थम्?

II. लघुव्याख्यानं कुरुत

१. तदर्थेन प्रकृतिविकृतिभाव एवेष्टः
२. द्विगुश्च

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

व्याख्यात

१. द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।
२. कर्तृकरणे कृता बहुलम्।
३. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः।
४. षष्ठी।

निर्दिष्टाभ्यासः (Assignments)

सप्रमाणं समस्यत

१. यूपदारु, राजपुरुषः।
२. अन्तिकादागतः, पूर्वकायः।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. हरित्रातः।
२. कर्तृकरणे कृता बहुलम्।
३. प्रकृतेः विकृतित्वाभावात्।
४. अर्थेन नित्यसमासो विशेषलिङ्गता चेति वक्तव्यम् इति वार्तिकेन समासः विशेष्यस्य लिङ्गता च स्यात्।
५. पञ्चम्याः स्तोकादिभ्यः इति सूत्रेण।
६. अर्धं नपुंसकम्।
७. सप्तमीशौण्डैःइति सूत्रेण।
८. दिक्संख्ये संज्ञायाम्।
९. उत्तरकायः।
१०. चोराद् भयं चोरभयम् इति लौकिकविग्रहः।

SGOU

सूचनाग्रन्थाः(References)

१. वरदराजः लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः(Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-2

कर्मधारयसमासः द्विगुसमासश्च

उद्देश्यानि (Learning Outcomes)

- कर्मधारय-द्विगुसमासयोः अवगमनम्
- समासादीनां नियमज्ञानेन भाषायाः ज्ञानम्।
- पदानां व्युपत्तिज्ञानेन अर्थज्ञानम्।
- सूत्रवार्तिकानां ग्रहणम्।

प्राग्व्यपेक्षाः (Pre requisites)

समासप्रकरणे केवलसमासः अव्ययीभावसमासः तत्पुरुषश्च अस्माभिः पठिताः। अस्मिन् एकके कर्मधारयद्विगुसमासयोः पठितुम् अवसरः सम्प्राप्तः। श्रद्धया पठन्तु।

मुख्यपदानि (Key words)

पुंवद्भावः, ञः, आदिवृद्धिः, टच्प्रत्ययः, कर्मधारयसमासः, द्विगु, एकवचनं,नुंसकत्वं, उपमानपूर्वपदसमासः, मध्यमपदलोपसमासः, नञ्समासः, नलोपः, नुडागमः,गतिसंज्ञा, उपसर्जनसंज्ञा, ह्रस्वः,

Discussion

१. तद्धितार्थोत्तरपदसमाहारे च। (२-२-५९)

द्विपदं सूत्रम्। तद्धितार्थश्च उत्तरपदं च समाहारश्च एषां समाहारः तद्धितार्थोत्तरपदसमाहारः, तस्मिन् इति विग्रहः। दिक्संख्ये, समानाधिकरणेन, सह, सुपा, समासः, तत्पुरुषः इत्यादयः अनुवर्तन्ते। तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये समस्येते। (समानाधिकरणेन सुबन्तेन सह विकल्पेन समस्यते इति भावः)

यथा - **पूर्वशाला**- पूर्वस्यां शालायां भवः पूर्वशाला इति समासः।

सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। (वार्तिकम्)

त्रिपदं वार्तिकम्। अनेन वार्तिकेन पुंवद्भावः विधीयते। समासतद्धितादिषु वृत्तिमात्रेषु सर्वनाम्नः पुंवद्भावः। पूर्वस्यां शालायां भवः पौर्वशालः।

यथा - **पूर्वशाला**- पूर्वा शाला इत्यत्र पूर्वाशब्दस्य पुंवद्भावे पूर्वशाला।

२. दिक्पूर्वपदादसंज्ञायां ञः। (४-२-१०७)

त्रिपदं सूत्रम्। दिक्पूर्वपदात्, असंज्ञायां ञः इति पदच्छेदः। ञः तद्धितप्रत्ययः।

SGOU

दिक्पूर्वपदात् भवाद्यर्थे ञः स्यादसंज्ञायाम्।
उदा - पूर्वशाला ञ। ञकारस्य 'चुटू'इति इत्संज्ञायां लोपः। पूर्वशाला अ।

३. तद्धितेष्वचामादेः। (७-२-११७)
त्रिपदं सूत्रम्। तद्धितेषु अचाम् आदेः इति पदच्छेदः। अचः, ञ्णिति, वृद्धिः इति अनुवर्तन्ते। अनेन सूत्रेण आदिवृद्धिः विधीयते। ञिति, णिति च तद्धितेषु अचामादेरचो वृद्धिः स्यात्।
यथा - **पौर्वशालः** - पूर्वस्यां शालायां भवः पौर्वशालः इति लौकिकविग्रहः। पूर्वा ङि शाला ङि इति अलौकिकविग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे पूर्वा शाला। 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः'इति वार्तिकेन पूर्वाशब्दस्य पुल्लिङ्गभावे पूर्वशाला। 'दिक्पूर्वपदादसंज्ञायां ञः'इति सूत्रेण ञप्रत्यये पूर्वशाला ञ। 'चुटू'इति सूत्रेण ञकारस्य इत्संज्ञायां लोपे पूर्वशाला अ। 'तद्धितेष्वजामादेः'इति सूत्रेण ञित्वादादिवृद्धौ पौर्वशाला अ। पौर्वशाला इत्यस्य आकारस्य भसंज्ञायां 'यस्येति च'इति सूत्रेण लकारात्परस्य आकारस्य लोपे पौर्वशाल् अ पौर्वशाल। तद्धितान्तत्वात् प्रातिपदिकसंज्ञा। प्रथमैकवचने सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च पौर्वशालः इति रूपम्।
पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहिः।

द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्। (वार्तिकम्)
उत्तरपदे द्वन्द्वतत्पुरुषसमासयोः नित्यसमासत्वम्।
यथा - **पञ्चगवधनः** - पञ्च गावो धनं यस्य सः पञ्चगवधनः। अत्र पञ्चन्गोशब्दयोः तद्धितार्थेति विकल्पेन समासे प्राप्ते 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्'इति वार्तिकबलात् नित्यसमासः।

४. गोरतद्धितलुकि। (५-४-९२)
द्विपदं सूत्रम्। गोः अतद्धितलुकि इति। तत्पुरुष इति अनुवर्तते। अनेन सूत्रेण टच्प्रत्ययः विधीयते। गोऽन्तात्तत्पुरुषात् टच् स्यात् समासान्तो न तु तद्धितलुकि।
यथा - **पञ्चगवधनः।**पञ्च गावो धनं यस्य इति पञ्चगवधनः। पञ्चन् जस् गो जस् धन सु इति अलौकिकविग्रहः।प्रथम'अनेकमन्यपदार्थे'इति बहुव्रीहिसमासः। पुनः पञ्चन् गोशब्दयोः 'तद्धितार्थे'इति विकल्पेन समासे प्राप्ते 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्'इति समासे पञ्चन् शब्दस्य नस्य लोपे 'गोरतद्धितलुकि'इति सूत्रेण टच्प्रत्यये अनुबन्धलोपे अवादेशे च पञ्चगव। पञ्चगवधन सु इति स्थिते अनुबन्धलोपे रुत्वे विसर्गे च पञ्चगवधनः।

५. तत्पुरुषः समानाधिकरणः कर्मधारयः। (१-२-४२)
त्रिपदं सूत्रम्। अनेन सूत्रेण कर्मधारयसमासः विधीयते। समानाधिकरणः तत्पुरुषः कर्मधारयसंज्ञः स्यात्। 'विशेषणं विशेष्येण बहुलम्'इत्यादावस्य प्रयोजनम्। समानाधिकरणानि पदानि यस्य अवयवभूतानि भवन्ति सः तत्पुरुषः कर्मधारयः।

यथा - **नीलोत्पलम्**।

६. संख्यापूर्वो द्विगुः। (२-१-५२)

द्विपदं सूत्रम्। संख्या पूर्वः (अवयवः) यस्य सः संख्यापूर्वः। अनेन सूत्रेण द्विगुसंज्ञा विधीयते। तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुसंज्ञः स्यात्।

यथा - पञ्चगवम्। 'द्विगुरेकवचनम्'इत्यादावस्य प्रयोजनम्।

७. द्विगुरेकवचनम्। (२-४-१)

द्विगुः एकवचनम् इति पदच्छेदः। अनेन सूत्रेण एकवचनं विधीयते। द्विग्वर्थः समाहारः एकवत्स्यात्।

यथा - पञ्चानां गवां समाहारः पञ्चगवम्। समासे पञ्चगव इति जाते 'द्विगुरेकवचनम्'इति सूत्रेण एकवचने सुप्रत्ययः।

८. स नपुंसकम्। (२-४-१७)

सः नपुंसकम् इति द्विपदं सूत्रम्। अनेन सूत्रेण नुंसकत्वं विधीयते। समाहारे द्विगुः, द्वन्द्वः च नपुंसकं स्यात्।

यथा - **पञ्चगवम्**। पञ्चानां गवां समाहारः पञ्चगवम्। पञ्चन् आम् गो आम् इति अलौकिकविग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च'इति सूत्रेण समासत्वम्। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे पञ्चन् गो। नलोपे पञ्च गो। 'गोरतद्धितलुकि'इति सूत्रेण टच्। अनुबन्धलोपे पञ्च गो अ। अवादेशे पञ्चगव। 'संख्यापूर्वो द्विगुः'इति सूत्रेण द्विगुसंज्ञा। 'द्विगुरेकवचनम्'इति एकवद्भावे सुप्रत्यये 'स नपुंसकम्'इति नपुंसकत्वात् सोः अमि पञ्चगव अम्। पूर्वरूपे पञ्चगवम् इति रूपम्।

९. विशेषणं विशेष्येण बहुलम्। (२-१-५७)

त्रिपदं सूत्रम्। समानाधिकरणे, सह, सुपा, तत्पुरुषः च अनुवर्तन्ते।अनेन सूत्रेण कर्मधारयसमासः विधीयते। भेदकं भेद्येन समानाधिकरणेन बहुलं समस्यते। विशेषणं सुबन्तं विशेष्येण सुबन्तेन सह बहुलं समस्यते स तत्पुरुषः इति।

यथा - **नीलोत्पलम्**। नीलं च तत् उत्पलं च नीलोत्पलम्। नील सु उत्पल सु इति अलौकिकविग्रहः। 'विशेषणं विशेष्येण बहुलम्'इति सूत्रेण समासः। समासत्वात् प्रतिपदिकत्वात् सुपः लोपे नील उत्पल। प्रथमानिर्दिष्टत्वात् उपसर्जनसंज्ञा 'उपसर्जनं पूर्वम्'इति नीलस्य पूर्वत्वम् - नील उत्पल। गुणे नीलोत्पल। तस्मात् सुपि अमादेशे पूर्वरूपे नीलोत्पलम् इति।

बहुलग्रहणात् क्वचिन्नित्यम्।

कृष्णसर्पः। कृष्णश्चासौ सर्पश्च कृष्णसर्पः। अत्र नित्यसमासः।

रामो जामदग्न्यः इत्यत्र न समासः।

१०.उपमानानि समान्यवचनैः। (२-१-५५)

द्विपदं सूत्रम्। सुबन्तः, समासः, तत्पुरुषः, च अनुवर्तन्ते। अनेन सूत्रेण उपमानपूर्वपदसमासः विधीयते। उपमानवाचकसुबन्तपदानि सामान्यधर्मवाचकैः सुबन्तैः सह समस्यन्ते स तत्पुरुषः।

यथा - **घनश्यामः**।घन इव श्यामः धनश्यामः। घन सु श्याम सु इति अलौकिकविग्रहः। 'उपमानानि सामान्यवचनैः'इति समासः। 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति घनशब्दस्य उपसर्जनसंज्ञा। 'उपसर्जनं पूर्वम्'इति पूर्वप्रयोगः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे घनश्याम। तस्मात् प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च घनश्यामः।

शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्। (वार्तिकम्)

चतुष्पदं वार्तिकम्। अनेन सूत्रेण मध्यमपदलोपसमासः विधीयते। शाकपार्थिवः इत्यादीनां रूपाणां सिद्ध्यर्थं उत्तरपदलोपार्थं च समासः वक्तव्यः।

यथा -**शाकपार्थिवः**। शाकप्रियः पार्थिवः शाकपार्थिवः। शाकप्रिय सु पार्थिव सु इत्यलौकिकविग्रहः। 'शकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्'इति वार्तिकेन समासः उत्तरपदलोपस्य। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे शाक पार्थिव। तस्मात् सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च शाकपार्थिवः इति रूपम्।

एवं **देवब्राह्मणः**- देवपूजको ब्राह्मणः देवब्राह्मणः।

११. नञ्। (२-२-६)

एकपदं सूत्रम्। सह, सुपा, समासः, तत्पुरुषः च अनुवर्तन्ते। अनेन सूत्रेण नञ्समासः विधीयते। नञ् सुपा सह समस्यते स तत्पुरुषः।

यथा -**अब्राह्मणः**। न ब्राह्मणः अब्राह्मणः। न ब्राह्मण सु इति अलौकिकविग्रहः। नञ् इति सूत्रेण समासः। समासत्वात् सुपः लुकि न ब्राह्मण।

१२. नलोपो नञः। (६-३-७३)

द्विपदं सूत्रम्। नलोपः नञः इति पदच्छेदः। अनेन सूत्रेण नलोपः विधीयते। नञो नस्य लोपो स्यादुत्तरपदे।

यथा -**अब्राह्मणः**। न ब्राह्मणः अब्राह्मणः। न ब्राह्मण सु इति अलौकिकविग्रहः। 'नञ्'इति सूत्रेण समासे समासत्वात् प्रातिपदिकत्वात् सुपः लोपे न ब्राह्मण , 'नलोपो नञः'इति सूत्रेण नञः नकारलोपे अब्राह्मण। तस्मात् सुप्रत्यये अनुबन्धलोपे विभक्तिकार्ये अब्राह्मणः इति।

१३. तस्मान्नुडचि। (३-३-४७)

त्रिपदं सूत्रम्। तस्मात् नुट् अचि इति पदच्छेदः। उत्तरपदे इति अनुवर्तते। अनेन सूत्रेण नुडागमः विधीयते। लुप्तनकारान्तान्नञः उत्तरपदस्याजादेर्नुडागमः।

यथा - **अनश्वः**।न अश्वः अनश्वः। न अश्व सु। 'नञ्'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे न अश्व। 'उपसर्जनं पूर्वम्'इति न इत्यस्य पूर्वनिपातः। 'नलोपो नञः'इति नञः नकारलोपे अ अश्व।

'तस्मान्नुडचि'इति सूत्रेण नुट् इति आगमे अनुबन्धलोपे अ न् अश्व - अनश्व। तस्मात् सुप्रत्यये अनुबन्धलोपे विभक्तिकार्ये अनश्वः इति रूपम्।

१४.कुगतिप्रादयः। (२-२-१८)

एकपदं सूत्रम्। अनेन सूत्रेण समासः विधीयते। नित्यं, समासः, सह, सुपा, तत्पुरुषः एते अनुवर्तन्ते। कु इति निन्दार्थसूचकम् अव्ययम्। कु, गति, प्रादयः एते समर्थेन सुबन्तेन सह नित्यं समस्यते स तत्पुरुषः।

यथा - **कुपुरुषः**। कुत्सितः पुरुषः कुपुरुषः। कु पुरुष सु इति अलौकिकविग्रहः। 'कुगतिप्रादयः'इति सूत्रेण समासे 'प्रथमानिर्दिष्टं समास उपसर्जनम्'इति कु इत्यस्य उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्'इति प्राक् प्रयोगः। समासत्वात् प्रातिपदिकत्वात् सुपो लुक् कुपुरुष। ततः प्रथमैकवचने सुप्रत्यये अनुबन्धकार्ये कुपुरुषः इति रूपम्।

१५.ऊर्यादिच्विडाचश्च। (१-४-६१)

ऊर्यादिच्विडाचः च इति द्विपदं सूत्रम्। गति इति पदमनुवर्तते। अनेन सूत्रेण गतिसंज्ञा विधीयते। ऊर्यादयः च्व्यन्ताः डाजन्ताः च क्रियायोगे गतिसंज्ञाः स्युः। 'कुगतिप्रादयः'इत्यादावस्य प्रयोजनम्।

यथा - **ऊरीकृत्य**। 'ऊर्यादिच्विडाचश्च'इति गतिसंज्ञायां कुगतिप्रादयः इति सूत्रेण तत्पुरुसमासः। 'समासेऽनञ्पूर्वे क्त्वो ल्यप्'इति सूत्रेण क्त्वा इत्यस्य 'ल्यप्' आदेशे लकारपकारयोः इत्संज्ञायां लोपे ऊरीकृय। 'ह्रस्वस्य पिति कृति तुक्'इति तुक् आगमे अनुबन्धलोपे, कित्वात् अन्तावयवे ऊरीकृत्य। सुप्रत्यये अव्ययत्वात् 'स्वमोर्नपुंसकात्'इति सुलोपे ऊरीकृत्य इति रूपम्।

शुक्लीकृत्य - अशुक्लं शुक्लं सम्पद्यमानं कृत्वा शुक्लीकृत्य। 'कृभ्वस्तियोगे सम्पद्यमाने कर्तरि च्विः'इति शुक्लशब्दात् च्विप्रत्यये 'अस्य च्वौ'इति दीर्घे 'ऊर्यादिच्विडाचश्च'इति शुक्ली इत्यस्य गतिसंज्ञायां 'कुगतिप्रादयः'इति सूत्रेण समासे शुक्लीकृत्वा। 'समासेऽनञ्पूर्वे क्त्वो ल्यप्'इति ल्यप्। अनुबन्धलोपे शुक्लीकृ य। तुगागमे अनुबन्धलोपे शुक्लीकृत्य। समुदायात् सुप्रत्यये अव्ययत्वात् सुलोपे शुक्लीकृत्य इति रूपम्।

एवं **पटपटाकृत्य**।

सुपुरुषः- शोभनः पुरुषः सुपुरुषः। सु पुरुष सु इति अलौकिकविग्रहः। 'कुगतिप्रादयः'इति सूत्रेण समासे समासत्वात् प्रातिपदिकत्वात् सुपः लोपे सुपुरुष। उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्'इति सु इत्यस्य पूर्वनिपातः। सुपुरुष। विभक्तिकार्ये सुपुरुषः इति रूपम्।

प्रादयो गताद्यर्थे प्रथमया। (वार्तिकम्)

त्रिपदं वार्तिकम्। अनेन वार्तिकेन तत्पुरुषसमासः विधीयते। गताद्यर्थे प्रादयः प्रथमया सह समस्यते स तत्पुरुषः।

यथा -**प्राचार्यः**। प्रगतः आचार्यः प्राचार्यः। प्र आचार्य सु । 'प्रादयो गताद्यर्थे प्रथमया'इति वार्तिकेन

तत्पुरुषसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे प्र आचार्य। उपसर्जनत्वात् 'उपसर्जनं पूर्वम्' प्र इत्यस्य प्राक् प्रयोगः। सवर्णदीर्घे प्राचार्य। तस्मात् सुप्रत्यये विभक्तिकार्ये प्राचार्यः इति ।

अत्यादयः क्रान्ताद्यर्थे द्वितीयया। (वार्तिकम्)

त्रिपदं वार्तिकम्।अनेन वार्तिकेन तत्पुरुषसमासः विधीयते। क्रान्ताद्यर्थे विद्यमानाः अत्यादयः द्वितीयान्तेन समस्यते, स तत्पुरुषः।

यथा - **अतिमालः**।अतिक्रान्तो मालाम् अतिमालः। अति माला अम् इति अलौकिकविग्रहः। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया'इति वार्तिकेन तत्पुरुषसमासः। अत्यादेः प्रथमानिर्दिष्टत्वात् उपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्'इति प्राक् प्रयोगे अति माला अम्। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे अतिमाला।

१६.एकविभक्ति चापूर्वनिपाते। (१-२-४४)

त्रिपदं सूत्रम्। एकविभक्तिः च अपूर्वनिपाते इति पदच्छेदः। अनेन सूत्रेण उपसर्जनसंज्ञा विधीयते। विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात् न तु तस्य पूर्वनिपातः।

यथा - अतिमालः इत्यस्य अतिक्रान्तो मालाम् इति विग्रहः। समासे 'एकविभक्ति चापूर्वनिपाते'इति सूत्रेण माला इत्यस्य उपसर्जनत्वम्। तस्य प्राग्प्रयोगः न।

१७.गोस्त्रियोरुपसर्जनस्य। (१-२-४८)

द्विपदं सूत्रम्। गोस्त्रियोः उपसर्जनस्य इति पदच्छेदः। ह्रस्वः, प्रातिपदिकस्य इति अनुवर्तते। गोश्च स्त्री च गोस्त्रियौ, तयोः गोस्त्रियोः। अनेन सूत्रेण ह्रस्वः विधीयते। उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तञ्च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्।

यथा - **अतिमालः**। अतिक्रान्ता मालाम् अतिमालः। अति माला अम् इति अलौकिकविग्रहः। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया'इति वार्तिकेन तत्पुरुषसमासः। 'एकविभक्ति चापूर्वनिपाते'इति सूत्रेण मालाशब्दस्य उपसर्जनत्वेऽपि तस्य पूर्वनिपातो न स्यात्। अतिमाला इति। 'गोस्त्रियोरुपसर्जनस्य'इति सूत्रेण ह्रस्वे अतिमाल। प्रथमैकवचनविवक्षायां तस्मात् सुप्रत्यये अनुबन्धलोपे विभक्तिकार्ये अतिमालः इति रूपम्।

अवादयः क्रुष्टाद्यर्थे तृतीयया। (वार्तिकम्)

त्रिपदं वार्तिकम्। अनेन वार्तिकेन तत्पुरुषसमासः विधीयते। क्रुष्टाद्यर्थे अवादयः तृतीयान्तेन सह समस्यते स तत्पुरुषः।

यथा - **अवकोकिलः** - अवक्रुष्टः कोकिलया इति लौकिकविग्रहः। अव कोकिला टा इत्यलौकिकविग्रहः। 'अवादयः क्रुष्टाद्यर्थे तृतीयया'इति वार्तिकेन तत्पुरुषसमासः। अवादयः प्रथमानिर्दिष्टाः अतः उपसर्जनत्वात् पूर्वनिपातः। अत्र कोकिलया इति तृतीयान्तस्य उपसर्जनत्वेऽपि पूर्वनिपातत्वं न स्यात्। 'गोस्त्रियोरुपसर्जनस्य'इति सूत्रेण ह्रस्वे अवकोकिल। तस्मात् सुप्रत्यये विभक्तिकार्ये अवकोकिलः इति रूपम्।

पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। (वार्तिकम्)

त्रिपदं वार्तिकम्। अनेन वार्तिकेन तत्पुरुषसमासः विधीयते। ग्लानाद्यर्थे पर्यादयः चतुर्थ्यन्तेन सह समस्यते, स तत्पुरुषः।

यथा - **पर्यध्ययनः**। परिग्लानो अध्ययनाय पर्यध्ययनः। परि अध्ययन ङे इति अलौकिकविग्रहः। 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या'इति वार्तिकेन तत्पुरुषसमासः। अध्ययनशब्दस्य उपसर्जनत्वेऽपि न पूर्वनिपातः। 'इको यणचि'इति सूत्रेण यणि पर्याध्ययन। तस्मात् सुप्रत्यये अनुबन्धलोपे विभक्तिकार्ये पर्यध्ययनः इति रूपम्।

निरादयः क्रान्ताद्यर्थे पञ्चम्या। (वार्तिकम्)

त्रिपदं वार्तिकम्। अनेन वार्तिकेन तत्पुरुषसमासः विधीयते। क्रान्ताद्यर्थे निरादयः पञ्चम्यन्तेन समस्यते स तत्पुरुषः।

यथा - **निष्कौशाम्बिः**। निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। निर् कौशाम्बी ङसि इत्यलौकिकविग्रहः। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या'इति वार्तिकेन तत्पुरुषसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे निर् कौशाम्बी। निर् इत्यस्य प्रथमानिर्दिष्टम् उपसर्जनं, तस्य प्राक् प्रयोगः निर् कौशाम्बी। निर् इत्यस्य रेफस्य विसर्गः। 'विसर्जनीयस्य सः'इति सत्वम्। 'आदेशप्रत्यययोः'इति षत्वे निष्कौशाम्बी। प्रातिपदिकस्य ह्रस्वे निष्कौशाम्बि। ततः सुप्रत्यये विभक्तिकार्ये निष्कौशाम्बिः।

१८. तत्रोपपदं सप्तमीस्थम्। (३-१-९२)

त्रिपदं सूत्रम्। तत्र उपपदं सप्तमीस्थम् इति पदच्छेदः। अनेन सूत्रेण उपपदसंज्ञा विधीयते। सप्तम्यां तिष्ठति इति सप्तमीस्थम्। सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत् कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात्।

यथा - कुम्भकारः इत्यत्र कुम्भशब्दस्य उपपदसंज्ञा। उपपदमतिङ् इत्यादावस्य प्रयोजनम्।

१९. उपपदमतिङ्। (२-२-१९)

द्विपदं सूत्रम्। उपपदम् अतिङ् इति पदच्छेदः। अनेन सूत्रेण उपपदसमासः विधीयते। सुप्, सह, नित्यम् इत्यादयःअनुवर्तन्ते। उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङन्तश्चायं समासः। स तत्पुरुषः।

यथा -**कुम्भकारः**। कुम्भं करोति इति कुम्भकारः। कृधातोः 'कर्मण्यण्'इति अण्। कृ अण्। 'अचो ञ्णिति'इति वृद्धौ विभक्तिकार्ये कार। कुम्भ अम् कार सु इत्यत्र 'तत्रोपपदं सप्तमीस्थम्'इति सूत्रेण उपपदसंज्ञायाम् 'उपपदमतिङ्'इति सूत्रेण तत्पुरुषसमासः। उपपदं प्रथमानिर्दिष्टम्। अतः उपसर्जनत्वात् प्राक् प्रयोगः। कुम्भ अम् कार सु। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे कुम्भकार। तस्मात् सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च कुम्भकारः इति रूपम्।

अतिङ् किम्?

मा(ङ्) भवान् भूत्। तिङ्त्वात् समासो न। सप्तमीनिर्देशात् माङुपपदम्।

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः। (परिभाषा)

षट्पदयुक्ता परिभाषेयम्। अनया परिभाषया सुबुत्पत्तेः पूर्वं समासः कार्यः इति निर्दिशति। गतिकारकोपपदानां कृदन्तेन सह समासः सुबुत्पत्तेः पूर्वं भवेत्।
यथा - **व्याघ्री, अश्वक्रीती, कच्छपी**इत्याद्याः।
व्याघ्री - वि + आङ् इत्युपसर्गपूर्वक घ्रा धातोः 'आतोऽनुपसर्गे कः'इति कप्रत्यये 'आतो लोप इटि च'इति आलोपे 'गतिश्च'इति गतिसंज्ञायां 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः'इति परिभाषया सुबुत्पत्तेः प्राक् घ्राशब्देन आङः योगः। वि आ घ्र। यणि व्याघ्र। तस्मात् स्त्रीत्वविवक्षायां 'जातेरस्त्रिविषयादयोपधात्'इति सूत्रेण ङीषि अनुबन्धलोपे व्याघ्री इति रूपम्।
एवम् **अश्वक्रीती, कच्छपी**।

२०.तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः। (५-४-८१)
त्रिपदं सूत्रम्। तत्पुरुषस्य, अङ्गुलेः, संख्याव्ययादेः इति पदच्छेदः। अनेन सूत्रेण अच्प्रत्ययः विधीयते। संख्याव्ययादेः अङ्गुल्यन्तस्य समासन्तोऽच् स्यात्।
यथा -**द्व्यङ्गुलम्**। द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम्। द्वि औ अङ्गुली औ इति अलौकिकविग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च'इति समासः। समासत्वात् सुपः लोपे द्वि अङ्गुली, यणि द्व्यङ्गुली, 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः'इति सूत्रेण अच् द्वयङ्गुली अ। अचि 'अ' शिष्यते'यस्येति च'इति ईकारलोपे द्व्यङ्गुल। सुप्रत्यये अमादेशे पूर्वरूपे द्व्यङ्गुलम्।
एवं **निरङ्गुलम्**।

२१. अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः। (५-४-८७)
अहःसर्वैकदेशसंख्यातपुण्यात् च रात्रेः इति त्रिपदं सूत्रम्। अच्, तत्पुरुषस्य, समासान्तः इत्येते अनुवर्तन्ते। अनेन सूत्रेण अच्प्रत्ययः विधीयते। अहः-सर्व-एकदेश-संख्यात-पुण्यशब्देभ्यः रात्रेरच् स्यात् चात्संख्याव्ययादेः।
अहश्च रात्रिश्च अनयोः समाहारः अहोरात्रः। अहन् रात्रि इत्यवस्थायाम् अच्प्रत्यये अहन् रात्रि अ।

२२.रात्राह्नाहाः पुंसि। (२-४-२९)
द्विपदं सूत्रम्। अनेन सूत्रेण पुल्लिङ्गत्वं विधीयते। राजन्-अहन् शब्दान्तौ द्वन्द्वतत्पुरुषौ पुंसि एव प्रयुज्यते। अर्थात् 'रात्र-अहन्-अह' अन्ताः द्वन्द्वसमासः तत्पुरुषसमासः च पुल्लिङ्गवाचिनौ।
यथा - **अहोरात्रः** - अहश्च रात्रिश्च अहोरात्रः। अहन् सु रात्रि सु इति अलौकिकविग्रहः। अत्र अहन् शब्दः पूर्वपदं रात्रिः उत्तरपदं च। समाहारद्वन्द्वः अयम्। 'चार्थे द्वन्द्वः'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे अहन् रात्रि। अहन् इति नस्य रुत्वे 'हशि च'इति उत्वे गुणे अहोरात्रि। 'अहः सर्वैकदशसंख्यातपुण्याच्च रात्रेः'इति अच्प्रत्यये अनुबन्धलोपे अहोरात्रि अ। यस्येति च इति इकारलोपे अहोरात्र। 'रात्राह्नाहाः पुंसि'इति सूत्रेण रात्रान्तद्वन्द्वसमासस्य पुल्लिङ्गत्वम्। प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे अहोरात्रः इति रूपम्।

सर्वरात्रः - सर्वा च असौ रात्रिः च सर्वरात्रः। सर्वा सु रात्रि सु इति अलौकिकविग्रहः। 'विशेषणं विशेष्येण बहुलम्'इति सूत्रेण समासः। समासत्वात् सुपः लोपे सर्वा रात्रि। 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः'इति सर्वशब्दस्य पुंवद्भावे सर्वरात्रि। 'अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः'इति सूत्रेण अच्। चकारलापे सर्वरात्रि अ। 'यस्येति च'इति इकारलोपे सर्वरात्र। तस्मात् सुप्रत्यये विभक्तिकार्ये सर्वरात्रः इति रूपम्।
एवं **संख्यातरात्रः**। **द्विरात्रम्, त्रिरात्रम्** इत्यादीनि।

संख्यापूर्वं रात्रं क्लीबम्। (वार्तिकम्)
द्विपदं वार्तिकम्। अनेन वार्तिकेन नपुंसकत्वं विधीयते। संख्यापूर्वः रात्रशब्दः नपुंसकं स्यात्।
यथा - **द्विरात्रम्**। द्वयोः रात्रयोः समाहारः द्विरात्रम्। द्वि ओस् रात्रि ओस् इति अलौकिकविग्रहः। 'तद्धिता .....'इति समासे अच्प्रत्यये भस्य लुकि सुप्रत्यये 'संख्यापूर्वं रात्रं क्लीबम्'इति वार्तिकेन नपुंसकलिङ्गे अमि पूर्वरूपे च द्विरात्रम्।
एवं **त्रिरात्रम्**।

२३.राजाहःसखिभ्यष्टच्। (५-४-९१)
द्विपदं सूत्रम्। अनेन टच्प्रत्ययः विधीयते। राजाहःसखिभ्यः टच् इति पदच्छेदः। राजाहःसखिभ्यः अन्ते वर्तमानेभ्यः टच् स्यात्।
यथा - **परमराजः**। परमः चासौ राजा च परमराजः। परम सु राजन् सु इति अलौकिकविग्रहः। 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः'इति सूत्रेण तत्पुरुषसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे परम राजन्। 'राजाहःसखिभ्यष्टच्'इति सूत्रेण टच्प्रत्यये अनुबन्धलोपे परमराजन् अ। भसंज्ञायां नस्तद्धिते इति टिलोपे परमराज। तस्मात् प्रथमाविभक्तौ सुप्रत्यये विभक्तिकार्ये परमराजः इति रूपम्।

२४. आन्महतः समानाधिकरणजातीययोः। (६-३-४६)
त्रिपदं सूत्रम्। आत् महतः समानाधिकरणजातीययोः इति पदच्छेदः। अनेन सूत्रेण आत्वं विधीयते। समानाधिकरणम् इत्यस्य एकद्रव्यवाचि इत्यर्थः। उत्तरपदे इति अनुवर्तते। महतः आकारोऽन्तादेशः स्यात् समानाधिकरणे उत्तरपदे जातीये च परे।
यथा - **महाराजः** - महान् च असौ राजा च इति लौकिकविग्रहः। महत् सु राजन् सु इति अलौकिकविग्रहः। 'सन्महत्परमो.....'इति समासे, समासत्वात् प्रातिपदिकत्वात् सुपः लोपे महत् राजन्। 'आन्महतः समानाधिकरणजातीययोः'इति सूत्रेण आकारान्तादेशे महाराजन्। 'राजाहःसखिभ्यष्टच्'इति इति टच्प्रत्यये अनुबन्धलोपे महाराजन् अ। भसंज्ञायां 'नस्तद्धिते'इति टिलोपे महाराज। तस्मात् सुप्रत्यये विभक्तिकार्ये महाराजः इति रूपम्।
प्रकारवचने जातीयर्प्रत्ययः।
महाजातीयः। महाप्रकारो महाजातीयः। प्रकारार्थे महत् शब्दस्य जातीयर् प्रत्यये रेफस्य इत्संज्ञायां लोपे महत्

जातीय। जातीयर्प्रत्यये परे महत् शब्दस्य आत्वे महाजातीय। सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च महाजातीयः इति।

२५. द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः। (६-३-४७)

त्रिपदं सूत्रम्। द्व्यष्टनः संख्यायाम् अबहुव्रीहिशीत्योः इति पदच्छेदः। अनेन आकारान्तादेशः विधीयते। द्वि-अष्टन् इति शब्दयोः आकारान्तादेशः स्यात् संख्यावाचके उत्तरपदे परे।

यथा -**द्वादश**। द्वौ च दश च द्वादश। द्वि औ दशन् जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः'इति सूत्रेण द्वन्द्वसमसः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे द्विदशन्। 'द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्ययोः'इति सूत्रेण द्विशब्दस्य आत्वे द्वादशन्। नलोपः प्रातिपदिकान्तस्य इति नलोपः। ततः जस्प्रत्यये 'षड्भ्यो लुक्'इति लोपे द्वादश इति।

अष्टाविंशतिः - अष्टौ च विंशतिश्च अष्टाविंशतिः। अष्टन् जस् विंशति जस् इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लुकि अष्टन् विंशति। 'द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः'इति सूत्रेण नस्य आत्वे अष्ट आ विंशति। सवर्णदीर्घे अष्टाविंशति। तस्मात् सुप्रत्यये विभक्तिकार्ये अष्टाविंशतिः इति रूपम्।

२६.त्रेस्त्रयः। (६-३-४८)

त्रेः त्रयः इति द्विपदं सूत्रम्। अनेन सूत्रेण त्रयसादेशः विधीयते। संख्यायाम् अबहुव्रीह्यशीत्योः इति अनुवर्तते। त्रिशब्दस्य त्रयसादेशः स्यात् संख्यायाम् अबहुव्रीह्यशीत्योः।

यथा - त्रयोदश। त्रयः च दश च त्रयोदश। त्रि जस् दश् जस् इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः'इति द्वन्द्वसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लुकि त्रिदशन्। 'त्रेस्त्रयः'इति सूत्रेण त्रिशब्दस्य त्रयसादेशे त्रयस् दशन् सकारस्य रुत्वे 'हशि' च इति रेफस्य उत्वे त्रय उ दशन्। 'आद्गुणः'इति गुणे त्रयोदशन्। नलोपे जस्प्रत्यये विभक्तिकार्ये त्रयोदश इति रूपम्।

एवं **त्रयोविंशतिः,त्रयत्रिंशत्**। त्रयः च विंशतिः चत्रयोविंशतिः। त्रयः च त्रिंशत् च त्रयत्रिंशत्।

२७. परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः। (६-४-२६)

परवत् लिङ्गं द्वन्द्वतत्पुरुषयोः इति त्रिपदं सूत्रम्। अनेन सूत्रेण परपदस्य लिङ्गं विधीयते। एतयोः द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गं स्यात्।

यथा - **कुक्कुटमयूर्यौ इमे**। कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ। कुक्कुट सु मयूरी सु इति अलौकिकविग्रहः। द्वन्द्वसमासः। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः'इति सूत्रेण परपदस्य मयूरीशब्दस्य स्त्रीलिङ्गत्वात् कुक्कुटमयूरी औ। तस्मात् 'स्वौजसमौट्...'इति सूत्रेण प्रथमाद्विवचनविवक्षायां औ, कुक्कुटमयूरी औ। यणि कुक्कुटमयूर्यौ। एवं मयूरीकुक्कुटाविमौ।

अर्धपिप्पली। अर्धं पिप्पल्याः अर्धपिप्पली। अर्ध सु पिप्पली ङस् इति अलौकिकविग्रहः। 'अर्धं नपुंसकम्'इति

सूत्रेण समासः। समासत्वात् सुपः लुकि अर्धपिप्पली। तस्मात् सुप्रत्ययः। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः'इति सूत्रेण स्त्रीत्वे विभक्तिकार्ये अर्धपिप्पली।

द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः। (वार्तिकम्)

त्रिपदं वार्तिकम्। अनेन परपदलिङ्गप्रतिषेधः विधीयते। द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु परवल्लिङ्गस्य प्रतिषेधो वाच्यः।

यथा - **पञ्चकपालः**। पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः। पञ्चन् जस् कपाल सुप् इति अलौकिकविग्रहः।'तद्धितार्थोत्तरपदसमाहारे च'इति समासे, समासत्वात् सुपः लोपे पञ्चन् कपाल। नकारलोपे पञ्चकापल। 'संस्कृतं भक्षाः'इति अण्प्रत्यये 'द्विगोर्लुगनपत्ये'इति लोपे कपालशब्दस्यापि नपुंसकत्वात् 'परवल्लिङ्गं...'इति पञ्चकपालस्य नपुंसकत्वमपि वर्तमानत्वात्'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः'इति वार्तिकेन तन्निषेधे पुरोडाशशब्दस्य पुल्लिङ्गे सुप्रत्यये विभक्तिकार्ये पञ्चकपालः पुराडाशः इति।

२८.प्राप्तापन्ने च द्वितीयया। (२-४-४)

त्रिपदं सूत्रम्। प्राप्तापन्ने च द्वितीयया इति पदच्छेदः। अनेन सूत्रेण समासः अकार अन्तादेशश्च विधीयेते। प्राप्तापन्ने च द्वितीयया समस्येते। अकारश्चानयोः अन्तादेशः।

यथा -**प्राप्तजीविकः**।प्राप्तो जीविकां प्राप्तजीविकः। प्राप्त सु जीविका अम् इति अलौकिकविग्रहः। 'प्राप्तापन्ने च द्वितीयया'इति सूत्रेण समासः। अकारः अन्तादेशः च। प्रथमानिर्दिष्टत्वात् उपसर्जनसंज्ञा। उपसर्जनत्वात् प्राक् प्रयोगः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे प्राप्तजीविक, सुप्रत्यये विभक्तिकार्ये प्राप्तजीविकः इति रूपम्।

एवम् **आपन्नजीविकः** - आपन्नः जीविकाम्।

अलं कुमार्यै - **अलंकुमारिः**। अलं कुमारि ङे इत्यलौकिकविग्रहे 'द्विगुप्राप्तापन्ना...'इत्यादिना ज्ञापकात् समासे परवल्लिङ्गप्रतिषेधे च अलंकुमारी। 'गोस्त्रियोरुपसर्जनस्य'इति सूत्रेण ह्रस्वे अलंकुमारि। तस्मात् परवल्लिङ्गप्रतिषेधे पुल्लिङ्गे विभक्तिकार्ये अलंकुमारिः इति रूपम्।

२९.अर्धर्चाः पुंसि च। (१-४-३)

त्रिपदं सूत्रम्। अर्धर्चाः पुंसि च इति पदच्छेदः। अनेन सूत्रेण अर्धर्चादीनां पुल्लिङ्गत्वं नपुंसकलिङ्गत्वं च विधीयेते। अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः।

यथा - **अर्धर्चः, अर्धर्चम्**। ऋचः अर्धम् अर्धर्चः, अर्धर्चम्। ऋच् ङस् अर्ध सु इति अलौकिकविग्रहः। 'अर्धं नपुंसकम्'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे ऋच् अर्ध। उपसर्जनत्वात् अर्धशब्दस्य पूर्वनिपाते अर्ध ऋच्, गुणे रपरत्वे च अर्धर्च्। ततः 'ऋक्पूरब्धूः...'इति अ अन्तादेशे अर्धर्च। पुल्लिङ्गे सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे अर्धर्चः। नपुंसकलिङ्गे सुप्रत्यये अमादेशे पूर्वरूपे अर्धर्चम् इति च रूपम्।

एवं ध्वजतीर्थशरीरमण्डपयूपदेहाङ्कुशपात्रसूत्रादयः। सामान्ये नपुंसकम्। मृदु पचति। प्रातः कमनीयम्
इति तत्पुरुषः।

विशेषणमात्रप्रयोगे विशेषणं नपुंसकलिङ्गम्।
यथा - मृदु पचति। मृदु इति क्रियाविशेषणं द्वितीयान्तश्च।
प्रातः कमनीयम् कमनीयं विशेषणम्।

पुनरावृत्तिः (Recap)

- उत्तरपदार्थप्रधनः तत्पुरुषसमासः। तत्पुरुषः - अधिकारसूत्रम् शेषो बहुव्रीहेः प्राक्। द्विगुः अपि तत्पुरुषभेदः। उभावपि तत्पुरुषसंज्ञाविधायके सूत्रे।
- तद्धितार्थोत्तरपदसमाहारे चइति तत्पुरुषविधायकंसूत्रं, दिक्पूर्वपदादसंज्ञायां ञः इतिसूत्रेण असंज्ञायां ञप्रत्ययः,
- तद्धितेष्वचामादेः - आदेरचोवृद्धिः,
- गोरतद्धितलुकि - टच्प्रत्ययः
- संख्यापूर्वोद्विगुः - द्विगुसंज्ञा
- विशेषणंविशेष्येणबहुलम् - समासविधिसूत्रम्
- उपमानानिसामान्यवचनैः - समासविधायकं सूत्रम्
- नलोपो नञः - नञो नस्यलोपः
- तस्मान्नुडचि - अजादेर्नुट्
- कुगतिप्रादयः - समासविधिः
- गोस्त्रियोरुपसर्जनस्य - प्रातिपदिकस्यह्रस्वः
- अर्धं नपुंसकम् - अर्धर्चः, अर्धर्चम्
- तत्रोपपदं सप्तमीस्थम् - उपपदसंज्ञा
- उपपदमतिङ् - कुम्भकारः
- रात्राह्नाहाः पुंसि - द्वन्द्वतत्पुरुषाणां पुल्लिङ्गत्वम्-सर्वरात्रः
- राजाहःसखिभ्यष्टच् - टच् प्रत्ययः - परमराजः
- त्रेस्त्रयः - त्रयसादेशः - त्रयोदश
- प्रातापन्ने च द्वितीयया - अकारान्तादेशः -प्राप्तजीविकः
- अर्धर्चाः पुंसि च - पुंस्त्वं, क्लीबत्वं च अर्धर्चादीनाम्, अर्धर्चः, अर्धर्चम्

SGOU

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. दिक्पूर्वपदादसंज्ञायां कः प्रत्ययः विधीयते?
२. 'गोरतद्धितलुकि'इति सूत्रस्य उदाहरणं किम्?
३. अस्माद् भवाद्यर्थे ञः स्यादसंज्ञायाम् - कस्य सूत्रस्य वृत्तिः?
४. द्विगुसंज्ञाविधायकं सूत्रं किम्?
५. अर्धं नपुंसकम् इति सूत्रस्य वृत्तिः का?
६. उत्तरपदार्थप्रधानः समासः कः?
७. अर्धपिप्पलीइत्यत्र केन सूत्रेण समासः विधीयते?
८. नीलोत्पलम् इत्यत्र कः समासः?
९. तत्पुरुषः समानाधिकरणः कर्मधारयःइति सूत्रेण का संज्ञा विधीयते?
१०. केन सूत्रेण उपपदसंज्ञा विधीयते?
११. त्रेस्त्रयः - अस्य उदाहरणं किम्?
१२. उपपदं सुबन्तं समर्थेन नित्यं समस्यते - कस्य वृत्तिः इदम्?

एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

(Answer the following questions in one or two sentences)

लघुव्याख्यानं कुरुत

१. तस्मान्नुडचि।
२. संख्यापूर्वो द्विगुः।
३. नलोपो नञः।
४. एकविभक्ति चापूर्वनिपाते।

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

व्याख्यात

१. द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः।
२. तत्रोपपदं समीपस्थम्।
३. नञ्।
४. अर्धं नपुंसकम्।
५. राजाहःसखिभ्यष्टच्।
६. अर्धर्चाः पुंसि च।

SGOU

निर्दिष्टाभ्यासः (Assignments)

सप्रमाणं समस्यत

१. अहोरात्रः, परमराजः।
२. अर्धपिप्पली, महाराजः।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. ञः।
२. पञ्चगवधनः।
३. दिक्पूर्वपदादसंज्ञायां ञः।
४. संख्यापूर्वो द्विगुः।
५. समांशवाच्यर्थशब्दो नित्यं क्लीबे, स समस्यते।
६. उत्तरपदार्थप्रधानः तत्पुरुषः।
७. अर्धं नपुंसकम्इति सूत्रेण समासो विधीयते।
८. कर्मधारयसमासः।
९. कर्मधारयसंज्ञा।
१०. तत्रोपपदं सप्तमीस्थम्।
११. त्रयोदश।
१२. उपपदमतिङ्।

सूचनाग्रन्थाः (References)

१. वरदराजः लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्करः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्,वाराणसी, २०११

SGOU

Unit-3

बहुव्रीहिसमासः

उद्देश्यानि (Learning Outcomes)

- बहुव्रीहिसमासस्य अवगमनम्
- समासादीनां नियमज्ञानेन भाषायाः ज्ञानम्।
- पदानां व्युपत्तिज्ञानेन अर्थज्ञानम्।
- सूत्रवार्तिकानां ग्रहणम्।

प्राग्व्यपेक्षाः (Pre requisites)

समासप्रकरणे केवलसमासः अव्ययीभावसमासः तत्पुरुषः कर्मधारयः द्विगुः च अस्माभिः पठिताः। इदानीं बहुव्रीहिसमासं पठितुम् अवसरः सम्प्राप्तः। श्रद्धया पठन्तु।

मुख्यपदानि (Key words)

उत्तरपदलोपः, उत्तरपदस्य विकल्पेन लोपः, षच्प्रत्ययः, अप्प्रत्ययः, पादशब्दान्तस्य लोपः, काकुदशब्दान्तस्य लोपः, विकल्पेन काकुदशब्दान्तस्य लोपः, कप्प्रत्ययः, विसर्गस्य सत्वं, विसर्गस्य षत्वं, निष्ठायाः पूर्वत्वं, विकल्पेन कप्प्रत्ययः

Discussion

१. शेषो बहुव्रीहिः। (२-२-२३)

द्विपदं सूत्रम्। अधिकारोऽयं प्राग्द्वन्द्वात्। द्वन्द्वसमासं यावत् बहुव्रीहिः इति पदं अनुवर्तते।

२. अनेकमन्यपदार्थे। (२-२-२४)

द्विपदं सूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासः विधीयते। अनेकम् अन्यपदार्थे इति पदच्छेदः। शेषो बहुव्रीहिः अनुवर्तते। अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः।

यथा - पीताम्बरः। अत्र पीत-अम्बरशब्दयोः न प्राधान्यम्। विष्णुरित्यर्थे प्रसक्तिः।

३. सप्तमीविशेषेण बहुव्रीहौ। (२-२-३५)

द्विपदं सूत्रम्। पूर्वम् इति अनुवर्तते। सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात्।

यथा - पीताम्बरः इत्यत्र समासे विशेषणस्य पीतशब्दस्य पूर्वत्वम्।

SGOU

४. हलदन्तात्सप्तम्याः संज्ञायाम्। (६-३-९)

त्रिपदं सूत्रम्। हलदन्तात् सप्तम्याः संज्ञायाम् इति पदच्छेदः। हल् च अत् च हलदौ, हलदौ अन्तौ यस्य तत् हलदन्तम् तस्मात् हलदन्तात्। अलुगुत्तरपदं इति सूत्रमनुवर्तते। हलन्तादददन्ताच्च सप्तम्याः अलुक्।

यथा - **कण्ठेकालः** - कण्ठे कालो यस्येति लौकिकविग्रहः। कण्ठ ङि काल सु इति अलौकिकविग्रहः। अनेकमन्यपदार्थे इति समासः। सप्तमी विशेषेण बहुव्रीहौ इति सूत्रेण सप्तम्यन्तस्य कण्ठे इत्यस्य पूर्वनिपाते 'हलदन्तात्सप्तम्याः संज्ञायाम्'इति सप्तम्याः अलुकि कण्ठे काल सु। प्रातिपदिकत्वात् सुपः लोपे कण्ठेकाल। तस्मात् प्रथमाविवक्षायां सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे च कण्ठेकालः इति रूपम्।

प्राप्तोदकः। प्राप्तम् उदकं यं सः प्राप्तोदकः ग्रामः। प्राप्त अम् उदक अम् इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे प्राप्त उदक। गुणे प्राप्तोदक। तस्मात् सुप्रत्यये विभक्तिकार्ये प्राप्तोदकः इति।

उढरथोऽनड्वान् - उढः रथः येन सः ऊढरथः। ऊढ सु रथ सु इति अलौकिकविग्रहः। अन्यपदार्थत्वात् समासे समासत्वात् प्रातिपदिकत्वात् सुपः लोपे उढरथ। विशेषणस्यऊढशब्दस्य प्राक् प्रयोगः। प्रातिपदिकत्वात् सुप्रत्ययः ऊढरथ सु। उकारस्य इत्संज्ञायां लोपे विभक्तिकार्ये ऊढरथः इति। बहुव्रीहिसमासे अन्यपदार्थस्येव समासस्य लिङ्गं बोध्यम्।

उपहृतपशू रुद्रः - उपहृतः पशुः यस्मै सः उपहृतपशुः।

उद्धृतौदना स्थाली - उद्धृतः ओदनः यस्याः सा उद्धृतौदना।

पीताम्बरः-पीतम् अम्बरं यस्य सः पीताम्बरः हरिः। पीत सु अम्बर सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति सूत्रेण बहुव्रीहिसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे पीत अम्बर। सवर्णदीर्घे पीताम्बर। तस्मात् सुप्रत्यये विभक्तिकार्ये पीताम्बरः इति रूपम्।

वीरपुरुषकः ग्रामः - वीराः पुरुषाः यस्मिन् सः वीरपुरुषकः।

प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः। (वार्तिकम्)

प्रादिभ्यः परस्य धातुजस्य प्रथमान्तस्य प्रथमान्तेन सह विकल्पेन समासः उत्तरपदलोपः च। स बहुव्रीहिः।

यथा - **प्रपतितपर्णः, प्रपर्णः** - प्रपतितं पर्णं यस्मात् सः प्रपतितपर्णः, प्रपर्णः वृक्षः। अत्र प्रपतितः इति प्रथमान्तः। पर्णम् इति प्रथमान्तेन 'प्रादिभ्यो धातुजस्य वाच्यो चोत्तरपदलोपः'इति वार्तिकेन समस्यते स बहुव्रीहिः। पततशब्दस्य लोपे प्रपर्ण। लोपाभावे प्रपतितपर्ण। तस्मात् विभक्तिकार्ये प्रपर्णः, प्रपतितपर्णः इति।

नञोऽस्त्यर्थानां वाच्यो चोत्तरपदलोपः। (वार्तिकम्)

नञः परस्य अस्त्यर्थानां समासो वक्तव्यः स बहुव्रीहिः। उत्तरपदस्य विकल्पेन लोपः।

यथा - **अविद्यमानपुत्रः, अपुत्रः**। न विद्यमानः अविद्यमानः, अविद्यमानः पुत्रः यस्य सः अपुत्रः, अविद्यमानपुत्रः। 'नञोऽस्त्यर्थानां वाच्यो चोत्तरपदलोपः'इति वार्तिकेन बहुव्रीहिसमासः। समासत्वात् सुपः लोपे अविद्यमानपुत्र। अस्त्यर्थस्य उत्तरपदस्य लोपे अपुत्र। विभक्तिकार्ये अपुत्रः।

लोपाभावे अविद्यमानपुत्रः इति।

५. स्त्रियाःपुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरिणीप्रियादिषु। (६-३-३४)

षड्पदं सूत्रम्। स्त्रियाः पुंवद्भाषितपुंस्कात् अनूङ् समानाधिकरणे स्त्रियां अपूरिणीप्रियादिषु इति पदच्छेदः। उक्तपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिः। तुल्ये प्रवृत्तिनिवृत्ते यदुक्तपुंस्कं तस्मात् परे ऊङोऽभावो यत्र तथानुभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येवरूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे। न तु पूरण्यां प्रियादौ च परतः। गोस्त्रियोरिति ह्रस्वः। चित्रगुः, रूपवद्भार्यः।

चित्रगुः - चित्राः गावः यस्य सः चित्रगुः। चित्रा जस् गो जस् इति अलौकिकविग्रहः। अनेकमन्यपदार्थे इति सूत्रेण बहुव्रीहिसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे चित्रा गो। 'गोस्त्रियोरुपसर्जनस्य'इति सूत्रेण गो शब्दस्य ह्रस्वे चित्रा गु। चित्रा शब्दस्य भाषितपुंस्कत्वात् ऊङाभावात् च स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे 'स्त्रियामपूरिणीप्रियादिषु'इति सूत्रेण पुंवद्भावे चित्रगु। तस्मात् सुप्रत्यये विभक्तिकार्ये चित्रगुः इति रूपम्।

एवं **रूपवद्भार्यः** - रूपवती भार्या यस्य सः रूपवद्भार्यः। रूपवती सु भार्या सु इति अलौकिकविग्रहः। शेषं पूर्ववत्।

अनूङ् किम्?

वामोरूभार्यः - अत्र स्त्रीत्वविवक्षायां ऊङ्प्रत्ययः। अतः पुंवद्भावो न स्यात्। वामोरूभार्यः।

६. अप्पूरणीप्रमाण्योः। (५-४-११६)

द्विपदं सूत्रम्। अप् पूरणीप्रमाण्योः इति पदच्छेदः। बहुव्रीहौ इत्यनुवर्तते। पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात् प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात्।

यथा —**कल्याणीपञ्चमाः**। कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमाः रात्रयः।

कल्याणी पञ्चमी यासां ताः कल्याणीपञ्चमाः रात्रयः। बहुव्रीहिसमासः। 'अप्पूरणीप्रमाण्योः'इति अप्प्रत्यये अनुबन्धलोपे कल्याणीपञ्चमी अ। भसंज्ञायां 'यस्येति च'इति सूत्रेण पञ्चमीशब्दस्य ईकारलोपे कल्याणीपञ्चम। रात्रिशब्दस्य स्त्रीलिङ्त्वात् टाप्। अनुबन्धलोपे कल्याणीपञ्चम आ। दीर्घे कल्याणीपञ्चमा। तस्मात् प्रथमाबहुवचनविवक्षायां जस्प्रत्यये अनुबन्धलोपे सवर्णदीर्घे कल्याणीपञ्चमाः इति रूपम्।

एवं स्त्री प्रमाणी यस्य सः स्त्रीप्रमाणः। बहुव्रीहिसमासत्वात् अप्प्रत्यये ईकारलोपे विभक्तिकार्ये स्त्रीप्रमाणः इति रूपम्।

अप्रियादिषु इति किम्?

कल्याणीप्रियः - कल्याणी प्रिया यस्य सः। अत्र प्रिया शब्दस्य परत्वात् कल्याणीशब्दस्य पुंवद्भावो न।

७. बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्। (५-४-११३)

चतुष्पदं सूत्रम्। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् इति पदच्छेदः। अनेन सूत्रेणण षच्प्रत्ययः विधीयते। समासान्तः इति अनुवर्तते। स्वाङ्गवाचि सक्थ्यक्षान्ताद् बहुव्रीहेः षच् स्यात्।

यथा - दीर्घसक्थः।

दीर्घसक्थः - दीर्घे सक्थिनी यस्य सः दीर्घसक्थः। दीर्घ औ सक्थिन् औ इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे दीर्घसक्थिन्। नलोपे

दीर्घसक्थि इति स्थिते 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्'इति सूत्रेण षच्प्रत्यये अनुबन्धलोपे दीर्घसक्थि अ। भसंज्ञायां 'यस्येति च'इति इकारलोपे दीर्घसक्थ। ततः विभक्तिकार्ये दीर्घसक्थः इति रूपम्।

जलजाक्षी - जलजे इव अक्षिणी यस्याः सा जलजाक्षी। जलज औ अक्षि औ इति अलौकिकविग्रहः। अनेकमन्यपदार्थे इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे जलज अक्षि। सवर्णदीर्घे जलजाक्षि। 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्'इति सूत्रेण षच्। अनुबन्धलोपे जलजाक्षि अ। 'यस्येति च'इति इकारलोपे जलजाक्ष। तस्मात् स्त्रीत्वविवक्षायां ङीषि अनुबन्धलोपे सलोपे च जलजाक्षी इति।

स्वाङ्गात् किम्?

दीर्घसक्थि शकटम्। अत्र सक्थि न स्वाङ्गम्। शकटस्य ईषादण्डः।

स्थूलाक्षा वेणुयष्टिः - स्थूलानि अक्षिणी यस्याः सा स्थूलाक्षा। अत्र अक्षि इत्यनेन वेणुस्थः अङ्गः सूचितः। प्राणिस्थः अपि न। अतः न षच्। अक्ष्णो अदर्शनात् इति अच्प्रत्यये स्थूलाक्ष। स्त्रीत्वविवक्षायां टापि विभक्तिकार्ये स्थूलाक्षा।

८. द्वित्रिभ्यां ष मूर्ध्नः। (५-४-२१)

द्वित्रिभ्यां षः मूर्ध्नः इति त्रिपदं सूत्रम्। अनेन सूत्रेण षच्प्रत्ययः विधीयते। द्वित्रिभ्यां मूर्ध्नः षः स्यात् बहुव्रीहौ।

यथा - **द्विमूर्धः, त्रिमूर्धः** - द्वौ मूर्धानौ यस्य सः द्विमूर्धः। द्वि औ मूर्धन् औ इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति बहुव्रीहिसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे द्विमूर्धन्। 'द्वित्रिभ्यां ष मूर्ध्नः'इति सूत्रेण षप्रत्यये अनुबन्धलोपे द्विमूर्धन् अ। भसंज्ञा। 'नस्तद्धिते'इति सूत्रेण टिलोपे द्विमूर्ध् अ - द्विमूर्ध। तस्मात् सुप्रत्यये विभक्तिकार्ये द्विमूर्धः इति रूपम्।

एवं त्रिमूर्धः। त्रयः मूर्धानः यस्य सः त्रिमूर्धः।

९. अन्तर्बहिभ्यां च लोम्नः। (५-४-११७)

त्रिपदं सूत्रम्। अप् समासान्तः बहुव्रीहौ इति अनुवर्तन्ते। अनेन सूत्रेण अप्प्रत्ययः विधीयते। अन्तर्बहिभ्यां लोम्नोऽप् स्यात् बहुव्रीहौ।

यथा - **अन्तर्लोमः**। अन्तः लोमानि यस्य सः अन्तर्लोमः। अन्तर् लोमन् जस् इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति समासः अन्तर्लोमन्। 'अन्तर्बहिभ्यां च लोम्नः'इति सूत्रेण अप्प्रत्यये पकारस्य इत्संज्ञायां लोपे अन्तर्लोमन् अ। 'नस्तद्धिते'इति सूत्रेण (अन्) टिलोपे अन्तर्लोम। तस्मात् सुप्रत्यये विभक्तिकार्ये अन्तर्लोमः इति।

एवं **बहिर्लोमः** - बहिः लोमानि यस्य सः।

१०. पादस्य लोपोऽहस्त्यादिभ्यः। (५-४-१३८)

त्रिपदं सूत्रम्। पादस्य लोपः अहस्त्यादिभ्यः इति पदच्छेदः। अनेन सूत्रेण पादशब्दान्तस्य लोपः विधीयते। बहुव्रीहौ समासान्तः उपमानात् इति अनुवर्तन्ते। हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्यात् बहुव्रीहौ। व्याघ्रस्येव पादौ अस्य व्याघ्रपात्।

व्याघ्रपात् -व्याघ्रपादौ इव पादौ यस्य सः व्याघ्रपात्। व्याघ्र ङस् पाद औ इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति सूत्रेण समासः। समासत्वात् सुपः लोपः। व्याघ्रपाद। 'पादस्य लोपोऽहस्त्यादिभ्यः'इति पादशब्दस्य अकारलापे व्याघ्रपाद्। तस्मात् सुप्। अनुबन्धलोपे व्याघ्रपाद् स्। हल्ङ्यादिना सलोपः। वावसाने इति चर्त्वे व्याघ्रपात्।
अहस्त्यादिभ्यः इति किम्? हस्त्यादिषु अयं पदान्तलोपः न।
यथा - **हस्तिपादः**। **कुसूलपादः** इत्यादौ।

११. संख्यासुपूर्वस्य। (५-४-१४०)
एकपदं सूत्रम्। पादस्य लोपः समासान्तः बहुव्रीहौ इति अनुवर्तन्ते। अनेन सूत्रेण पादशब्दस्य अकारलोपः विधीयते। पादस्य लोपः स्यात् समासान्तो बहुव्रीहौ।
यथा - **द्विपात्** - द्वौ पादौ यस्य सः द्विपात्। द्वि औ पाद औ इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे द्विपाद। 'संख्यासुपूर्वस्य'इति सूत्रेण पादशब्दस्य अन्त्याकारलोपे द्विपात्। सुप्रत्यये सुलोपे द्विपात् इति।
एवं **सुपात्** (शोभनौ पादौ यस्य सः)

१२. उद्विभ्यां काकुदस्य। (५-४-१४८)
द्विपदं सूत्रम्। अनेन सूत्रेण काकुदशब्दान्तस्य लोपः विधीयते। पादस्य लोपः समासान्तः बहुव्रीहौ इति अनुवर्तन्ते। उद् वि आभ्यां परस्य काकुदशब्दस्य लोपः स्यात् समासान्ते बहुव्रीहौ।
यया - **उत्काकुत्** - उन्नतं काकुदं यस्य सः उत्काकुत्। 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः'इति वार्तिकेन समासः। उत्काकुद इत्यवस्थायां 'उद्विभ्यां काकुदस्य'इति सूत्रेण अन्त्याकारलोपे खरि च इति चर्त्वे उत्काकुत् इति। सुपि अनुबन्धलोपे सलोपे च उत्काकुत्।
एवं **विकाकुत्** (विगतं काकुदं यस्य सः)

१३. पूर्णाद्विभाषा। (५-४-१४९)
द्विपदं सूत्रम्। पूर्णात् विभाषा इति पदच्छेदः। अनेन सूत्रेण विकल्पेन काकुदशब्दान्तस्य लोपः विधीयते। काकुदस्य लोपः समासान्तः बहुव्रीहौ इति अनुवर्तन्ते। पूर्णात् परस्य काकुदस्य विकल्पेन लोपः स्यात् समासान्ते बहुव्रीहौ।
यथा - **पूर्णकाकुत्, पूर्णकाकुदः**। पूर्णं काकुदम् यस्य सः पूर्णकाकुत्, पूर्णकाकुदः। पूर्ण अम् काकुद अम् इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति समासः। समासत्वात् सुपः लोपे पूर्णकाकुद। 'पूर्णाद्विभाषा'इति सूत्रेण विकल्पेन अन्त्याकारलोपे पूर्णकाकुद्। सुप्रत्यये सुलोपे चर्त्वे च पूर्णकाकुत् इति रूपम्।
अकारलोपाभावे सुप्रत्यये विभक्तिकार्ये पूर्णकाकुदः इति च रूपम्।

१४. सुहृद्दुर्हृदौ मित्रामित्रयोः। (५-४-१५०)

द्विपदं सूत्रम्। मित्रार्थे सुहृद् शत्रुरित्यर्थे दुर्हत् इति।अनेन सूत्रेण हृद्भावः निपात्यते। सुदुभ्याहृदयस्य हृद्भावो निपात्यते।

यथा -**सुहृद्**। शोभनं हृदयं यस्य सः सुहृद्। सु हृदय सु इति अलौकिकविग्रहः। समासे 'सुहृद्दुहृदौ मित्रामित्रयोः'इति हृदयशब्दस्य हृद्भावः निपात्यते। सुहृत् इति।

एवं **दुहृत्**।

१५.उरः प्रभृतिभ्यः कप्। (५-४-१५१)

त्रिपदं सूत्रम्। अनेन सूत्रेण कप्प्रत्ययः विधीयते। उरः प्रभृतिभ्यः शब्देभ्यः कप् प्रत्ययः स्यात् समासान्ते बहुव्रीहौ।

यथा -**व्यूढोरस्कः**। व्यूढम् उरः यस्य सः व्यूढोरस्कः। व्यूढ अम् उरस् सु इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति सूत्रेण समासे समासत्वात् प्रातिपदिकत्वात् सुपः लोपे व्यूढ उरस्। गुणे व्यूढोरस्। 'उरः प्रभृतिभ्यः कप्'इति सूत्रेण कप्प्रत्यये अनुबन्धलोपे व्यूढोरस्क, सकारस्य रुत्वे विसर्गे च व्यूढोरस्कः इति रूपम्।

१६.सोऽपदादौ। (८-३-३८)

सः अपदादौ इति द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य सत्वं विधीयते। अपदादौ पाशकल्पककाम्येषु विसर्गस्य सः।

यथा - व्यूढोरः कः इति जाते 'सोऽपदादौ'इति सूत्रेण विसर्गस्य सकारे व्यूढोरस्क। तस्मात् सुप्रत्यये विभक्तिकार्ये व्यूढोरस्कः इति रूपम्।

१७.कस्कादिषु च । (८-३-४८)

द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य षत्वं विधीयते। कस्कादिषु इणः उत्तरस्य विसर्गस्य षः स्यात् अन्यस्य तु सः।

यथा - व्यूढोरस् क इत्यत्र सकारस्य विसर्गे सत्वे च प्राप्ते 'कस्कादिषु च'इति विसर्गस्य सत्वे व्यूढोरस्कः।

१८.इणः षः। (८-३-३६)

द्विपदं सूत्रम्। विसर्गस्य पाशकल्पककाम्येषु अनुवर्तते। अनेन सूत्रेण विसर्गस्य षत्वं विधीयते। इण उत्तरस्य विसर्गस्य षः स्यात् पाशकल्पककाम्येषु परेषु।

यथा - **प्रियसर्पिष्कः**। प्रियं सर्पिः यस्य सः प्रियसर्पिष्कः। 'अनेकमन्यपदार्थे'इति सूत्रेण समासः। सुपः लोपे प्रियसर्पिस्। उरः प्रभृतिभ्यः कप् इत्यनेन प्रियसर्पिस् क। सकारस्य रुत्वे विसर्गे प्रियसर्पिः क। 'इणः षः'इति सूत्रेण विसर्गस्य षत्वे प्रियसर्पिष्क। विभक्तिकार्ये प्रियसर्पिष्कः इति रूपम्।

१९.निष्ठा। (२-३-३९)

एकपदं सूत्रम्। बहुव्रीहौ पूर्वं इति अनुवर्तते। क्त क्तवतु प्रत्यययोः निष्ठा इति नाम। अनेन सूत्रेण निष्ठायाः पूर्वत्वं विधीयते। बहुव्रीहौ निष्ठान्तं पूर्वं स्यात्।

यथा - **युक्तयोगः**। युक्तः योगः येन सः युक्तयोगः। युक्त सु योग सु इति अलौकिकविग्रहः।

'अनेकमन्यपदार्थे'इति बहुव्रीहिः समासः। समासत्वात् सुपः लोपे युक्तयोग। युक्तशब्दस्य क्तान्तत्वात् 'निष्ठा'इति सूत्रेण पूर्वप्रयोगः युक्तयोग। ततः सुप्रत्यये अनुबन्धलोपे रुत्वे विसर्गे युक्तयोगः इति रूपम्।

२०.शेषाद्विभाषा। (५-४-१५४)

शेषात् विभाषा इति द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन कप्प्रत्ययः विधीयते। अनुक्तसमासान्ताद् बहुव्रीहेः कप् वा स्यात्।

यथा - **महायशस्कः, महायशाः**। महत् यशः यस्य सः महायशाः। महत् सु यशस् सु इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति सूत्रेण समासः। समासत्वात् सुपः लोपे 'आन्महतः समानाधिकरणजातीययोः'इति महत् इति शब्दस्य आत्वे महायशस्। 'शेषाद्विभाषा'इति सूत्रेण विकल्पेन कप् प्रत्यये पकारलोपे महायशस्क। सकारस्य रुत्वे विसर्गे महायशः क। 'सोऽपदादौ'इति सूत्रेण विसर्गस्य सकारे महायशस्क। तस्मात् सुप्रत्यये विभक्तिकार्ये महायशस्कः।

कप्प्रत्ययस्य अभावे महायशाः इति। महायशः इत्यवस्थायां सुप्रत्यये महायसः सु। अनुबन्धलोपे 'अत्वसन्तस्य चाधातोः'इत्युपधादीर्घे महायशाः स्। संयोगान्तस्य लोपे महायशाः।

पुनरावृत्तिः (Recap)

- अन्यपदार्थप्रधानो बहुव्रीहिः।
- अनेकं प्रथमान्तं अन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः - अनेकमन्यपदार्थे इति सूत्रम्।
- सप्तमीविशेषणे बहुव्रीहौ - सप्तम्यन्तस्य विशेषणस्य च पूर्वप्रयोगः - कण्ठेकालः इत्युदाहरणम्।
- हलदन्तात्सप्तम्याः संज्ञायाम् - सप्तम्या अलुक् - कण्ठेकालः।
- अप्पूरणीप्रमाण्योः - पूरणीप्रमाण्योः अप् - कल्याणीपञ्चमाः (रात्रयः)।
- अन्तर्बहिभ्यां च लोम्नः - लोम्नः अप् - अन्तर्लोमः।
- संख्यासुपूर्वस्य - पादस्य अलोपः - द्विपात्।
- उरः प्रभृतिभ्यः कप् - कप् प्रत्ययः - व्यूढोरस्कः।
- पीताम्बरः, प्राप्तोदकः, अपुत्रः, अन्तर्लोमः, व्याघ्रपात्, सुपात्, युक्तयोगः, महायशाः

SGOU

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. बहुव्रीहिसमासविधायकं सूत्रं किम्?
२. सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात् - कस्य सूत्रस्य वृत्तिरियम्?
३. 'सोऽपदादौ'इति सूत्रेण किं विधीयते?
४. युक्तयोगः कस्य सूत्रस्योदाहरणम्?
५. सप्तम्याः अलुक् केन विधीयते?
६. अपुत्रः इत्यस्य विग्रहः कः?
७. 'अप्पूरणीप्रामाण्योः'इति सूत्रस्य वृत्तिः का?
८. अन्तर्बहिभ्यां च लोम्नः - अनेन सूत्रेण किं विधीयते?

एकैकया खण्डिकया उत्तराणि लिखत
(Answer the following questions in a paragraph)

सोदाहरणं व्याख्यात।

१. अनेकमन्यपदार्थे।
२. द्वित्रिभ्यां च मूर्ध्नः।
३. संख्यासुपूर्वस्य।
४. इणः षः।

निर्दिष्टाभ्यासः (Assignments)

सप्रमाणं समस्यत

१. प्राप्तोदकः, प्रपर्णः।
२. चित्रगुः, अन्तर्लोमः।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. अनेकमन्यपदार्थे।
२. सप्तमीविशेषेण बहुव्रीहौ।
३. विसर्गस्य सः।
४. निष्ठा।
५. हलदन्तात्सप्तम्याः संज्ञायाम् इति सूत्रेण।
६. अविद्यमानः पुत्रः यस्य सः।
७. पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रामाण्यन्ताच्च बहुव्रीहेरप्सात्।
८. अन्तर्बहिभ्यां लोम्नो अप् विधीयते।

SGOU

सूचनाग्रन्थाः (References)

१. वरदराजः लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५ २८५-२८७।
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः, लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, २०११

SGOU

Unit-4

द्वन्द्वसमासः

उद्देश्यानि (Learning Outcomes)

- द्वन्द्वसमासस्य अवगमनम्
- समासादीनां नियमज्ञानेन भाषायाः ज्ञानम्।
- पदानां व्युपत्तिज्ञानेन अर्थज्ञानम्।
- सूत्रवार्तिकानां ग्रहणम्।

प्राग्व्यपेक्षाः (Pre requisites)

समासप्रकरणे केवलसमासः अव्ययीभावसमासः तत्पुरुषः कर्मधारयः द्विगुःबहुव्रीहिः च अस्माभिः पठिताः। इदानीं द्वन्द्वसमासं पठितुम् अवसरः सम्प्राप्तः। श्रद्धया पठन्तु।

मुख्यपदानि (Key words)

धर्मादिष्वनियमः, घेः पूर्वत्वं, अजादेः अदन्तस्य च पूर्वत्वं, अल्पाचः पूर्वप्रयोगः, विकल्पेन पितृशब्दः शिष्यते, एकवद्भावः, टच्प्रत्ययः, अप्रत्ययः, अच्प्रत्ययः, टजादिप्रत्ययाः निषिध्यन्ते।

Discussion

१. चार्थे द्वन्द्वः। (२-२-२९)

द्विपदं सूत्रम्। अनेन सूत्रेण द्वन्द्वसमासः विधीयते। अनेकं सुप् विभाषा समासः इत्यादयः अनुवर्तन्ते। अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः।

तत्र ईश्वरं गुरुं च भजस्व इति परस्परनिरपेक्षस्यानेकस्य एकस्मिन्नन्वयः समुच्चयः।

भिक्षामट गां चानय इत्यन्यतरस्यानुषङ्गिकत्वेनान्वयो अन्वाचयः। अनयोरसामर्थ्यात् समासो न। धवखदिरौ छिन्धि इति मिलितानामन्वयः इतरोतरयोगः। संज्ञापरिभाषम् इति समूहः समाहारः।

२. राजदन्तादिषु परम्। (२-२-३१)

द्विपदं सूत्रम्। उपसर्जनं पूर्वम् इति अनुवर्तते। एषु (राजदन्तादिषु) पूर्वप्रयोगार्हं परं स्यात्।

उदा -**राजदन्ताः**। दन्तानां राजानो राजदन्ताः। दन्त आम् राजन् जस् इति अलौकिकविग्रहः। 'षष्ठी'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे दन्तराजन् । 'राजदन्तादिषु परम्'इति सूत्रेण दन्तशब्दस्य परप्रयोगे राजन् दन्त। नलोपः प्रातिपदिकस्य इति नकारलोपे राजदन्त। विभक्तिकार्ये जस्प्रत्यये राजदन्ताः इति रूपम्।

SGOU

धर्मादिष्वनियमः। (वार्तिकम्)

द्विपदं वार्तिकम्। अनेन वार्तिकेन पूर्वपरनियमे निर्बन्धता नास्तीति सूचयति। धर्मादिषु अनियमः इति पदच्छेदः। धर्मादेः विषये पूर्वप्रयोगनियमो न स्यात्।

यथा - **धर्मार्थौ, अर्थधर्मौ**। धर्मश्च अर्थश्च धर्मार्थौ, अर्थधर्मौ। धर्म सु अर्थ सु इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे धर्म अर्थ। सवर्णदीर्घे धर्मार्थ। 'धर्मादिष्वनियमः'इति सूत्रेण पूर्वप्रयोगनियमो न। तस्मात् द्विवचनविवक्षायां औ प्रत्यये 'वृद्धिरेचि' धर्मार्थौ इति रूपम्। एवम् अर्थधर्मौ।

३. द्वन्द्वे घि। (२-२-३२)

द्विपदं सूत्रम्। पूर्वमिति अनुवर्तते। अनेन सूत्रेण घेः पूर्वत्वं विधीयते। इकारान्तस्य हरिशब्दस्य घिसंज्ञा। द्वन्द्वे घिसंज्ञं पूर्वं स्यात्।

यथा -**हरिहरौ**। हरिश्च हरश्च हरिहरौ। हरि सु हर सु इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः'इति सूत्रेण समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे हरि हर। अत्र हरिशब्दस्य घिसंज्ञायां 'द्वन्द्वे घि'इति सूत्रेण पूर्वप्रयोगे हरिहर। तस्मात् औ प्रत्यये 'वृद्धिरेचि'इति वृद्धौ हरिहरौ इति रूपम्।

४. अजाद्यदन्तम्। (२-२-३३)

अजादि अदन्तम् इति द्विपदं सूत्रम्। अनेन सूत्रेण अजादेः अदन्तस्य च पूर्वत्वं विधीयते। द्वन्द्वे पूर्वं इति अनुवर्तते। अजादि च तत् अदन्तं च अजाद्यदन्तम्। स्वरादिः ह्रस्वाकारान्ताश्च पदं द्वन्द्वे पूर्वं प्रयोक्तव्यम्।

यथा - **ईशकृष्णौ**। ईशश्च कृष्णश्च ईशकृष्णौ। ईश सु कृष्ण सु इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः'इति द्वन्द्वसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे ईशकृष्ण। 'अजाद्यदन्तम्'इति सूत्रेण ईशशब्दस्य पूर्वप्रयोगे ईशकृष्ण। द्विवचनविवक्षायां औ प्रत्यये ईशकृष्ण औ। 'वृद्धिरेचि'इति सूत्रेण इशकृष्णो इति।

५. अल्पाच्तरम्। (२-२-३४)

एकपदं सूत्रम्। अनेन सूत्रेण अल्पाचः पूर्वप्रयोगः विधीयते। द्वन्द्वे पूर्वम् इति च अनुवर्तते। द्वन्द्वे अल्पाच्पदं पूर्वं स्यात्।

उदा -**शिवकेशवौ**। शिवश्च केशवश्च शिवकेशवा। शिव सु केशव सु इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः'इति सूत्रेण द्वन्द्वसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे शिवकेशव। शिवशब्दस्य अल्पस्वरत्वात् 'अल्पाच्तरम्'इति सूत्रेण पूर्वप्रयोगः। सुप्रत्यये विभक्तिकार्ये शिवकेशवौ।

६. पिता मात्रा। (१-२-७०)

द्विपदं सूत्रम्। सह एकशेषः वा इति अनुवर्तन्ते। अनेन सूत्रेण विकल्पेन पितृशब्दः शिष्यते इति सूच्यते। मात्रा सहोक्तौ पिता वा शिष्यते।

यथा - **पितरौ, मातापितरौ** । माता च पिता च पितरौ, मातापितरौ वा। मातृ सु पितृ सु इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः'इति समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे मातृपितृ। 'पिता मात्रा'इति सूत्रेण एकशोषत्वे पितृ। प्रथमा द्विवचने औप्रत्यये 'ऋतो ङि सर्वनामस्थानयोः'इति गुणे रपरत्वे पितर् औ पितरौ इति रूपम्।

एकशेषत्वाभावे मातृ पितृ इति स्थिते 'आनङ् ऋतौ द्वन्द्वे'इति मातृशब्दस्य आनङादेशे अनुबन्धलोपे मातान् पितृ। नलापे मातापितृ। औ प्रत्यये गुणे रपरत्वे मातापितरौ इति रूपम्।

७. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्। (२-४-२)

त्रिपदं सूत्रम्। द्वन्द्वः च प्राणितूर्यसेनाङ्गानाम् इति पदच्छेदः। अनेन सूत्रेण एकवद्भावः विधीयते। प्राणी च तूर्यं च सेना च प्राणितूर्यसेनाः। तासाम् अङ्गानि प्राणितूर्यसेनाङ्गानि, तेषाम्। समाहारे एकवचनम् अनुवर्तते। एषां द्वन्द्व एकवत् स्यात्।

यथा - **पाणिपादम्**। पाण्योः च पादयोः च समाहारः पाणिपादम्। पाणि ओस् पाद ओस् इति अलौकिकविग्रहः। 'चार्थे द्वन्द्वः'इति समासः। समासत्वात् प्रातिपदिकत्वात् सोः लुकि पाणिपाद। 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्'इति सूत्रेण एकवद्भावः क्लीबं च। ततः सुप्रत्यये अमादेशे पूर्वरूपे पाणिपादम् इति रूपम्।

एवं मार्दङ्गिकवैणविकम्, रथिकाश्वारोहम्।

८. द्वन्द्वाच्चुदषहन्तात्समाहारे। (५-४-१०६)

त्रिपदं सूत्रम्। द्वन्द्वात् चुदषहन्तात् समाहारे इति पदच्छेदः। टच् समासान्तः इत्येतौ अनुवर्तेते। अनेन सूत्रेण टच्प्रत्ययः विधीयते। चवर्गात् दषहन्ताच्च द्वन्द्वाट्टच् स्यात् समाहारे।

यथा - **वाक्त्वचम्**। वाक् च त्वक् च अनयोः समाहारः वाक्त्वचम्। वाच् सु त्वच् च इति अलोकिकविग्रहः । 'चार्थे द्वन्द्वः'इति समासः। समासत्वात्सुपः लुकि वाच् त्वच्। वाचः चकारस्य 'चो कुः'इति चकारस्य ककारः। 'द्वन्द्वाच्चुदषहन्तात्समाहारे' इति सूत्रेण टच् प्रत्यये अनुबन्धलोपे वाक्त्वच् अ, वाक्त्वच। एकवद्भावे 'स नपुंसकम्'इति क्लीबत्वे विभक्तिकार्ये वाक्त्वचम् इति रूपम्।

एवं **त्वक्स्रजम्** । त्वच् च स्रज् च अनयोः समाहारः त्वक्स्रजम् इत्यादीनि।

शमी च दृषत् च अनयोः समहारः शमीदृषदम्।

वाक् च त्विट् च अनयोः समाहारः वाक्त्विषम्।

त्विट् - त्विषौ - त्विषः।

छत्रः च उपानहौ च एषां समाहारः छत्रोपानहम्।

समाहारे किम्?

प्रावृट्शरदौ - प्रावृट् च शरत् च । अत्र इतरेतरद्वन्द्वः, न तु समाहारद्वन्द्वः।

अतः न टच्।

समासान्तप्रकरणम्।

९. ऋक्पूरब्धूःपथामानक्षे। (५-४-७४)

त्रिपदं सूत्रम्। ऋक्पूरब्धूःपथाम् अ अनक्षे इति पदच्छेदः। अनेन सूत्रेण अप्रत्ययः अन्तादेशत्वेन विधीयते। समासान्तः इति अनुवर्तते। ऋगाद्यन्तस्य समासस्य अप्रत्ययोऽन्त्यावयवः स्यादक्षे या धूः तदन्तस्य तु न।

यथा - **अर्धर्चः, अर्धर्चम्**। ऋचो अर्धं अर्धर्चः, अर्धर्चम्। ऋच् ङस् अर्ध सु इति अलौकिकविग्रहः। अर्धं नपुंसकम् इति तत्पुरुषसमासः। अर्धस्य उपसर्जनत्वात् प्राक्प्रयोगः। ऋच् शब्दान्तसमासत्वात् 'ऋक्पूरब्धूःपथामानक्षे'इति सूत्रेण अप्रत्यये अर्ध ऋच् अ। गुणे रपरत्वे अर्धर्च। 'अर्धर्चाः पुंसि च'इति सूत्रेण पुल्लिङ्गे सुप्रत्यये अनुबन्धलोपे विभक्तिकार्ये अर्धर्चः इति।

नपुंसकत्वे सुपि अमादेशे पूर्वरूपे अर्धर्चम् इति च रूपम्।

विष्णुपुरम्। विष्णोः पूः - विष्णुपुरं। षष्ठीसमासः। पुर् शब्दस्य समासान्ते अ प्रत्यये नपुंसकलिङ्गे विभक्तिकार्ये विष्णुपुरम्।

विमलापम्। विमलाः आपः यस्मिन् तत् विमलापं सरः। विमला जस् आप् जस् इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति बहुव्रीहीसमासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे विमला आप्। दीर्घे विमलाप्। 'ऋक्पूरब्धूःपथामानक्षे'इति सूत्रेण अकारान्तादेशे विमलाप। नपुंसकत्वे सुप्रत्यये अमादेशे पूर्वरूपे विमलापम् (सरः)।

एवं राजधुरा। सखिपथः। रम्यपथः।

राजधुरा - राज्ञो धूः राजधुरा। राजन् ङस् धुर् सु इत्यलौकिकविग्रहः। षष्ठी इति समासः। समासत्वात् सुपः लुक्। 'ऋक्पूरब्धूःपथामानक्षे'इति अकारान्तादेशः। नलोपे राजधुर। स्त्रीत्वविवक्षायां सुपि टाप् (आ) राजधुरा।

सखिपथः - सख्युः पन्थाः सखिपथः। सखी ङस् पथिन् सु इति अलौकिकविग्रहः। 'षष्ठी'इति सूत्रेण समासः। समासत्वात् सुपः लुकि सखिपथिन्। 'ऋक्पूरब्धूःपथामानक्षे'इति अकारान्तादेशे नस्तद्धिते इति टिलोपे च सखिपथ। सुपि विभक्तिकार्ये च सखिपथः।

रम्यपथः - रम्यः पन्थाः यत्र असौ रम्यपथः। रम्य सु पथिन् सु इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे'इति समासः। समासत्वात् सुपः लोपे रम्यपथिन्। 'ऋक्पूरब्धूःपथामानक्षे'इत्यनेन अकारान्तादेशे नस्तद्धिते इति टिलोपे विभक्तिकार्ये रम्यपथः।

१०. अक्ष्णोऽदर्शनात्। (५-४-७६)

अक्ष्णः अदर्शनात् इति द्विपदं सूत्रम्। अनेन सूत्रेण अच्प्रत्ययः विधीयते। अचक्षुपर्यायादक्ष्णोऽच् स्यात् समासान्तः।

यथा - **गवाक्षः**। गवामक्षीव गवाक्षः। अक्षिशब्दस्य अक्षिसदृशम् इति। गो ङस् अक्षि सु इति अलौकिकविग्रहः। 'षष्ठी'इति सूत्रेण तत्पुरुषसमासः। सुपः लोपे गो अक्षि 'अक्ष्णोऽदर्शनात्'इति अच् प्रत्ययः। गो अक्षि अ। 'यस्येति च'इति इकारलोपे गो अक्ष। 'अवङ् स्फोटायनस्य'इति अवङ् आदेशे ङित्वात् अन्तादेशे ग् अव अक्ष। सवर्णदीर्घे गवाक्ष। पुल्लिङ्गे सुप्रत्यये रुत्वे विसर्गे च गवाक्षः इति रूपम्।

११. उपसर्गादध्वनः। (५-४-७६)

उपसर्गात् अध्वनः इति द्विपदं सूत्रम्। अनेन सूत्रेण अच्प्रत्ययः विधीयते। अच् समासान्तः इत्येतौ अनुवर्तेते। उपसर्गात्परस्य अध्वन्शब्दस्य अच् समासान्तत्वेन स्यात्।

यथा - प्रगतः अध्वानं प्राध्वो रथः। प्र अध्वन् अम् इति अलौकिकविग्रहः। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया'इति वार्तिकेन समासः। समासत्वात् प्रातिपदिकत्वात् सुपः लोपे प्र अध्वन्। सवर्णदीर्घे प्राध्वन्। 'उपसर्गादध्वनः'इति सूत्रेण अध्वन् शब्दात् अच्। प्राध्वन् अ। भसंज्ञायां 'नस्तद्धिते'इति सूत्रेण टेः लोपे (अन् इत्यस्य लोपे) प्राध्व। विभक्तिकार्ये **प्राध्वः** इति रूपम्।

१२. न पूजनात्। (५-४-६९)

द्विपदं सूत्रम्। समासान्तः इति अनुवर्तते। पूजनार्थात् परेभ्यः टजादिप्रत्ययाः अनेन सूत्रेण निषिध्यन्ते। परेभ्यः इति अध्याह्रियते। पूजनार्थात् परेभ्यः समासान्ताः न स्युः। अति, सु एतौ पूजनार्थौ।

यथा - **सुराजा**। शोभनो राजा सुराजा। सु राजन् सु इति अलौकिकविग्रहः। 'कुगतिप्रादयः'इति सूत्रेण प्रादिसमासः। समासत्वात् सुपः लोपे सुराजन्। तस्मात् सुप्रत्ययः। 'सर्वनामस्थाने चासम्बुद्धौ'इति सूत्रेण उपधादीर्घे नलोपः प्रातिपदिकान्तस्य इति नलोपे सुराजा। 'न पूजनात्'इति सूत्रेण समासान्तो न। सु राजा। तस्मात् सुप्रत्यये अनुबन्धलोपे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'इति सलोपे सुराजा इति रूपम्।
एवम् **अतिराजा**।

पुनरावृत्तिः (Recap)

- उभयपदार्थप्रधानो द्वन्द्वः।
- अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः।
- 'चार्थे द्वन्द्वः'इति सूत्रम्। समुच्चयः, अन्वाचयः, इतरेतरयोगः, समाहारः च चार्थाः।
- राजदन्तादिषु परम् - पूर्वप्रयोगाणां परप्रयोगः - राजदन्तः इत्युदाहरणम्।
- द्वन्द्वे घि - द्वन्द्वे घिसंज्ञं पूर्वं स्यात् - हरिहरौ।
- पिता मात्रा - मात्रा सहोक्तौ पिता वा शिष्यते - पितरौ।
- अक्ष्णोरदर्शनात् - अक्ष्णोरच् - गवाक्षः।
- न पूजनात् - पूजनार्थात्परेभ्यः न समासान्ताः - सुराजा।
- हरिहरौ, ईशकृष्णौ, पितरौ, पाणिपादम्, विष्णुपुरम् इत्यादीनि।

SGOU

वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. चार्थे कः समासः?
२. द्वन्द्वे घिसंज्ञं कुत्र स्यात्?
३. मात्रा सहोक्तौ पिता वा शिष्यते - कस्य वृत्तिः इयम्?
४. उपसर्गादध्वनः - अस्य अर्थः कः?
५. चार्थाः के?
६. समुच्चयः कः?
७. राजदन्तादिषु परं इत्यस्य वृत्तिः का?
८. द्वन्द्वे घिसंज्ञं कुत्र स्यात्?

एकैकया खण्डिकया उत्तराणि लिखत

(Answer the following questions in a paragraph)

सोदाहरणं व्याख्यात।

१. चार्थे द्वन्द्वः।
२. अजाद्यदन्तम्।
३. पिता मात्रा।
४. उपसर्गादध्वनः।

निर्दिष्टाभ्यासः(Assignments)

सप्रमाणं समस्यत

१. धर्मार्थौ, हरिहरौ।
२. पितरौ, अर्धर्चः।

वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. द्वन्द्वः।
२. पूर्वम्।
३. पिता मात्रा।
४. अध्वन् शब्दस्य अच्प्रत्ययः स्यात् उपसर्गात् परः अध्वन् शब्दः चेत्।
५. समुच्चयः, अन्वाचयः, इतरेतरयोगः, समाहारः च चार्थाः।
६. ईश्वरं गुरुं च भजस्व इति परस्परनिरपेक्षस्य अनेकस्य एकस्मिन्नन्वयः।
७. राजदन्तादिषु पूर्वप्रयोगार्हं परं स्यात्।
८. द्वन्द्वे घिसंज्ञं पूर्वं स्यात्।

SGOU

सूचनाग्रन्थाः (References)

१. वरदराजः लघुसिद्धान्तकौमुदी, चौखम्बा संस्कृतसंस्थान्, वाराणसी, २०१५ २८५-२८७।
२. वरदराजः,लघुसिद्धान्तकौमुदी, बालहितैषिणी व्याख्या प्रोफसर् आर्. वासुदेवन् पोट्टि, सर्वकारीयकलाशाला तृप्पूणित्तुरा, १९९७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता गिरीशकुमारठक्कुरः, कृष्णदास् अकादमी, वाराणसी, १९९८

अधिकवाचनग्रन्थाः (Suggested Readings)

१. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता डा कौशल् किषोर् पाण्डेय, चौखम्बा संस्कृत संस्थान,वारणासी, १९९५
२. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याताईश्वरचन्द्र, संस्कृत ग्रन्थाकार्, दिल्ली,२००७
३. वरदराजः लघुसिद्धान्तकौमुदी, व्याख्याता श्री गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, २०११

SGOU

Model Question Paper

Set - 1

SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ……

Reg.No : …….....

Name : ……...

THIRD SEMESTER B.A. SANSKRIT EXAMINATION

DISCIPLINE CORE- B21SN03DC - व्याकरणपरिचयः

(CBCS - UG)

2022-23 - Admission Onwards

Time: 3 Hours Max Marks: 70

सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।

(प्रथमो भागः)

I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।

(Answer any ten questions in a word or sentence) **(10 x1=10)**

1. आन्तर्यम् इत्यस्य कोऽर्थः?
2. कीदृशः आगमः आद्यावयवोभवति?
3. गुणसंज्ञा केनसूत्रेण विधीयते?
4. कर्मधारयसमासः कस्य समासस्य भेदः?
5. केन सूत्रेण टिसंज्ञा विधीयते?
6. प्रत्ययः कः?
7. इकारस्य उच्चारणस्थानं किम्?
8. सत्+ चित् - .....। (सन्धिं कुरुत)
9. ङ्णोः कुक्टुक् .....। (पूरयत)
10. विश् + नः इत्यत्र श्चुत्वनिषेधसूत्रं किम्?
11. धातुसंज्ञा विधायकं सूत्रं किम्?
12. ब्रह्मा +ऋषिः इति स्थिते ह्रस्वाभावपक्षे रूपं किम्?
13. आम्रेडितसंज्ञाविधायकं सूत्रं किम्?
14. कृष्णश्रितः – इत्यत्र कः समासः?
15. आन्महतः समानाधिकरणजातीययोः इति सूत्रस्य उदाहरणं किम्?

SGOU

(द्वितीयो भागः)

II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।

(Answer any five questions in one or two sentences) **(5 x 2 = 10)**

(सूत्राणां लघुव्याख्यानं कुरुत)

16. आदिरन्त्येन सहेता।
17. हलोऽनन्तराः संयोगः।
18. इकोयणचि।
19. पूर्वत्रासिद्धम्।
20. साधकतमं करणम्।
21. स्तोः श्चुना श्चुः।
22. नदीभिश्च।
23. सह सुपा।
24. द्विगुश्च।
25. अकः सवर्णे दीर्घः।

(तृतीयो भागः)

III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत ।

(Answer any six questions) **(6 x 5 = 30)**

26. कटे आस्ते - विभक्तिकार्यं स्पष्टयत।
27. सुधी+ उपास्यः - सप्रमाणं सन्धत्त।
28. भूतपूर्वः - सप्रमाणं समासकार्याणि विशदयत।
29. चोरभयम् - अत्र समासः कः? केन सूत्रेण?
30. अपुत्रः - कः समासः? ससूत्रं स्पष्टयत।
31. अणुदित्सवर्णस्य चाप्रत्ययः सूत्रं व्याख्यात।
32. 'विष्ण इति'-'विष्णविति' इत्यत्र रूपद्वयं कथम्?
33. हरिश्शेते - सप्रमाणं सन्धिकार्याणि प्रतिपादयत।
34. वागीशः - सन्धिकार्यं स्पष्टयत।
35. तद् +शिवः - सप्रमाणं सन्धत्त।
36. विसर्जनीयस्य सः - सूत्रं व्याख्यात।
37. भूतबलिः - सप्रमाणं समासकार्याणि विशदयत।

SGOU

(चतुर्थो भागः)

IV.यथेच्छंद्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत।

(Write an essay on any two of thefollowing) **(2 x 10 =20)**

38. उच्चारणस्थानानि विशदयत।
39. कारकाणि कति? सविस्तरं प्रतिपादयत।
40. समासः कतिविधः? सोदाहरणं विशदयत।
41. नीलोत्पलं, पितरौ, राजपुरुषः – सप्रमाणं समासकार्याणि विशदयत।

SGOU

Model Question Paper

Set - 2

SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ……

Reg. No : …….....
Name : ……...

THIRD SEMESTER B.A. SANSKRIT EXAMINATION
DISCIPLINE CORE- B21SN03DC - व्याकरणपरिचयः
(CBCS - UG)
2022-23 - Admission Onwards

Time: 3 Hours Max Marks: 70

सर्वे प्रश्नाः संस्कृतभाषयां समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।

(प्रथमो भागः)

I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।
(Answer any ten questions in a word or sentence) **(10 x 1=10)**

1. प्रत्याहारविधायकसूत्रं किम् ?
2. गुणवर्णाः के?
3. विग्रहः कतिविधः ?
4. केन सूत्रेण नपुंसकत्वं विधीयते ?
5. कया सह संख्या समस्यते ?
6. प्रथमानिर्दिष्टं ..... उपसर्जनम्। (रिक्तं पूरयत)
7. पूर्वपदार्थप्रधानः समासः कः?
8. उपदेशशब्दस्य कोऽर्थः ?
9. सुखार्तः – इत्यत्र वृद्धिरेकादेशः केन सूत्रेणविधीयते?
10. लघुसिद्धान्तकौमुद्याः कर्ता कः ?
11. ग्रामादायाति - इत्यत्र ग्रामात् इति पदस्य का संज्ञा विधीयते?

12. उदितः के ?

13. आधारः कतिविधः?

14. पाणिनीये प्रथमं सूत्रं किम् ?

15. दिक्पूर्वपदादसंज्ञायां कः प्रत्ययः विधीयते ?

(द्वितीयो भागः)

II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।

(Answer any five questions in one or two sentences) **(5 x 2 = 10)**

16. माहेश्वरसूत्राणि लिखत।

17. कति बाह्यप्रयत्नाः? के च ते?

18. रात्रह्नाहाः पुंसि इति सूत्रस्य चत्वारि उदाहरणानि लिखत।

19. स्पर्शवर्णाः के?

20. उपेतः इत्यत्र न वृद्धिः। कारणं किम्?

21. इ इन्द्रः इत्यत्र सवर्णदीर्घो न। कुतः

22. एतन्मुरारिः –एतद्मुरारिः भेदः लिखत।

23. वृत्तिः का?

24. तृतीया तत्कृतार्थेन गुणवचनेन इत्यत्र तत्कृतेति किं प्रयुक्तम्?

25. समासः कतिविधः? के च ते?

(तृतीयो भागः)

III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत ।

(Answer any six questions) **(6 x 5 = 30)**

26. तुल्यास्यप्रयत्नं सवर्णम् – सूत्रं व्याख्यात।

27. हरी+ एतौ- सप्रमाणं सन्धत्त।

28. अणुदित्सवर्णस्य चाप्रत्ययः -सूत्रं व्याख्यात।

29. मोऽनुस्वारः, नश्चापदान्तस्य झलि अनयोः सूत्रयोः भेदः लिखत।

30. लक्ष्मीच्छाया- लक्ष्मी छाया इति रूपद्वयं कथं सिद्धयति?

31. बलिं भिक्षते वसुधाम् – विभक्तिकार्यं सप्रमाणं स्पष्टयत।

32. मनोरथः - सप्रमाणं सन्धिकार्याणि प्रतिपादयत।

33. उपशरदम्- सप्रमाणं समस्यत।

34. अव्ययीभावे चाकाले - सूत्रं व्याख्यात।

35. अब्राह्मणः - कः समासः? ससूत्रं स्पष्टयत।

SGOU

36. पाणिपादम् – सप्रमाणं समासकार्याणि लिखत।

37. तद्धितेष्वचामादेः –सूत्रं व्यख्यात।

(चतुर्थो भागः)

IV. **केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत।**

(Write an essay on any two of thefollowing) **(2 x 10 =20)**

38. गां दोग्धि पयः, राज्ञः पुरुषः, विप्राय गां ददाति – विभक्तिकार्यं सप्रमाणं समर्थयत।

39. शिवोऽर्च्यः, सच्चित्, उपेन्द्रः – सन्धिकार्यं स्पष्टयत।

40. चोरभयम्, हरिहरौ, पीताम्बरः – सप्रमाणं समासकार्याणि प्रतिपादयत।

41. उपेन्द्रः – दैत्यारिः – देवैश्वर्यम् – सप्रमाणं सन्धिकार्याणि विशदयत।

SGOU

സർവ്വകലാശാലാഗീതം

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

കുരീപ്പുഴ ശ്രീകുമാർ

SGOU

SREENARAYANAGURU OPEN UNIVERSITY

Regional Centres

Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

व्याकरणपरिचयः

COURSE CODE: B21SN03DC

SGOU

ISBN 978-81-966440-3-1

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841